Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अथ प्रकाशसहितश्रीवल्लभाचार्यस्तुतिरत्नावलिप्रारंभः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशायनमः ॥ श्रीगुरवेनमः॥ श्रीकृष्णायनमः ॥ श्रीगोपीजनवल्लभायनमः ॥ श्रीमदाचार्यचरणेभ्योनमः ॥ गं[1]गेगौतमि गोपिकेगुणकलेगोदेचगीतिप्रियेगोमत्येवमुदाव्हयन्नभि[2]सृतो[3]हंबारवाऽऽडंबरं[4] ॥ उल्लांगूलसुहुंकृतंस्नुतपयो[5]गोभिर्विलीढः पदोरुन्मीलन्मुरलीविरावरसिकोगोपालबालोऽवतात् ॥ १ ॥ स[6]द्वृंदावनसक्तास[7]रसमहोदधिविमंथनेरक्ता ॥ श्रीराधाहारिमूर्तिः श्[8]यामासु[9]रसादराऽवतात्सास्मान् ॥ २ ॥ सु[10]रसार्थसेवनीयं[11]श्रुत्युचितगुणंप[12]रप्रभावलयं ॥ सद्ब्र[13]ह्मसूत्रकलितंस्वाचार्याणां[14]वपुर्वचश्चभजे ॥ ३ ॥ स[15]दालिसेवितौवंदेप[16]रागमाहितौमृदू ॥ अरविंदरुचांचोरौचरणौविठ्ठलेशितुः ॥ ४ ॥ य

---

१ गंगादीनि धेनुनामानि २ गोभिः कर्त्रीभिरभिसृतः प्राप्तः ३ गोशब्दानुकरणमिदम् ४ इदं उल्लांगूलेतिच अभिसरणक्रियाया विशेषणद्वयम् ५ इदं अभिसरणविलेहनक्रिययोर्विशेषणम् ६ समीचीने वनविशेषे हरिपक्षे सतां वृंदस्य रक्षणे ७ सरसं महः कांतिर्यस्य तादृशस्य दध्नो मंथनआसक्ता अथवा सरसं सशब्दं दधिमथनेपि रक्ता श्रमेणारुणीभूता अहो हरिपक्षे रसया भूम्या रसेन जलेन शब्देनवा सहितस्य महत उदधेर्मथनासक्ता सरसमहा नित्यं सरसोत्सवविशिष्टेति पृथग्विशेषणंवा मह उद्धव उत्सव इत्यमरः ८ षोडशवार्षिकी पक्षे श्यामवर्णा ९ सुष्ठुरसे शृंगारे सुशब्देवा रसो वै स इति श्रुतिप्रसिद्धे भगवतिवा आदरवती पक्षे देवेषु सादरा सुरसा दराभयरहितेति पदद्वयंवा १० सुराणां सार्थः समूहः वचःपक्षे सुष्ठुरसो भक्त्यादिर्भगवानवा यस्मिंस्तादृशोर्थः ११ श्रवणार्हगुणं पक्षे वेदोचितप्रमाणकं १२ परं उत्कृष्टं प्रभामंडलं यस्य पक्षे परेषां वादिनां प्रभावस्य लयो यस्मात् १३ यज्ञोपवीतं पक्षे संतो वेदाः व्याससूत्राणिच १४ स्वमतेनामरूपयोरपिभजनीयत्वं १५ सता आल्या पंक्त्या पक्षे सदाआलिभिः १६ परउत्कृष्टः परस्य हरेर्वा आगमो वेदांतादिः तस्मै हितौ पक्षे परागेण पुष्परजसा माहितं पूजितं.

For Private and Personal Use Only

त्पदपुनर्भव[1]च्छविरपुनर्भव[2]कारणंनिजानांनः ॥ गोस्वामिव्रजवल्लभचरणानूमातामहानगुरू[3]न्वंदे ॥ ५ ॥ श्रीमन्मुकुंद
पदसुंदरपंकजालेर्निःशेषशेषवचसांचविशेषवेत्तुः[4] ॥ शास्त्रेऽगमंपरिचितेंयतएकतस्तंश्यामोत्तरंघनं[5]महांपितरंनमामि ॥
॥ ६ ॥ युग्मं स्वांतेनं[6]वेदांतहितेऽपिनित्यंवेदांतचिंताचिरसंततास्ते ॥ यस्योत्स्फुरद्व्याँकृतिलब्धकीर्तेर्नव्याकृतिः श्ला
घ्यतमाविभाति ॥ ७ ॥ श्रीवल्लभाचार्यकुलप्रदीपः सगोकुलाधीशइतिप्रसिद्धः ॥ कृत्वानिजाचार्यनुतिं[7]विचार्यसमादिशन्मां
विवरीतुमेतां ॥ ८ ॥ मूढोगूढपदेतदंत्र[8]विवृतिंतन्वेदृशां[9]वोप्यहंतूर्णं[10]वर्णचणालिखंतुसुखतोवकुंनचितालवः[11] ॥ मंतुं[12]किंतुमम
प्रमादजममीसर्वेक्षमंतांबुधाभृंगाःकेतककंटकान्नगणयंत्यंतर्गुणग्राहिणः ॥ ९ ॥ अथश्रीमदाचार्यस्तुतिरूपेषुप्राक्तनग्रंथेषु
केषांचिन्मंत्ररूपत्वात् केषांचि तत्त्वाभावेपिरहस्यनिरूपकत्वात् केषांचिच्चरित्रचिंतामण्यादीनांसर्वचरित्रनिरूपकत्वेना
तिविस्तीर्णत्वाच्चसर्वाधिकारकंप्रत्यहपाठयोग्यंसंक्षेपेणाचार्यचरित्रानुभावकंचमत्कृतत्वात्सकलप्रेक्षावत्प्रवृत्तिपात्रंचकिं
चित्स्तोत्रंचिकीर्षवोगोस्वामिश्रीगोकुलाधीशचरणाः स्वहृदयेश्रीमदाचार्यस्वरूपस्फोरणायमंगलमाचरंतस्तेषांभगवन्मु

---

१ पुनर्भवो नखः २ अपुनर्भवो मोक्षः ३ स्वसांप्रदायिकमंत्राद्युपदेष्टॄन् ४ महाभाष्यनिष्णातात् ५ घनश्यामाख्यं ६ न वेदांतेति च्छेदे विरोधः प्रतिभा
रूपबुध्या प्रतिक्षणं नवीने दांतेभ्यो हिते चेति परिहारः ७ पाणिनीयम् ८ न व्याकृतिरितिविरोधः नव्या नूतना काव्यकृतिरिति परिहारः ९ स्तोत्रे १० लेख
काः ११ लेशः १२ अपराधं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खत्वंवक्तुंप्रथमतोमाहात्म्यानुसारेणभगवत्स्वरूपनिरूपणपूर्वकंप्रत्यगाशिषमभ्यर्थयंते इच्छेति सदानंदमूर्तिर्नः शरणंभव त्वितिसंबंधः सदानंदोमूर्तिर्यस्यसतथा स्वरूपभूतत्वात्तयोः तेनकृष्णइत्यर्थः श्रूयतेचतापनीये कृषिर्भूवाचकःश ब्दोणश्चनिर्वृतिवाचकः तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतइति भूःसत् निर्वृतिरानंदः तेनोक्तंफलितं यद्यपिसिद्धांत [१]प्रकाशाश्रयाधिकरणन्यायेनसर्वेषामेवविशेषाणांस्वरूपाभिन्नत्वं तथाप्यक्षरावस्थायामपि[२]सदादेः सत्त्वात् [४]तत्कार्य स्यचात्रप्रस्तुतत्वादेतावदेवोक्तं अनुक्तापिचित्सत्याहारन्यायेनायात्येव तत्पूर्वापरभूतोभयग्रहणात्तस्याअपिस्वरूप भूतत्वान्नित्यसहचरितत्वाच्च सत्यंज्ञानमनंतमित्यत्रभाष्येआनंदस्यतथैवगृहीतत्वाच्च अतएवतापनीये सच्चिदानंद रूपायकृष्णायाक्लिष्टकर्मणइतिपठ्यते एवंस्वरूपंनिरूप्यकार्यलिंगकानुमानेनईश्वरसिद्धयेश्रौतंकार्यमनुवदंति विश्वेति विश्वस्यजगतोविश्वेषांसर्वेषांवा उद्भवभृतिरुद्वृतीः उत्पत्तिस्थितिप्रलयान्करोतीतितथा यतोवाइमानिभूतानिजायंते येनजातानिजीवंति यत्प्रयंत्यभिसंविशंतीतितैत्तिरीयश्रुतेः उद्भवआविर्भावः सर्वस्यापिश्रुतौनित्यत्वोक्तेः पुष्यमा णस्यैवस्थितिर्भवतीतिभृतिपदेनसोक्ता प्रलयेपितिरोभावस्यैवश्रौतत्वाद्धृतीतिकथितं नहिहरणमत्रनाशः किंतु त

---

१ स्वगामिनीमाशिषं २ प्रकाशाश्रयवद्वा तेजस्त्वादिति ब्रह्मसूत्रेण ३ सच्चिदानंदानां ४ जगदुत्पत्त्यादे रक्षरब्रह्मकार्यस्य ५ यदिदं किंच तत्सत्यमि- त्याचक्षतइत्यादौ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोऽम्यन्नन्नयनं उद्भवादिषुकरणापेक्षायामाहुः इच्छेति मात्रशब्दोऽवधारणार्थत्वात् करणांतरंव्यवच्छिनत्ति मात्रंका
त्स्न्येऽवधारणइत्यमरः मायादीनांशक्तित्वेनाभेदान्नपृथङ्निमित्तत्वमितिश्रुतिमतं इच्छामात्रस्यकरणत्वंतु सईक्षांचक्रे:
तदैक्षतबहुस्यांप्रजायेयेति सऐक्षतलोकान्नुसृजाइतीत्यादिप्रश्नोपनिषच्छ्रुतकेतुविद्यैतरेयादिश्रुतिषुस्फुटं एवंमाहा
त्म्येसिद्धेस्नेहोपयोगिस्वरूपमाहुः आविर्भूयेत्यादि यःव्रजेआविर्भूयविहरति नित्यापरिच्छिन्नतनुत्वादाविर्भावउक्तः
उक्तंचनारदपंचरात्रे अनित्येजननंनित्येपरिच्छिन्नेसमागमः नित्यापरिच्छिन्नतनौप्राकट्यंचेतिसात्रिधेति एतेनांशा
वतारत्वव्यावर्तनाद्भक्त्याश्रयत्वंचसमर्थितं भक्तिमीमांसायां तद्वाक्यशेषात्प्रादुर्भावेष्वपिसेत्यादिसूत्रैः पूर्णावतारेष्व
नुरक्तेरपि मुख्यभक्तित्वनिरूपणात् विहरतीतिलटालीलायानित्यत्वं आविर्भावेप्रयोजनं भक्तकामप्रपूर्त्याइति प्राये
णमाहात्म्यज्ञानोत्तरभाविभगवद्विषयकसुदृढसर्वाधिकस्नेहयुक्ताभक्ताः कामाश्चात्रभगवद्विषयकाएव लौकिकभोगरूपा
णांशिवादिभिःपूरणदर्शनात् भगवद्भक्तानांतादृशकामोद्भवासंभवाच्च तत्प्रपूरणायेत्यर्थः पूर्तौप्रकर्षःकालापरिच्छेदरूपः
स्वशांतरूपेष्वितरैःस्वरूपैरभ्यर्थ्यमानेष्वनुकंपितात्मा परावरेशोमहदंशयुक्तोह्यजोपिजातोभगवान्यथाग्निः तथापरम
हंसानांमुनीनाममलात्मनां भक्तियोगवितानार्थमित्यादिश्रीभागवतादिवाक्यैस्तस्याः प्रयोजनत्वं एवंपुष्टिस्थानांमनो
रथपूर्तिमुक्काप्रावाहिकोद्धारार्थमाहुः तन्वन्निति कीर्तिंतन्वन्विस्तारयन्सन्योविहरतीत्यन्वयः भगवतःषड्गुणांतःपा



For Private and Personal Use Only

तिनोयशसोनित्यत्वात्तस्यलौकिकवन्नवीनकरणंनसंभवतिकिंतुविस्तारणमेव कीदृशींकीर्तिं तमोघ्नीं तमोऽज्ञानंहंती
तितथातां अनेनप्रावाहिकाणामप्युद्धारोभविष्यतीतिसूचितं आच्छिद्यकीर्तिंसुश्लोकांवितत्यह्यंजसानुकौ तमोनयात
रिष्यंतीत्येकादशस्कंधवाक्यात् मार्यादिकार्थमाहुः श्रुतीति श्रुतिभिर्वेदैर्मृगितंपदंअक्षराख्यंस्थानंचरणंवायस्यसतथा
सर्वैर्वेदायत्पदमामनंतीतिकठश्रुतेः अक्षरस्यधामत्वंतु[1]तत्रैव एतद्ध्येवाक्षरंब्रह्म एतदालंबनंश्रेष्ठमित्यादिनातथामुंडकादि
षुचस्पष्टं तथाचतेषाम[2]क्षरेप्रवेशात्तस्यचभगवच्चरणरूपत्वात्तत्स्थानरूपत्वाद्वाकेवलज्ञानिनामपिवस्तुतस्तुमुक्तिदातापुरुषो
त्तमएवेतिफलितं उक्तंचमुक्तावल्यां ब्रह्मणीत्थंहरिर्मतइति एवंत्रिविधानामपियथायोग्यंस्वाभिमतप्रयोजनसिद्ध्यर्थंभ
गवदाविर्भावइत्युक्त्वातत्रबीजबोधनार्थंक्रमात्पदत्रयेणविशिंषतः प्रथमंकामपूर्तिसामर्थ्यमाहुः पूर्णकामइति यस्यकामाः
स्वतःपूर्णाःसोऽन्येषामपिपूरयेदितिभावः सर्वकामःसर्वगंधइतिशांडिल्यविद्याश्रुत्यापूर्णकामत्वं प्रावाहिकोद्धरणेहेतुमा
हुः दयार्द्रइति तेषांसाधनाभावेपिस्वयंकृपयतीत्यर्थः आर्द्रपदाद्दयायारसत्वंव्यज्यते मार्यादिकानामप्युद्धारणेहेतुमाहुः
सर्वेशइति सर्वस्यवशीसर्वस्येशानइतिबृहदारण्यकशारीरब्राह्मणश्रुतेः यद्यपिशुष्कज्ञानिनस्तुपुरुषोत्तमंअक्षरादपृथगेवम
न्वानाःसाम्याभिमानिनस्तथापिसर्वेशत्वात्तानप्युद्धरतीतिभावः एवंनिवृत्ततर्षैरित्यादिवत्त्रिविधानामपिअभीष्टसिद्धिर्भ

१ कठवल्ल्यां २ यदक्षरंवेदाविदोवदंति विशंतियद्यतयोवीतरागाइति गीतोक्तात्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गवदवतारप्रयोजनत्वेनोक्ता तत्रैवंसंदेहः भूभारहरणस्यैवसर्वत्रप्रयोजनत्वेनकथनात्कथमेतदेवावतारप्रयोजनमिति तं
वारयितुमाहुः जगतीति जगतीपृथ्वी अपदेशोव्याजः समग्रजगद्धयस्यापीच्छामात्रेणशक्यत्वेभारहृतिमात्रायावतारायो
गात् इदंश्रीभागवतेप्रथमस्कंधेपृथास्तुतौस्पष्टं एवंसत्यपिसाक्षादैश्वर्यैकेचिदासुरानास्तिक्यात्स्वबुद्धिजाड्येनभ्रमंतीति
तत्रकारणमाहुः गोपवेषइति प्रथमंगोपस्यआभीरस्यततोमथुरागमनानंतरंराज्ञश्चवेषइववेषोयस्यसः गोशब्दस्यभूमिपर्या
यत्वात् गोपशब्दो राजवाचकोपि भवति वस्तुतस्तु वेषमात्रमिदं अतोबहिर्दृष्ट्यातेभ्राम्यंतीतिभावः अतएवभगव
तापि अवजानंतिमांमूढाइति तेषां स्वरूपानादरमुक्त्वामानुषीं तनुमाश्रितमितिपरभावाज्ञानेहेतुरुक्तः अथवा तात्वि
कंनित्यलीलास्थंपुरुषोत्तमस्वरूपमेवगोपवेषपदेनोच्यते गोपवेषमभ्राभं गोपवेषः पुरुषोमेतदाविर्बभूवेत्यादिश्रुतिभ्यः
तेनात्रावतारेमूलभूतस्वरूपादनतिरेकएवेतिज्ञापितं एतादृशः शरणंरक्षिता स्त्वतिस्वंस्वांश्चप्रत्याशीः आशिषिलोट् शर
णंगृहरक्षित्रोरित्यमरः अत्रबहूनांश्रौतार्थानांनिबंधनात् शब्दप्रमाणालंकारः लक्षणंत्वाहालंकारदीपिकापरिशेषप्रकरणे
आशाधरभट्टः श्रुत्यादिवाक्यविन्यासान्निश्चयः शब्दइष्यतइति नचसाक्षाद्वाक्यविन्यासाभावान्नसइतिशंक्यं कुवलयानं
दोदाहृते विवृण्वतादोषमपिच्युतात्मनात्वयैकमीशंप्रतिसाधुभाषितं यमामनंत्यात्मभुवोपिकारणंकथंसलक्ष्यप्रभवोभवि
ष्यतीतिकुमारसंभवश्लोके योब्रह्माब्रह्मणउज्जभारप्राणेश्वरःकृत्तिवासाः पिनाकीतिश्रुतेरर्थमात्रोपनिबंधनेपि तदलंका

रांगीकारात् नच आमनंतीतिप्रमाणत्वोल्लेखान्नार्थमात्रंतत्रेतिवाच्यं तथोल्लेखस्यात्रापिश्रुतिमृगितपदइत्यनेनशक्यवच
नत्वात्भणितपदइतिग्रंथकर्त्रभिमतपाठांतरेस्तुश्रुतिभिर्भणितानिपदानिविश्वोद्भवनादिव्यवसायायस्येतितदर्थेनस्पष्टमेव
प्रकृतेप्रमाणोपन्यासाच्च पदंशब्देचवाक्येचव्यवसायप्रदेशयोः पादताच्चिन्हयोःस्थानत्राणयोरंकवस्तुनोरितिमेदिनी नचा
चमत्कृतत्वान्नालंकारत्वं एतादृशनिरतिशयैश्वर्यशाल्यपिभक्तार्थंगुविप्रादुरासेतिचमत्कारसत्त्वात् अथेहपूर्णकामइत्या

**इच्छामात्रेणविश्वोद्भवभृतिहृतिकृद्भक्तकामप्रपूर्त्यैतन्वन्कीर्तिंतमोघ्नींश्रुतिमृगित**
**पदःपूर्णकामोदयार्द्रः॥ आविर्भूयव्रजेयोविहरतिजगतीभारहारापदेशात्सर्वेशोगो**
**पवेषःसभवतुशरणंनःसदानंदमूर्तिः ॥ १ ॥**

दीनांभक्तकामप्रपूर्त्यैइत्यादौसाभिप्रायत्वात्परिकरोप्यलंकारः लक्षणंत्वाहविश्वनाथपंचाननः उक्तिर्विशेषणैःसाभिप्रा
यैःपरिकरोमतइति किंचपूर्णकामइत्यादिविशेषणत्रयस्यक्रमेणभक्तकामप्रपूर्त्यादिकार्यत्रयेहेतुहेतुमद्भावेनान्दयादत्र
यथासंख्यालंकारोपि लक्षणंतुकुवलयानंदे यथासंख्यंक्रमेणैवक्रमिकाणांसमन्वयइति वामनादयस्त्वमुंक्रमिकालं
कारइतिव्याहरंति स्रग्धरावृत्तं लक्षणंतु म्रभ्नैर्यानांत्रयेणत्रिमुनियतियुतास्रग्धराकीर्तितेयं ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंप्रथमश्लोकेमाहात्म्यकथनपूर्वकंभजनीयस्वरूपमुक्तालीलानुसारेणभजनस्यासिद्धांतेसंमतत्वात् तद्वैशिष्ट्येनपुनर्नुवं
ति लतेति भक्तिमार्गेहरिसंरूपलीलाविशिष्टस्यैवभजनंपुराणादिषुप्रसिद्धं श्रूयतेचैतत्रसोवैसइत्यादौरसेषुचमुख्यः शृं
गारः कृष्णदैवतकश्चसइतितदनुसारेणेहनिरूपणं सचालम्बनोद्दीपनभेदेनद्विविधः तत्रालंबनंनिरूपयंति मुदेत्यादि
एतादृशंगिरिवरभृतंनौमीतिसंबंधः गिरिषुपर्वतेषुभगवद्रूपत्वादिनावरःश्रेष्ठोयोगोवर्धनः तंबिभर्तीतितथातं किंभूतंतं
ललितंमनोहरं इदंनायकस्वरूपमुक्तं पुनः किंभूतं गोपीनांवृंदैःसमूहैः सहनृत्यंवितन्वंतं सहार्थकशब्दयोगाभावेपिवृद्धो
यूनेतिज्ञापकात्सहार्थेतृतीया सत्त्वादिगुणभेदेनसमूहानामनेकविधत्वात्वृंदेबहुत्वं अनेनेहप्रायःपरकीयानायिकाभेदाः
संगृहीताः रासोत्सवेतावार्यमाणाः पतिभिरित्यादिनातथैवप्रतीतेः रसस्तुपरकीयायामेवेतिरसशास्त्रसिद्धांतः एताव
ताऽऽलंबनंदर्शितं तस्यनायिकानायकोभयरूपत्वात् यमालंब्यरसःप्रवर्त्ततइतितल्लक्षणात् तननेविशेषोगीतवाद्यपुरःसर
त्वरूपः तेननतौर्यत्रिकंसंगृहीतं एवमालंबनंनिरूप्यउद्दीपनंनिरूपयंतः क्रीडाधिकरणमाहुः वृंदारण्यइति वृंदावने कृष्णा

---

१ बाललीलायां वात्सल्यं रसः कौमारादि लीलायां हास्यादिः प्रौढलीलायां शृंगारादिरिति २ श्रीभागवतविष्णुपुराणादिपुराण पाद्म हरिवंशादिषु पंच-रात्र गौतमतंत्रादिषुच ३ भगवल्लीयांला यथार्थसरसत्वज्ञापनायैवेदमुपन्यस्तं नतु जीवैरेतावता स्वधर्म उलंघ्यः विनश्यत्याचरन्मौढ्या द्यथारुद्रोब्धिजंविषमिति भागवतोक्तेः ४ तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयमित्यमरः

॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कूलइतिपाठेतुयमुनातीरइत्यर्थः किंभूते तस्मिन् लतेत्यादि लतानांवल्लीनांव्रातैः समूहैः श्लिष्टाः आलिंगिताः भ्रमरकुलैश्चघुष्टाः झंकृताः अनेनकुसुमितत्वमभिव्यज्यते घुषिरविशब्दनेइतीण्निषेधः विशब्दनमभिप्रायाविष्करणं तद्भिन्नार्थइत्यर्थः तादृशाद्रुमवराः यस्मिन् तत्तथातस्मिन् वरपदंकुवृक्षव्यावर्तनाय बृहद्गामनपुराणेउत्तरखिल्येब्रह्मभृग्वादिसंवादे यत्रवृंदावनंनामवनंकामदुघैर्द्रुमैरित्यादौतथादर्शनात् अतएवशुभेनिर्दोषे ॥ अत्रवृक्षाणामनेकलतालिंगितत्वदर्शनेनभगवतोऽनेकस्त्रीसाहित्येनविलासेच्छोद्बोधः भ्रमरझंकृतत्वदर्शनेनवेणुगीतोद्बोधः मन्मनादिसाम्यस्फूर्तिश्चेतिद्योत्यते इदमु

लताव्रातश्लिष्टभ्रमरकुलघुष्टद्रुमवरेशुभेवृंदारण्येकलितमुरलीगीतवशगैः ॥
मुदागोपीवृंदैर्विविधरसभावोत्पुलकितैर्वितन्वंतंनृत्यंगिरिवरभृतंनौमिललितं ॥ २ ॥

द्दीपनं यदाहभरतः ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः उपवनगमनविहारैः शृंगाररसः समुद्भवतीति कृष्णाकूलइतिपाठेतुजलविहारादिलीलोपयोगिकमलमरालाद्युद्दीपकंचसंगृहीतंवेदितव्यं उक्तंचबृहद्गामनपुराणे तत्रैव यत्रामिमलपानीयाकालिंदीसरितांवरा रत्नबद्धोभयतटीहंसपद्मादिसंकुलेति कीदृशैर्गोपीवृंदैः कलितेति कलितंभगवताकृतंयन्मुरल्याकरणभूतयागीतंगानं भावेक्तः तद्वशगैः तथा विविधेति क्रीडारंभानंतरंचाविविधाः संचारिसात्विकादिभेदेनाऽने

१ सुरते कर्णदेशेषु यच्च देशीयभाषया । दंपत्योर्जल्पितं मंदं मन्मनं तद्विदुर्बुधा इति हारावली

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कविधारसस्यशृंगारस्यपयेभावास्तैरुत्पुलकितानि उद्भूतरोमांचानितैः तारकादित्वादितच् अथेहश्लोकेपरोढपरकीयाना
यिकाः सर्वसाधारणस्नेहत्वाद्दक्षिणोनायकः अत्रप्रथमचरणेप्रस्तुतलतादिवर्णनेनप्रस्तुतस्यवृत्तांतांतरस्यस्फोरणात्प्रस्तु
तांकुरोऽलंकारः लक्षणंतुकुवलयानंदे प्रस्तुतेनप्रस्तुतस्यद्योतनेप्रस्तुतांकुरइति नचवेणुशब्दाहूतानेकस्त्रीभिःसहक्रीडन
स्याग्रेकंठरवेणवर्णनेनव्यंग्यत्वाभावान्नेहसोऽलंकारइतिशंक्यं कोशद्वंद्वमियंदधातिनलिनीकादंबचंचूक्षतंधत्तेचूतलतान
वंकिसलयंपुंस्कोकिलास्वादितं इत्याकर्ण्यमिथः सखीजनवचः सादीर्घिकायास्तटे चैलांतेनतिरोदधेस्तनतटंबिंबाधरंपा
णिनेत्यत्रव्यंजनीयार्थस्यकविनैवाविष्कारेपिअप्पयदीक्षितादिभिस्तत्रप्रस्तुतांकुरांगीकारात् उक्तंचध्वनिकृता शब्दार्थ
शक्त्याक्षिप्तोपिव्यंग्योर्थःकविनापुनः यत्राविष्क्रियतेस्वोक्त्यासान्यैवालंकृतिर्ध्वनेरिति दंडीत्विमांसमासोक्तिव्याजहार
यथाह वस्तुकिंचिदभिप्रेत्यततुल्यान्यस्यवस्तुनः उक्तिःसंक्षेपरूपत्वात्सासमासोक्तिरिष्यतइति अथवृंदावनस्यऋद्ध्यति
शयवर्णनादुदात्तमप्यलंकारः लक्षणंतुकुवलयानंदे उदात्तमृद्धेश्चरितंश्लाघ्यंचान्योपलक्षणमिति इहशृंगारस्यप्रबंधप्रक्रां
तभक्तिरसांगत्वात् रसवानप्यलंकारः लक्षणंतुसाहित्यदर्पणे रसभावौतदाभासौभावस्यप्रशमस्तथा गुणीभूतत्वमायां
तियदालंकृतयस्तदा रसवत्प्रेयऊर्जस्विसमाहितमितिक्रमादिति शिखरिणीवृत्तं लक्षणंतु रसैरुद्रैश्छिन्नायमनसभला
गःशिखरिणीति ॥ २ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवंमंगलमाचर्य्यउपोद्घातमाहुः स्वास्यमिति तेनभगवतास्वस्यस्वंवा आस्यंमुखंभुविआचार्यरूपेणआविष्कृतंस्वधा म्निसदाप्रत्यक्षत्वाद्भुवीतिपदं तत्रप्रयोजनं स्वीयानांदैवजीवानांदोषयोगैरपराधसंबंधैः स्वस्माद्वियुक्तानांसंसारमोहनि वृत्तिपूर्वकं पुनःस्वसंयोगसमृद्ध्यर्थमिति स्वसंयोगेसमृद्धित्वारोपणाल्लौकिकानाकांक्षत्वंस्वसंयोगाधिकारिणांसूचितं ई दृशसमृद्धिसंपादनेस्वास्याविष्करणेचहेतुस्तुकृपैव कृपायांचस्वीयत्वंकारणं तथापिभक्तान्भजतेमहेश्वरइति श्रीभा गवतवाक्यात् अतएवगीतायामपिनवमाध्यायेभगवता समोहंसर्वभूतेषुनमेद्वेष्योऽस्तिनप्रियइति स्वस्यसर्वत्रसमत्व

**स्वास्यमाविष्कृतंतेनस्वीयानांकृपयाभुवि ॥ दोषयोगैर्वियुक्तानांस्वसंयोगसमृद्धये ॥ ३ ॥**

मुक्तापि येभजंतितुमांभक्त्यामयितेतेषुचाप्यहमिति तुशब्दोक्तिपूर्वकंभक्तेषुविशेषउक्तः अत्रास्याविष्करणस्वसंयुयोजयि षाकृपादीनांपूर्वपूर्वेउत्तरोत्तरस्यकारणत्वात् कारणमालालंकारः लक्षणंतुकाव्यप्रकाशे यथोत्तरंचेत्पूर्वस्यपूर्वस्यार्थस्यहे तुता तदाकारणमालास्यादिति सचेहव्यंग्यः अथवा असावुदेतिशीतांशुर्मानच्छेदायसुभ्रुवामितिवत् द्वितीयोहेतुभेद एवास्तु एवंचमुखमग्निरिद्धइत्यादिद्वितीयस्कंधादिवाक्येषुमुखस्याग्निरूपत्वाद्भगवन्मुखाग्निरूपाः श्रीमदाचार्याइतिफलि तंएतद्विषयेश्रौतपौराणिकादिप्रमाणानितु श्रुतिरहस्यचरित्रचिंतामण्यादौप्राक्तनैरेवोपन्यस्तानीत्यलमिहोल्लेखेन॥ ३ ॥

---

१ चिंतां प्रकृतसिद्धार्थां मुपोद्घातं विदुर्बुधाः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवंस्वरूपमुक्त्वा स्तुतिकरणंप्रतिजानते तस्येति यद्यप्यहमल्पबुद्धित्वात्ग्रंथकरणासमर्थस्तथापितस्यभगवन्मुखस्य अर्थाच्छ्रीमदाचार्याणां अनुकंपारूपैवएकंबलंसामर्थ्यंसाधनंवायस्यसतथा इदंस्तवकरणेहेतुगर्भंविशेषणं तदनुग्रहेणैव स्तुतिसामर्थ्यंस्यादितिभावः अनुग्रहःपुष्टिमार्गेनियामकइतिस्थितिरितिश्रीमदाचार्योक्तेः मुख्यंतस्यहिकारुण्यमितिभ क्तिमीमांसाद्वितीयाध्यायसूत्रात् यदायमनुगृण्हातिभगवानात्मभावितइत्यादिचतुर्थस्कंधादिवचनेभ्यश्चअल्पबुद्धीना मपिध्रुवादीनांकृपयैवहिस्तुतिसामर्थ्योद्भवःस्मर्यते पस्पर्शबालंकृपयाकपोले योंतःप्रविश्यममवाचमिमांप्रसुप्तामित्यादि श्रीभागवतादिवचनेषु तादृशोऽहंवागीशितुस्तस्यवास्तवंअतिशयोक्त्यनादिद्धं एतंबुद्ध्यासन्निधापितंस्तवंतन्वे आत्मने पदात्फलस्यमुख्यतयाआत्मगामित्वंसूचितं लौकिकवर्णनेमुखेचंद्रत्वाद्यारोपोवस्तुतस्तुचंद्रनिष्ठसर्वप्रकाशकत्वादिस र्वगुणाभावादधिकोक्तिरूपःसन्नवास्तवोभवति ईश्वराणांतु निरस्तसाम्यातिशयत्वात्तत्रतुल्योक्तिरेवनसंभवति कुत स्तरामतिशयोक्तिरतस्तत्स्तुतौवास्तवत्वंसुस्थं अत्रोपमानमाहुः दीपमित्यादि सर्वेषामेवदेवादीनांषोडशाद्युपचारैः पूजने धूपानंतरंप्रकाशार्थंदीपोभवतीति सूर्यस्यपूजनेपितथाकुर्वंति वस्तुतोविचारेतुसमग्रब्रह्मांडमंडलाखंडप्रकाशिचंडकिरण स्यस्वल्पतरप्रकाशत्वाद्दीपोनुपयुक्तः तथापिपूजांगत्वंपुष्णन्पूज्यस्यसंतोषमावहति एवमत्रापिसमग्रवाचामीशितुस्त

---

१ नतत्समश्चाभ्यधिकश्चदृश्यतइति श्वेताश्वतरश्रुतेः निरस्तसाम्यातिशयेन राधसेति भागवतद्वितीयस्कंधोक्तेश्च ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विषयेकर्तुमकर्तुमन्यथाकर्तुंचसमर्थस्यपरमस्याप्राकृतस्यमितार्थस्वल्पलौकिकवाग्रूपस्तवोऽपितथैव तथापिस्तव्यस्य परमकारुणिकत्वात्संतोषावहः स्यादेव स्तबकोपमेहालंकारः अनेकार्थस्य युग्मस्य सादृश्ये स्तबकोपमा श्रितोऽस्मि चरणौ विष्णोर्भृंगस्तामरसेयथेति चंद्रालोके तल्लक्षणोक्तेः तत्र यथा भृंगवक्कोरजपदयोश्च सादृश्यं तथात्रापि सूर्यवागी शयोर्दीपस्तवयोश्च साम्यमिति लक्षणसमन्वयः नच प्रतिवस्तूपमैवेयमस्तु वस्तुवस्तुप्रत्युपमेति व्युत्पादनादत्रच

तस्यानुकंपैकबलोहमेतं तन्वे स्तवं वास्तवमल्पबुद्धिः ॥
एनोविनष्ट्यै परमस्य तुष्ट्यै वागीशितुर्दीपमिवोष्णरश्मेः ॥४॥

तथादर्शनादिति वाच्यं इहवाक्यैक्यात् वाक्यभेदएव तत्संभवात् वाक्ययोरेकसामान्य इति कथनात् तथाच यत्रै कस्मिन्नेव वाक्ये उपमानोपमेयकोट्योर्यथाविवक्षं स्फुटमवयवसादृश्यं तत्र स्तबकोपमा यत्रतुसतिवाक्यभेदे तत् तच प्रतिवस्तूपमेति व्यवस्था ननुनेहप्रत्यंगसाम्यं उपमेयकोटावहमिति कर्तृपदस्योपादानादुपमानकोटौच पूजक इत्यादिरूपस्य तस्याऽग्रहणात् अतएव यथाविवक्षमित्यवोचाम अन्यथा जयदेवोदाहरणेऽपि उपमेयकोट्युपा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तविष्णुसरूपकस्य तटाकस्य उपमानकोटावनुपात्तत्वात्तत्राऽपि सा नस्यात् अर्थात्फलनेत्वत्रापि तुल्यमित्यलमप्रस
क्तानुप्रसक्त्या अथ सिद्धिः श्रोतृप्रवृत्तीनां संबंधकथनाद्यतः तस्मात्सर्वेषु शास्त्रेषु संबंधः पूर्वमुच्यते किमेवात्राभिधेयं
स्यादितिपृष्टस्तु केनचित् यदि तन्नोच्यते तस्मै फलशून्यंतु तद्भवेत् सर्वस्यैवहि शास्त्रस्य कर्मणो वापि कस्यचित्
यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यतइति बृहज्जातकमुहूर्ततत्वादिव्याख्योदाहृतनारदवचनैः प्रायेणोपोद्घातएव
विषयसंबंधप्रयोजनाधिकारिणः सर्वग्रंथेषूच्यंते इतोऽत्राप्येतच्चतुष्टयं वक्तव्यं तत्र तस्येतिपदेन श्रीमदाचार्याणां वि
षयत्वं स्तवमित्युक्त्या स्तव्यस्तावकभावः संबंधः तत्स्तवोविषयः प्रतिपाद्यप्रतिपादकभावः संबंधोवा प्रयोजनमाहुः
एनोविनष्टयै इत्यादि एनसां पापानां विशेषेण पुनरनुद्भवादिरूपेण नाशाय इदमवांतरप्रयोजनं मुख्यप्रयोजनंतु परम
स्य वागीशितुः तोषायेत्येव परमस्य भगवतोवा तुष्टयै नासत्यदस्रौ परमस्य नासे चरितं परमाद्भुतमित्यादौ तथा व्या
ख्यानात् परमो भगवान् तेन एतद्द्वयाकांक्षिणोऽधिकारिण इति स्वतः फलितं अत्र लताव्रातेत्यारभ्य गिरिवरभृतं
नौमि तेन स्वास्यमाविष्कृतं तस्य स्तवं तन्वे इति गृहीतमुक्तरीतिदर्शनादेकावलीचालंकारः लक्षणंतु कुवलयानंदे
गृहीतमुक्तरीत्यार्थश्रेणिरेकावली मतेति भिन्नश्लोकवर्तित्वंतु न बाधकं कुवलयानंदाद्युपन्यस्तेष्वेकावल्याक्षेपाद्युदाह
रणेषु तथा दर्शनात् इंद्रवज्रा वृत्तं स्यादिंद्रवज्रा यदि तौ जगौ गइति ॥ ४ ॥



For Private and Personal Use Only

एव प्रतिज्ञाय दैन्यातिशयात् प्रथमं चरणं ध्यायंति श्रीवल्लभेति श्रीवल्लभस्य पदमेवांभोजं कमलं मयूरव्यंसकादित्वात्समासः पदमंभोजमिवेत्युपमितं व्याघ्रादिभिरित्युपमितसमासोवा तत् कलये ध्यायामि ध्यानप्रयोजनं तापनुत्तये इति आधिदैविकादितान्निवृत्तयइत्यर्थः तापैश्चित्तास्वास्थ्ये स्तोत्रकरणासंभवात् सरसिजमपिशरीरे संसार्जितं सत् तापं हरत्येव अथ कमलस्य त्र्युच्छिन्नस्य तादृशी शोभा नभवति सरः स्थितस्यतु तत्तादृग्विकाससौरभादिना परमासेति

**श्रीवल्लभपदांभोजं सन्मानसविलास्यलं ॥ हंसाल्यामोदसंदायं कलये तापनुत्तये ॥ ५ ॥**

सरःस्थितिमाहुः संदिति अलं परिपूर्णं प्रेमरसपूरिते सत्पुरुषाणां मानसे हृदये विलासि पक्षे शैवलादिदोषराहित्यात्समीचीने मानसे देवसरोवरविशेषे विलासि मानसं सरसि स्वांत इतिमेदिनी अनेन दिव्यकमलत्वमुक्तं पुनः कीदृशं हंसानां निर्ह्लोभानां १नमन्नृपतिमंडलीत्यादिवर्णनसत्त्वान्नृपाणांवा याआलयः पंक्तयः ताभ्यः आमोदमानंदं संददातीति तथा तत् पक्षे हंसेभ्यो मरालेभ्योऽलिभ्यो भ्रमरेभ्यश्च आमोदौ आनंदसुगंधौ ददातीतितथा कर्मण्यण्

१ विद्वन्मंडनसमाप्तौ अखंडवरपंडितप्रसृतचंडपाखंडवाग्विखंडनसुचंडिमाधरणिमंडलाऽखंडलः ॥ नमन्नृपतिमंडलीमुकुटतांडवैर्मंडितः सपादनखमंडलः पितुरिहास्तु मे मंडनमिति विठ्ठलाचार्यैर्वर्णितमिति.

आतोयुक्चिण्कृतोरितियुक् उपसर्गपूर्वत्वादातोऽनुपसर्गेकइतिनकः हंसः स्यान्मानसौकसि निर्लोभनृपविष्ण्वर्कइति
आमोदोगंधहर्षयोरितिच मेदिनी इह पदांभोजमित्यत्र प्रथमसमासे अनुभयाभेदरूपकं विषयिभूतस्यांभोजस्याभेदेन
विषयस्य चरणस्य रक्तिममार्दवादिधर्मस्फोरणाया रंजनात् यथोक्तं कुवलयानंदे विषय्यभेदताद्रूप्यरंजनं विषयस्य
यत् रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिरिति तच्च श्लिष्टविशेषणकत्वाच्छ्लिष्टरूपकं भवति यथाह दंडी राजहं
सोपभोगार्हं भ्रमरप्रार्थ्यसौरभं सखि वक्त्रांबुजमिदं तवेति श्लिष्टरूपकमिति द्वितीयसमासेतु वाचकलुप्तोपमैव श्लि
ष्टविशेषणेषु धर्मानंगीकारेतु धर्मवाचकलुप्तास्तु इयमेव विशेषणयोः श्लिष्टत्वाच्छ्लेषोपमेति दंडिमतं यथाह सएव शि
शिरांशुप्रतिस्पर्धि श्रीमत्सुरभिगंधिचअंभोजमिव ते वक्त्रमितिश्लेषोपमा स्मृतेति हसालीतिविशेषणेतु शब्दश्लेषस्यापि
सत्वात्समानोपमापीह भवति उक्तंच तेनैव सरूपशब्दवाच्यत्वात्सासमानोपमा यथा बालेवोद्यानमालेयं सालकानन
शोभिनीति एतद्व्याख्याने अर्थश्लेषमूलकत्वे श्लेषोपमा पूर्वमुक्ता शब्दश्लेषमूलकत्वेतु समानोपमेत्यनयोर्भेद इति
प्रेमचंद्रः ममतु उपमानोपमेययोर्बालामाले इत्यादि सरूपवाच्यत्वएव समानोपमेति दंडयाशयः प्रतिभाति तथास
तीहश्लेषोपमैवास्तु श्रीवल्लभपदांभोजमित्यस्य श्रिया लक्ष्म्या वल्लभं प्रियं पदं स्थानं तादृशंच तदंभोजंचेति कर्म
धारयेण कमलपक्षेपि अर्थः संगच्छते तस्याः पद्मालयत्वात् तथासति प्रकृताप्रकृतयोः श्लेषोयं ॥ ५ ॥

एव चरणं ध्यात्वा साक्षाद्वंदंते वंदइतिद्वाभ्यां देवं क्रीडादिविशिष्टं श्रीवल्लभं वंदे नतु स्वयमेवैतद्विशिष्टः किंतु परानपि भावयतीत्याहुः मंदारमित्यादि भगवत्प्राप्तियोग्या जीवा दैवाः सर्वथा तदयोग्याश्चासुराः गीतादिषु द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एवचेत्यादौ प्रसिद्धाः दैवाः संतश्च ये देहिनो जाता आसुरवल्लौकिकदेहादिसंबंधं प्राप्ताः तेषामपि मंदारं कल्पद्रुमं तद्वन्मनोरथपूरकं किमुताप्राकृतदेहवतांतेषां सिंहो माणवक इत्यादौ क्रौर्यादिवैशिष्ट्यवत्त मंदारमित्यत्र यथेष्टदातृत्वं गौण्या बोध्यते नन्वासुरकल्पानां तेषां तत्स्वरूपज्ञानमेव नास्तीति कुतस्तादृशमनोरथाः

युग्मं ॥ वंदे श्रीवल्लभं देवं मंदारंदैवदेहिनां ॥ अज्ञानध्वांतभास्वंतं वागधीशं दयांबुधिं ॥ ६ ॥

कुतस्तरांच तत्पूरणमितिचेत्तत्राहुः अज्ञानेति अज्ञानं भगवद्विषयकं स्वस्वरूपविषयकंच[1] तदेव ध्वांतमंधकारः वस्त्वदर्शनहेतुत्वगतिभ्रंशकत्वादिधर्मसाम्यात् अंधकारोऽस्त्रियां ध्वांतमिति त्रिकांडी तद्विषये भास्वंतंसूर्यं सर्वतस्तन्निवारकमित्यर्थः पूर्ववद्गौणी। नन्वज्ञानंहि ज्ञानैकनाश्यं ज्ञानंच प्रमाणवस्तुपरतंत्रं[2] अतः कथं श्रीमदाचार्यैरेवनिवर्तयितुं शक्यमिति चेत्तत्राहुः वागिति भगवज्ज्ञाने शब्दप्रमाणमेव कारणं वाचांच सर्वासामेवायमधीश्वरोनियामकोऽतोनैतद्दुरुपपादमिति

१ जीवस्वरूपं २ प्रमाणंचक्षुरादि वस्तुघटादि प्रमाणशून्यस्यांधादेर्घटादिसत्त्वेपि ज्ञानानुदयात् चक्षुष्मतोपि खपुष्पाद्यनुपलंभाच्च ज्ञानस्योभयाधीनत्वं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भावः नन्वाप्तकामस्य तस्य एवंविधप्रयासे कोहेतुस्तत्राहुः दयेति दयाया अपारत्वद्योतनायांबुधिपदं ॥ ६ ॥ ॥
नन्वीश्वरेण स्वतएवैतत्साधयितुं शक्यं पुनरवतारेकिंप्रयोजनमित्यतआहुः रसायाइत्यादि भूमेर्द्वयं भूषणं मनोहरं
आभरणं शोभाकरमितियावत् ॥ रसाविश्वंभरास्थिरेतिभूमिपर्यायेष्वमरः ननु श्रीभागवताख्येन नामात्मकस्वरूपेणैव

**रसाया भूषणं त्द्वयमासुराणां विदूषणं ॥ हेतुमानंदसंपत्तेर्दोषविप्लोषपावकं ॥ ७ ॥**

भूमेर्भूषितत्वात् पुनारूपप्रकटनमप्रयोजनकमितिचेत्तत्राहुः आसुराणामिति आसुरप्रयुक्तानि मतान्यासुराणि विदूषण
मितिनंद्यादित्वात्ल्युः तथाच श्रीभागवतस्येदानीं विविधवादैर्व्याकुलीकृतत्वात् तद्वादनिरासपूर्वकं तस्य तात्त्विकार्थ
प्रकाशनं तद्द्वाराजगदुद्धरणंच स्वावतारैकसाध्यमितिभावः एवंचैतद् द्वयमवतारप्रयोजनं बोध्यं एवं बाधकनिरास

१ एतदर्थमेव तत्त्वार्थदीपादिग्रंथकृतिः २ भूमेर्मंडनं दुर्मतखंडनंच



For Private and Personal Use Only

पूर्वकं साधकसंपादने फलमाहुः हेतुमिति सृष्टिकाले जीवेष्वानंदस्तिरोहितः अ० १ पा० १ सू० १५ नेतरोनुपपत्ते रित्यादिब्रह्मसूत्रैस्तथा निर्णयात् स भगवद्भक्त्या पुनः संपद्यते रसꣳह्येवायं लब्ध्वाऽऽनंदी भवतीति श्रुतेः अ० २ पा० ३ सू० ३१ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगादितिसूत्राच्च ननु प्रतिबंधकदुरितसत्त्वात् कथं भजनसिद्धि स्तदभावेच कथमानंदाविर्भाव इत्यत आहुः दोषेति दोषाणां विप्लोषो दाहः तत्रपावकमग्निरूपं तेन पावित्र्योत्पा दकमितिवा एतेन दैवानां दोषनाशपूर्वकमानंदलाभः साध्यत्वेनोक्तः तादृशं वंदइति पूर्वेणान्वयः अत्र युग्मे अज्ञा ने ध्वांतत्वारोप आचार्यैसूर्यत्वारोपनिमित्तमित्याश्लिष्टविशेषणंपरंपरितंरूपकमलंकारः तच्च कल्पद्रुमसूर्यत्वाद्यनेका रोपान्मालारूपं उक्तंचसाहित्यदर्पणे रूपकंरूपितारोपाद्विषयेनिरपन्हवे तत्परंपरितं सांगं निरंगमितिच त्रिधा यस्य कस्यचिदारोपः परारोपणकारणं तत्परंपरितं श्लिष्टाश्लिष्टशब्दनिबंधनं प्रत्येकं केवलं मालारूपंचेति चतुर्विधमिति मंदारं देवदेहिनामित्यत्रतु खड्गः क्ष्मासौविदल्लइतिवत् परंपरितस्याप्येकदेशविवर्तित्वं ॥ एतदपि तत्रैव स्फुटं द्विती यश्लोके भूम्याभरणत्ववर्णनेन तच्छोभाकरत्वस्य गम्यमानत्वात्पर्यायोक्तं लक्षणंतु काव्यप्रकाशे पर्यायोक्तंविना वा च्यवाचकत्वेन वस्तु यदिति उक्तरीत्या समर्थनीये पूर्वपूर्वपदार्थै उत्तरोत्तरपदार्थस्यसमर्थकत्वात् विच्छितिविशेष शालि काव्यलिंगंच ॥ लक्षणंतु कुवलयानंदे समर्थनीयस्यार्थस्य काव्यलिंगसमर्थनमिति ॥ ७ ॥

एव स्वरूपं नत्वा त्रिभिरवतारकथां वदंत आद्येन सामान्यतो जन्माहुः श्रीमदिति स वल्लभद्विजपतिः वल्लभाख्यः ब्राह्मणपालकः तच्छ्रेष्ठ इतियावत् पक्षे वल्लभरूपश्चंद्रः द्विजराजः शशधर इत्यमरः आध्यात्मिकादितापत्रयात् त्राय तामित्यन्वयः शीतकिरणस्यापि तापनाशकत्वं प्रसिद्धं चंद्रेणतु दैहिक एव तापो निवर्त्यतइति तस्माद्व्यतिरेकोवा तापत्रैविध्यंतु आध्यात्मिकाधिभौतिकाधिदैविकभेदात् तत्र वातपित्तकफप्रकोपजन्यः शारीरश्चिताद्वेषविषादादिज न्यो मानसश्चाध्यात्मिकः आंतरोपायसाध्यनिवृत्तिकत्वात् अथ बाह्योपायसाध्योपरमो द्विविधः आधिभौतिकआधि दैविकश्च तत्र मनुष्यमृगसरीसृपादिजन्य आधिभौतिकः यक्षराक्षसपिशाचादिजन्य आधिदैविकइति विवेकः इद मेव दुःखत्रयाभिघाताज्जिज्ञासातदभिघातके हेतावित्यत्र वाचस्पतिमिश्रेण सांख्यतत्वकौमुद्यां व्याख्यातं अथ कोसौ द्विजपतिः यः श्रीमल्लक्ष्मणसिंधुतः अजनि प्रशस्ता श्रीर्यज्ञादिविषयिणी पक्षे मूर्तिमती लक्ष्मीश्च विद्यतेऽस्येति श्री मान् प्राशस्त्येमतुप् तादृशो यो लक्ष्मणभट्टएव गांभीर्यादिमत्त्वात्सिंधुरब्धिस्तस्मात्प्रादुरभूत् अथवा समुद्रपक्षे लक्ष्मण शब्दादेव लक्ष्मीवत्त्वं लक्ष्मीवान् लक्ष्मणः श्रील इत्यमरोक्तेः श्रीशब्दोऽत्रापि शोभापर्यायः इदं ताद्रूप्यरूपकं विरोधा भासेन व्यतिरेकं साधयंति दिशन्नित्यादिना यः दैवे देवसमूहे तस्यसमूहइत्यण् कारकाणां विवक्षाधीनत्वेन अधिकर

१ समुद्रपक्षे तस्यास्तत्कन्यात्वात् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णत्वविवक्षणात्सप्तमी आत्मरूपामृतं कलात्वेन स्वस्वरूपभूतां सुधां दिशन् ददपि पूर्णकलः सर्वदा षोडशकलासंपन्नः कलातु षोडशो भाग इत्यमरः लौकिकचंद्रस्तु कृष्णपक्षे देवैः कलासु पीयमानासु प्रत्यहं क्षीणकलएव भवतीति ततः श्लेषमूलकोव्यतिरेकः तस्य कलापानंतु प्रथमां पिबते वन्हिर्द्वितीयां पिबते रविरित्याद्यागमप्रसिद्धं वस्तुतस्तु देवे जात्यभिप्रायेणैकवचनं देवजीवेषु आत्मरूपामृतं आत्मनः स्वस्य भगवतोवा रूपं स्वरूपमेव अमृतं सुधा तां एतेनै क्यादिमोक्षसंग्रहः यद्वा आत्मनो हरेः रूपो लोकः तत्र यदमृतं तत्र स्थितिरूपो मोक्षः सालोक्याख्यस्तम् अथवा भगवतो रूपमिव रूपमाकारो यस्मिंस्तादृशं मोक्षं सारूप्याख्यं यद्वा आत्मना भगवतासह रूप ब्रह्मवद्युक्तसर्वका माशनादिव्यवहारो यस्मिंस्तादृशं मोक्षं सायुज्याख्यं दिशन् ददत् तथा पूर्णकलः चतुःषष्टिकलासंपन्नः सर्वावतार मूलभूतोवेतिविरोधपरिहारः रूपं स्वभावे सौंदर्ये ना लोकपशुशब्दयोः ग्रंथावृत्तौ नाटकादावाकारश्लोकयोरपीति मेदि नी अमृतं यज्ञशेषेतु सुधामोक्षाप्स्वयाचितइतिहैमः किंच यः कृष्णांतरः कृष्णं श्यामं अंतरं मध्यं यस्य तादृगपि कलंकरहितः लांछनशून्यः चंद्रस्तु श्यामांतरालत्वात्कलंकितएव प्रसिद्धइति ततोव्यतिरेकः वस्तुतस्तु कृष्णोभगवान् अंतरे अंतःकरणे यस्य स तथा कलंकेनापवादेन शून्यश्चेति विरोधपरिहारः कृष्णः काके पिके वर्णे विष्णाविति

---

१ सोऽश्नुते सर्वान्कामान्सह ब्रह्मणाविपश्चितेति ब्रह्मविदः परब्रह्मणासह कामाशनमुक्तं ॥ स्पष्टंचेदमानंदमयाधिकरणभाष्येफलाध्यायभाष्येच ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कलंकोंकापवादयोरितिच हैमः अंतरमवकाशावधिपरिधानांतर्धिभेदतादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येंतरात्मनिचे त्यमरः अपिच यः स्मृतोपि दोषोरुतमोभित् दोषेत्यव्ययं रात्रिपर्यायः रात्रिसंबंधि उरु बहुलं तमः अंधकारं भिन त्तीति तथा चंद्रस्तु स्वोदयेनैव रात्रितिमिरं हंति नतु स्वस्मृतिमात्रेणेति ततो व्यतिरेकः वस्तुतस्तु स्मृतिमात्रार्ति नाशनइति नामोक्तेः स्मृतमात्रोऽपि दोषेभ्यः कायिकादिभ्यः उत्थितं बहुलं तमः आच्छादकगुणविशेषं अज्ञानंवा

**श्रीमल्लक्ष्मणसिंधुतोऽजनि दिशन्नध्यात्मरूपामृतं दैवे पूर्णकलःकलंकरहितः कृष्णां**
**तरोऽपि स्मृतः ॥ यो दोषोरुतमोभिदच्युतरसांऽभोधिर्यतोऽहर्निशं भ्राजिष्णुर्भुवि**
**वल्लभद्विजपतिस्तापत्रयात् त्रायतां ॥ ८ ॥**

भिनत्तीति तथा दोषा रात्रौच तन्मुखइत्यव्ययमेदिनी तमो राहौ गुणे पापे ध्वांतइति हमः तमोगुणस्याच्छादकत्वं त्वाहुः सांख्याः सत्वं[1] लघुप्रकाशकमिष्टमुपष्टंभकं[2] चलंच रजः गुरुवरणकमेव[3] तमः प्रदीपवच्चार्थतो वृत्तिरिति अप रंच यतो यत्सकाशात् अच्युतरसांऽभोधिः न च्युतो रसो जलं यस्य सचासावंभोधिश्चेति तथा सः आसीदितिशेषः

१ लाघवंप्रकाशकत्वंच सत्वस्यधर्मः २ विरुद्धयोःसत्वतमसोरुपष्टंभकत्वं चलत्वंचरजसः ३ गौरवमाच्छादकत्वंचतमसः॥



For Private and Personal Use Only

चंद्रस्तु समुद्रादुत्पन्नो नतु समुद्रस्तस्मादिति भेदः वस्तुतस्तु अच्युतस्य भगवतो रसो भक्तिस्तद्रूपोंऽबोधिः अपारभक्ति रितियावत् अन्यच्च अहर्निशं अहनि रात्रौच भ्राजिष्णुर्दीप्तिशीलः चंद्रस्तु निशायामेव नत्वहनीति व्यतिरेकः किंच चंद्रस्तु अंबरे अयंतु भुवीत्यपिभेदः वर्तमानइतिशेषः भुविभ्राजिष्णुरितिवान्वयः अत्र लक्ष्मणासिंधुतइति रूपकं लक्ष णंतु काव्यादर्शे उपमैव तिरोभूतभेदारूपकमुच्यतइति तत्रापि विरुद्धरूपकमिदं चंद्रविरुद्धधर्मवर्णनात् उक्तंचालंका रशेखरे [1]विरुद्धंच समस्तंच व्यस्तं रूपकरूपकं श्लिष्टंच रूपकं तस्मात्संक्षेपात्पंचधा स्मृतमिति लक्षणमपि तत्रैव यत्रोपमानविरुद्धोऽर्थस्तद्विरुद्धमिति देवेभ्यः सुधादानरूपकारणसत्वेपि कलाक्षयाभावकथनाद्विशेषोक्तिः लक्षणंतु काव्य प्रकाशे विशेषोक्तिरखंडेषु कारणेषु [2]फलाऽवचइति इहकारणेष्विति बहुवचनमविवक्षितं त्वादि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपीति कुवलयानंदाद्युदाहरणेषु [3]तथाऽदर्शनात् इयंचानुक्तनिमित्ता क्षयाभावनिमित्ताकथनात् उक्तंच साहित्यद र्पणकृता सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधेति तथेत्युक्तानुक्तनिमित्तत्वादिति व्याख्यानं कृष्णांतरालत्वाऽक लंकित्वयोर्विरुद्धयोरेकाश्रयत्वनिरूपणाद्विरोधोप्यलंकारः उक्तंचालंकारशेखरे विरोधो द्विविधइत्युपक्रम्य द्वितीयस्तु यथा श्रुतेविरोधसंधानेऽपियत्राभिप्रेतमासाद्याविरोधः अयमेव विरोधाभासउच्यतइति अकारणादपिस्मरणात्तमोनाशरूपका

१ यथाविरुद्धानामपितैलवर्तिज्योतिषांसंहत्यप्रकाशकत्वं २ फलानुक्तिः ३ प्रकृते स्मरदीपज्वलनरूपकस्यैवस्नेहक्षयकारणस्योपादानदर्शनात् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्योद्भववर्णनाच्चतुर्थीविभावना ॥ उक्तंच कुवलयानंदे अकारणात्कार्यजन्मचतुर्थीस्याद्विभावनेति समुद्रजन्यादपि चंद्रा
त्समुद्रोत्पत्तिनिरूपणात् षष्ठीविभावना उक्तंच तत्रैव कार्यात्कारणजन्मापि दृष्टाकाचिद्विभावनेति ॥ अहर्निशं भ्राजि
ष्णुत्वादिना चंद्रादाधिक्यवर्णनात् व्यतिरेकोपि लक्षणंतु काव्यप्रकाशे उपमानाद्यदन्यस्य व्यतिरेकः सएव सइति

योबालो हरिविरहोत्थत्द्दघतापेभूयस्त्वादिवबहिरुद्गतेऽग्निचक्रे ॥
प्रैक्ष्यर्चिर्निचयइवेरितेजनैर्नो दग्धुंवा भुवि सपुनातु पावकोऽस्मान् ॥ ९ ॥

अन्यस्योपमेयस्य व्यतिरेकआधिक्यं तत्रोक्तचतुर्विंशतिभेदांतःपातित्वादस्यव्यतिरेकत्वंसुस्थं इमेचरूपकस्यांगभूताइत्यं
गांगिभावःसंकरः शार्दूलविक्रीडितंवृत्तं लक्षणंतु वृत्तरत्नाकरे सूर्याश्वैर्मसजस्तताः स गुरवः शार्दूलविक्रीडितं ॥ ८ ॥
इत्थंलक्ष्मणभट्टपुत्रत्वेउक्ते किंप्राकृतजनवदेवतदुत्पत्तिरित्याशंकायामाविर्भावप्रकारं द्वितीयेनाहुः यइति अत्राख्यायि

१ यशःपयोराशिरभूत्करकरकल्पतरोस्तवेत्यत्रेव २ व्यतिरेकोलंकारः ३ पूर्वोक्ताविरोधविशेषोक्त्यादयोत्रवल्लभद्विजपतिरितिरूपकस्यांगभूताः ४ द्वाद
शभिःसप्तभिश्चयतिः



For Private and Personal Use Only

कासंक्षेपस्तु श्रीमल्लक्ष्मणभट्टा आंध्रदेशेखंभंकाकरवारग्रामवासिनः शततमंसोमयज्ञंपरिसमाप्य पूर्ववृत्तांतानुसारेण स्वगृहे भगवदवतारंभाविनंजानंतः भगवंतं गर्भे प्रविष्टं विदित्वा स्वप्ने संजाततदाज्ञया सपत्नीका यात्रार्थं निर्गताः प्रयागतीर्थे स्नानदानादि विधाय ततो वाराणसींगतवंतः तत्रकंचित्कालंनीत्वायवनोपद्रवात्पुनःस्वजनपदंजिगमिषं तोमध्येमार्गंसुतंपत्नीगर्भंपरमपुण्येचंपारण्ये तत्रैवशमीशाखितलशरण्यंविधाय ततोनातिदूरेचौंडाख्यनिगमेनिगमय्य तां रजनीं निशम्यशांतोपद्रवांकाशींप्रभातेततएवप्रतिनिवृत्तायावत्तंदेवस्थलमायातास्तावत्सुतस्नेहातिशयात् विलोच नविगलदश्रुकलाकुलाजनयित्रीतत्रैवतरुतलेबहलर्वीतिहोत्रज्वालावलीवलीढाखिलदिशंमहत्कुंडमकरोन्नेत्रपात्रं तत्ररम माणंस्वशिशुकंच ततोवन्हिनावर्त्मानिवितीर्णेसाति तंसामोदंसमादायस्वोत्संगमंडयामास तदानींभगवदवतारचिन्हा न्यासन् सर्वाणीति पारंपरिकप्रबंधेभ्योऽवगम्यते तदेवदर्शयंति योबालइत्यादिना योऽग्नेश्चक्रेमंडलेबालःसन् शिशुत्वमा

---

१ लक्ष्मणभट्टात्पूर्वपुरुषगणनायां पंचमेन यज्ञनारायणभट्टेन क्रियमाणे सोमयागे अग्निकुंडात्स्वद्वंशे सोमयागशतकोत्तरं भगवदवतारोभवितेत्यशरीरवागासीत् अयमेवपूर्ववृत्तांतः ततो यज्ञनारायणेन द्वात्रिंशत्सोमयागाः कृताः तत्सुतेन गंगाधरभट्टेन अष्टाविंशतिः तत्सूनुना गणपतिभट्टेनत्रिंशत् तत्पुत्रेण वल्लभभट्टेन पंच तदात्मजनुषा लक्ष्मणभट्टेनच पंचेतिशतकं जातं ॥ २ गर्भवर्तिनो मम इहाऽवतारो न भविताऽतः काशीं सपत्नीको गच्छेत्येवंरूपया ॥
३ अथसर्वगुणोपेतःकालःपरमशोभनइत्यादि श्रीभागवतादिवचनोक्तानि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नुकुर्वन्सन् प्रेक्षि आविर्भावोत्तरं दृष्टः मातापितृभ्यामितिशेषः अग्निचक्रइत्यत्रविनापिप्रत्ययंपूर्वोत्तरपदयोर्वालोपोवाच्य इतिवार्तिकाद्भीमसेनोभीमइत्यादिवत् चक्रवालशब्दस्योत्तरपदलोपाच्चक्रशब्दोमंडलार्थः प्रेक्षीतिकर्मकर्तृप्रयोगोवा नतत्र चक्षुर्गच्छतीतितलवकारश्रुतेरीश्वरत्वेनादृश्योऽपिस्वयमेवादृश्यतेत्यर्थः सः पावकोऽप्राकृतमुखाग्निरूपः पाविव्यकर्तावा प्रकृतत्वाच्छ्रीवल्लभाख्यः अस्मान्सर्वानेवस्वीयान्पुनातु सिद्धांतरहस्यादिग्रंथप्रतिपादितपंचविधदोषरहितान्करोत्वि त्यर्थः तदानींस्वरूपमभितोमंडलीभूतेऽग्निचक्रेविषयेउत्प्रेक्षंते हरीत्यादि हरिविरहादुत्तिष्ठतीतितादृशे हृद्येहृदिभवेतापे भूयस्त्वाद्बहुलत्वाद्बहिरुद्गतइववर्तमानेइत्यर्थः अयंभावः सहिहरिःसर्वदुःखहर्ताअतस्तेनैवदुःखितोद्धरणायस्वस्यभूतलेऽ वतारेणनसाक्षाद्रूपस्यतस्याविरहात्तापोभवत्येव सचहृद्योहृदिभवः तापस्यमनोधर्मत्वात् शरीरावयवाच्चेतियत् रसो त्तरदलस्यमुख्यांगत्वेनमनोहरोवा तदानींबालत्वेनहृदयस्थलस्यात्यल्पत्वात्तापस्यचसर्वनित्यगुणाश्रयभगवद्वियोगोत्थ त्वेनभूयस्त्वादत्याधिक्याद्बहिरुद्गमनंसंभवाति अग्नेश्चतापकत्वेनतत्रमूर्तिमत्तादृशतापत्वमुत्प्रेक्ष्यते उत्थपदात्सहसैवाति प्रसृमरत्वंव्यज्यते पुरुषोऽप्युपविष्टःसंकुचितावयवोभवति उत्थितस्तुसहसैवविस्तीर्णावयवइति स्वाचार्याणांमुख्यत पाविरहानुभवार्थमेवावतीर्णत्वाद्युक्ततरमिदं अत्रतापस्यमूर्तत्वंनयुज्यते अगाधतरेतदंतःकरणेचतदमानंनघटतइत्यरु

१ अस्मानितिबहुवचनलभ्योर्थोयं ॥ २ सहजादेशकालोत्था लोकवेदानिरूपिताः संसर्गजाः स्पर्शजाश्चेतिपंच ॥

॥१३॥

ध्यापक्षांतरेणोत्प्रेक्षंते अर्चिरित्यादि वेतिपक्षांतरे भुविजनानांपुनःपुनर्जननेनाक्लिश्यतां एनःपापं जातित्वादेकवचनं तद्दग्धुं ईरितेप्रयुक्तेऽर्चिर्निचयेइव स्वाकिरणानांसमूहेइव सर्वतोदृश्यमानोग्निचक्रेप्रैक्षीतिसंबंधः स्वस्यपावकत्वात्पापिज नानांसर्वदिक्षुवर्तमानत्वाच्चतत्पापदाहायसर्वतःप्रेरितंस्वमयूखजालमेवंसमंतादग्निचक्रत्वेनप्रतीयायाकिमितिभावः आर्चि ष्मद्गृह्य्यज्वालाःपरितःप्रसरंत्येव अत्राग्निचक्रस्यमूर्तिमद्विरहतापत्वेनसर्वतोविसृत्वरस्वाकिरणजालत्वेनचसंभावनादुत्प्रे क्षालंकारः लक्षणंतुकाव्यप्रकाशे संभावनमथोत्प्रेक्षाप्रकृतेनसमेनयादिति उभयं[1]त्रइवेत्युत्प्रेक्षायां उक्तंचकाव्यादर्शेदंडिना मन्येशंकेध्रुवंप्रायोनूनमित्येवमादिभिः उत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोपितादृशइति ते[2]नैवाच्येयं वाच्याप्रतीयमानासाप्रथम द्विविधामता वाच्येवादिप्रयोगेस्यादप्रयोगेपरापुनरितिविश्वनाथपंचाननेनतद्द्वैविध्यवर्णनात् तत्राप्यग्निचक्ररूपेवस्तु निवस्त्वंतरत्वोत्प्रेक्षणाद्वस्तूत्प्रेक्षैषा अग्निचक्रस्यमूलएवउक्तत्वादुक्तास्पदासा संभावनास्यादुत्प्रेक्षावस्तुहेतुफलात्मना उक्तानुक्तास्पदाद्यात्रसिद्धासिद्धास्पदेपरेइतिकुवलयानंदोक्तेः अत्रपूर्वार्द्धेतापस्यबहिरुद्गमनेभूयस्त्वादितिहेतुः संगृहीतः उत्तरार्द्धेचपापनिवृत्तिरूपकार्येणसहअर्चिर्निचयप्रेरणरूपंतत्कारणमभिहितमितिउभयत्रोत्प्रेक्षांगभूतोहेत्वलंकारः लक्षणं तुकाव्यादर्शमालिन्यप्रोंछिन्यां आ[3]ग्नेयेसिषाधयिषितार्थस्यहेतुर्भवतिसाधकः कारकोज्ञापकइतिद्विधासोप्युपजायतइत्या

१ पूर्वोत्तरार्द्धयोः २ इवशब्दप्रयोगेण ३ अग्निपुराणे ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दि तत्रापिभूयस्त्वादितिकारकोहेतुः बर्हिरुद्गमाख्यांक्रियासाधकत्वात् ॥ हेत्वलंकारप्रकरणेप्रेमचंद्रादिभिस्तथैवोरीकारा
त्त्व ॥ भोजराजेनाप्युक्तं ॥ यःप्रवृत्तिंनिवृत्तिंचप्रयुक्तिंचांतराविशन् उदासीनोपियःकुर्यात्कारकंतंप्रचक्षतइति नचोत्त
रार्द्धेपंचम्यदर्शनाद्धेत्वलंकाराभावःशंक्यः कुवलयानंदे हेतोर्हेतुमतासार्द्धंवर्णनंहेतुरुच्यते ॥ असावुदेतिशीतांशुर्मानच्छे
दायसुभ्रुवामित्यत्रचंद्रिकायांहेतुमताकारणेनमानच्छेदःकार्यमितितत्सद्वैद्यनाथेनव्याख्यानात् ॥ इहापितत्तौल्यात् यत्तु
प्राञ्चोभामहादयोहेतोर्नालंकारत्वंमन्यंते यथाहुः हेतुश्चसूक्ष्मलेशौचनालंकारतयामताः समुदायाभिधेयस्यवक्रोक्त्यन
भिधानतइति मम्मटभट्टश्चेदमेवानुससार तत्तुभायः अभेदेनाभिधाहेतोर्हेतुर्हेतुमतासहेतिविश्वनाथप्रभृतिमतदूषणाभि
प्रायमितिनेहातिप्रसंगः अथबाल्येऽसंभवतोपिताद्दशतापस्यहरिविरहोत्थेतिविशेषणेनघटमानत्ववर्णनात्श्लेषोत्रगुणःश्ले
षोविघटमानार्थघटमानत्ववर्णनमितितल्लक्षणात् प्रहर्षिणीवृत्तं लक्षणंतु म्नौज्रौगास्त्रिदशयतिःप्रहर्षिणीयामिति ॥ १ ॥
आख्यायिकावशेषंसंगृण्हंति क्रीडंतामिति सःअप्राकृतः अलौकिकः पोतोबालःसंसाराब्धेर्नौकारूपोवापातु पोतःशिशौ
वहित्रेचेतिमेदिनी नौकापक्षेअप्राकृतइतिविशेषणंतुचेतनत्वेनव्यतिरेकबोधकं यत्तदोर्नित्यसंबंधात्सइतिलभ्यते एवम
ग्रेपिज्ञेयं कीदृशःसः यंबर्हिषोग्निश्चक्रवालेमंडलेक्रीडंतं बर्हिर्ज्योतिरुषर्बुधश्चदहनःस्याच्चित्रभानुःशुचिरित्यग्निपर्यायेषुहला
युधः चक्रवालंतुमंडलमित्यमरः तथाकंजेति कंजेकमलेइवनेत्रेयस्यतं धर्मवाचकलुप्तोपमेयं किंच नवेति नवःसजलो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घनोमेघःसइववपुर्यस्यतं पूर्वोक्तैवोपमा नवत्वंतुधर्मोनभवतिश्यामत्वस्यतत्वेनाभिप्रेतत्वात् उक्तंचकुवलयानंदे वर्ण्योपमानधर्माणामुपमावाचकस्यच एकद्वित्र्यनुपादानाद्भिन्नालुप्तोपमाष्टधेति दंडिमतेनात्वियंवस्तूपमापिभवति यथोक्तंतेनैव राजीवमिवतेवक्त्रंनेत्रेनीलोत्पलेइव इयंप्रतीयमानैकधर्मावस्तूपमैवसेति तथाकुटिलेति कुटिलाःप्रकृत्यावक्रायेकचाःकेशास्तैर्लसत् स्मेरंमंदहासयुक्तंचवक्त्रंमुखंयस्यतं त्रिपदोबहुव्रीहिः अर्थात्यन्मुखंबालस्वभावात्कुटिलाःकेशाः

क्रीडंतंकंजनेत्रंनवघनवपुषंबर्हिषश्चक्रवालेस्वंपादाब्जंधयंतंकुटिलकचलसत्स्मेरवक्त्रंविलोक्य ॥ यंमातादिव्यतूर्यैप्रणिनदतिमुदंवह्निदत्तायनांकेकृत्वालंप्रापपत्यास्नुतकुचकलशाऽप्राकृतःपातुपोतः ॥ १० ॥

आवृण्वंति स्मेरमित्यत्रनमिकंपीत्यादिनास्मिङोरः किंचस्वमात्मीयंपादाब्जंचरणरूपंकमलं आरुण्यादिधर्मसाम्यात् तद्धयंतं हस्ताभ्यामेकंचरणमुन्नमय्याकृष्यतदंगुष्ठंचूषंतमित्यर्थः अत्रविषयीभूतस्याब्जस्यस्वतोमनुष्याचूषणीयत्वेपिपदरूपविषयतादात्म्येनचूषणाख्यक्रियार्थत्वापादनात्परिणामोलंकारः लक्षणंतुचंद्रालोके परिणामःक्रियार्थश्चेद्विषयी

For Private and Personal Use Only

विषघात्मनेति माताइलंमागारुनाम्नीविलोक्यदिव्येदिविभवेतूर्येदेवसंबंधिनिवाद्येप्रणिनदतिसाति नेर्गदनदेत्यादिनाने र्णस्वं तादृशंयं अंकेउत्संगेकृत्वाचतत्रारोप्येतियावत् पत्यालक्ष्मणभट्टेन सहेतिशेषः अलमत्यर्थंमुदमानंदंप्राप किंभूता सा वन्हिदत्तायना वन्हिनादत्तमबनंमार्गौयस्यैसा प्रथमतोमात्रासर्वतोऽनलमवलोक्यसभयंसविचारंचस्थितंततोऽग्नि नामार्गौदत्तइतिग्रंथप्रसिद्धेः पुनःकीदृशी स्नुतौस्नेहातिशयाद्दुग्धप्रस्राविणौपृथुत्वेनकलशतादात्म्यमापन्नौकुचौयस्याः सा कलशशब्दात्पयःपूरितत्वमपिध्वन्यते अत्रांगिभूतःस्वभावोक्तिरलंकारः स्वाभाविकयोर्बालस्यचेष्टाधर्मयोर्वर्णनात् लक्षणंतुकाव्यप्रकाशे स्वभावोक्तिस्तुडिंभादेःस्वक्रियारूपवर्णनमिति स्वयोः स्वाभाविकयोः क्रियाचेष्टारूपंधर्मः तयो वर्णनमित्यर्थः दिव्यतूर्येप्रणिनदतीत्यनेन अतिमानुषसमृद्धिवर्णनात् उदात्तमप्यलंकारः लक्षणंतुसाहित्यदर्पणे लोका तिशयसम्पत्तेर्वर्णनोदात्तमुच्यतइति वन्हिदत्तायनेत्यनेनअनिष्टवारणादिष्टसिद्धेश्चसममप्यलंकारः उक्तंचकुवलयानंदेस मप्रकरणे विनानिष्टंचतत्सिद्धिर्यमर्थंकर्तुमुद्यमइति इहप्रतीयमानायाग्रंथकर्तुर्मातृचरणविषयकभक्तेराचार्यभक्त्यंगत्वा त्प्रेयोऽलंकारोपि लक्षणंत्वाह अलंकारदीपिकापरिशेषप्रकरणे आशाधरभट्टः भावस्यचापरांगत्वेप्रेयोऽलंकारईरितइति देवतागुरुविप्रादिविषयिणीरतिर्भावइतिप्राञ्चः उक्तलक्षणकं स्रग्धरावृत्तं ॥ १० ॥

एवंप्राकट्यमुक्तातत्कालेकृष्णावतारादिवत् देवास्तुष्टुवुरितिज्ञापयितुं गृहीतावतारंतंस्वयमपिनुवंति धर्मेतियुग्मामि दं उक्तंच द्वाभ्यांयुग्ममितिप्रोक्तं त्रिभिःश्लोकैर्विशेषकं कालापकंचतुर्भिः स्यात्तदूर्ध्वंकुलकंस्मृतमिति भगवदभेदबो धनायश्लेषेणतत्पक्षोऽप्यत्रसंगृह्यते श्रीवल्लभंआचार्यलक्ष्मीपतिंचनतोस्मि किंभूतं धर्मादिपुष्टयैकलितोगृहीतोऽव तारोयेनतं आदिशब्दाज्ज्ञानंभक्तिस्तदंगानिच तेनकांडत्रयार्थप्रवर्तकत्वमुक्तं पक्षांतरेऽपीदंतुल्यं यदायदाहिधर्मस्ये

**युग्मं ॥ धर्मादिपुष्ट्यैकलितावतारंद्विजेंद्रवंशप्रार्थितावतंसं ॥ यशोदयास्नेहभरैःश्रितंस**
**द्गव्याश्रयंदैवहितंव्रजस्थं ॥ ११ ॥**

त्यादिवाक्येभ्यः आदिशब्दादर्थकाममोक्षावा तथाचभक्तानांपुमर्थचतुष्टयंपोषितुमित्यर्थः तुमर्थाच्चभाववचनादिति चतुर्थी अथवाचार्यपक्षेधर्मादिसम्पन्नापुष्टिः पुष्टिमार्गस्तंप्रकाशयितुं शाकपार्थिवादिवत्समासः क्रियार्थोपपदस्यच कर्मणिस्थानिनइतिचतुर्थी इदंकलिकालतमश्छन्नेत्यादिनाप्रभुचरणैर्निरणायि किंच द्विजेंद्रस्यब्राह्मणमुख्यस्यप्रसं गाद्भरद्वाजमहर्षेः पक्षेचंद्रस्यच कुलेप्रार्थितावतंसं प्रसिद्धशिरोभूषणरूपं. पुंस्युत्तंसावतंसौतुकर्णपूरेचशेखरइत्यमरः

---

१ क्रयादेः सेट्कत्वादिट् १ श्रीवल्लभाचार्याणां भारद्वाजगोत्रोत्पन्नत्वादित्थंव्याख्यातं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपिच यशोदयास्नेहभरैः कीर्तिकरुणाहरिविषयकानुरागसमूहैः श्रितं पक्षेयशोदयानंदपत्न्याकर्याबालवात्सल्यभरैः
हेतुभिःश्रितं तथासद्रव्याश्रयं सत्यः प्रमाणभूताः पक्षेदुग्धादियुक्ताः याःगावोवेदादिवाचः पक्षेधेनवश्चतासामाश्रयंगोरत
ह्रितत्लुकीतिसमासांतष्टच् टित्वातङीप् गौःस्वर्गेवृषभेरश्मौवज्रेचंद्रमसिस्मृतः अर्जुनीनेत्रदिग्बाणभूवाग्वारिषुगौर्मतेति
विश्वःयद्वाभगवत्पक्षेगोर्विकारोगव्यंनवनीतादि गोपयसोरितियत् सतूनूत्नंगव्यं आश्रयातिभुंक्तइतितथातं किंच दैवहितं
दैवजीवेभ्यः पक्षेदैवायदेवसमूहायचहितं चतुर्थीतदर्थार्थबलिहितसुखरक्षितैरितिसमासः तथा व्रजस्थंउभयत्रव्रजेमा
थुरदेशविशेषेतिष्ठतीतितथातं यद्वाआचार्यपक्षेव्रजोब्राह्मणादिसमूहः सभेतियावत् गोष्ठाध्वनिवहाव्रजा इत्यमरः॥११॥
अन्यच्चप्रचंडानि अन्याशक्यखंडनानिमायाप्रतिपादकानियान्यासुराणिमतानि पक्षेप्रचंडशांबरीकाः प्रचंडदंभावा
निष्ठुरबुद्धयोवायेअसुरादैत्यास्तेषांखंडनंयस्मात्तं स्यान्मायाशांबरीक्रपा दंभोबुद्धिश्चेतिहैमःइतरच्च सतांवृंदस्यसा
धुजनसमूहस्य अवनंरक्षणं आनंदोहर्षश्चसमंताद्वृद्धिर्वातौकरोतीतितथातं पक्षे सति कालादिदोषरहिते वृंदावने
यआनंदस्तंकरोतीतितथातं॥ किंच कलाप्तं कलाभिश्चातुर्यैः सर्वकलनयावा पक्षेकलयास्वांशभूतेनबलदेवेन कले
नाव्यक्तमधुरमुरल्यादिस्वनेनवाआप्तंयुक्तं कलास्यान्मूलरैवृद्धौशिल्पादावंशमात्रके षोडशांशेचचंद्रस्यकलनाकाल
मानयोः कलंशुक्रेत्रिष्वजीर्णेनाव्योक्तमधुरध्वनावितिचमेदिनी परंच सत्सुमनोंचितं संतोयेसुमनसः पंडिताः पक्षेदे

For Private and Personal Use Only

वाश्चतैरंचितंपूजितं अथवासद्भिः कर्तृभिः सुमनसाशुद्धचेतसाकरणभूतेन पक्षेसुमनोभिः पुष्पैश्चपूजितं सुमनाः पु
ष्पमालत्योस्त्रिदशेकोविदेपिचेतिविश्वप्रकाशः अपिच गोपीशतोल्लासभृतं गोपीनांईशोभगवान्तस्यभावस्तत्तातयात
स्यावा उल्लासंबिभर्तिधारयतीतितथातं भगवदभिन्नमित्यर्थः वस्तुतः कृष्णएवेत्युक्तेः अथवाभगवतिगोपीशतायायउ
ल्लासः प्रतिपादनंतत्पोषकं गोपालतापनीयाद्यनुसारात्साक्षात्पुरुषोत्तमएवगोपीजनवल्लभोनतुमायिकाविग्रहादिमांस्तथे

**प्रचंडमायासुरखंडनंसद्वृंदावनानंदकृतंकलाप्तं ॥ श्रीवल्लभंसत्सुमनोंचितंचगोपीशतो**
**ल्लासभृतंनतोऽस्मि ॥ १२ ॥**

तिप्रतिपादकमित्यर्थः पक्षे गोपीशतानांयउल्लासःक्रीडातैःसहनृत्यंवात त्पोषकं तत्कर्तृकोल्लासेनभृतंपूरितंवा शतशब्दोऽने
कत्वंद्योतयाति अत्रप्रकृताप्रकृतयोःश्लेषोऽलंकारःलक्षणंतुकुवलयानंदे नानार्थसंश्रयःश्लेषोवर्ण्यावर्ण्योभयाश्रयइति तत्रा
पियशोदयास्नेहभरैरित्यादौसभंगश्लेषः द्विजेंद्रेत्यादौत्वर्थश्लेषइतिविवेकः उक्तंचदंडिना श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं
वचः तदभिन्नपदंभिन्नपदप्रायमितिद्विधेति अधिकप्रपंचोग्रंथविस्तरभयान्नाक्रियते युग्मस्यप्रथमचरणेहेतुरप्यलंकारः
असावुदेतिशीतांशुर्मानच्छेदायसुभ्रुवामितिवत् लक्षणंतुयोबालइतिश्लोकेदार्शितं प्रथितावतंसमित्यत्रकेवलपरंपरितरूप

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कंलक्षणंतु मंदारंदैवदेहिनामित्यत्रावादि अत्रयुग्मेप्रथमश्लोकेइन्द्रवज्रावृत्तंलक्षणंतूक्तं द्वितीयेतुइंद्रवज्रोपेंद्रवज्रयोरुपजा
तिः अनंतरोदीरितलक्ष्मभाजौपादौयदीयावुपजातयस्ताइतितल्लक्षणात् ॥ १२॥ अध्ययनचरित्रमाहुः गुर्वीति चंपारण्येऽ
ग्निकुंडात्प्राकथ्यानंतरंपुत्रमादायकाशींगतैर्लक्ष्मणभट्टैःपंचमेऽब्दउपनयनंविधायाध्ययनायप्रेषितःसः पुष्यार्कयुक्तादाषाढ
शुक्लद्वितीयादिनादारभ्याधीयानःसर्वंपठित्वाकार्तिकपूर्णिमायांगुरुदक्षिणामदात् इतिकथा तदेवोच्यते गुर्वित्यादिना वागी
शत्वेन कृत्स्नस्य समग्रस्यज्ञातापि अतएवसकलगुरुः सर्वेषांगुरुरपि अथवाकलासहितेषुमहान् बृहस्पतिरूपोवातादृशो
पि गुरुर्निषेकादिकृत्पित्रादौसुरमंत्रिणि दुर्जराऽलघुनोःप्रोक्तोगुरुर्महतिचान्यवदितिविश्वः गुरोरध्यापकस्यनिलयेगृ
हेनिवासमकार्षीत् ब्रह्मचर्येणनितरांस्थितिंकृतवानन्यथाकृष्णःसांदीपिनेर्गृहे तत्रस्वस्याध्ययनंतुनप्रयोजनं किंतु मत्स
दृशानांशासनमेवयद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्ततेइतिगीतोक्त्यनुसारात् शासनाये
तितुमर्थाच्चभाववचनादितिचतुर्थी मादृशानूशासितुमित्यर्थः गुरुगृहनिवासेशासनातिरिक्तप्रयोजनस्याभावमेवसमर्थयंति ॥१७॥
जलेत्यादि यद्यस्मात्कारणात्सः जलनिधिसदृशीः अपारत्वात्समुद्रसमानाः अतएवदुस्तराःदुरधिगमाः रत्नसंख्याः
सन्निकर्षात्सागरोत्पन्नानांरत्नानां संख्येवसंख्यायासांताः चतुर्दशेतियावत् जलनिधिमितैश्चतुर्भिः पूर्वादिदिक्संबंधभे

१ श्रीविट्ठलभाचार्यकर्तृकेगुरुकुलवासे.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देनसमुद्राणांचातुर्विध्यात् मासैः अपवर्गैतृतीयेतितृतीया निस्ततार तत्पारंगतवानित्यर्थः यादिमनुष्यवदध्ययनमेवप्रयो जनंभवेत् तदैतावताकालेननतत्सिध्येदितिभावः चतुर्दशविद्यास्तु पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः स्थानानिविद्यानांधर्मस्यचचतुर्दशेत्याहयाज्ञवल्क्यः मनुरपि अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः पुराणंधर्मशा स्त्रंचविद्याएताश्चतुर्दशेति अत्रशासनरूपकार्येणसहनिवासरूपकारणाभिधानादुक्तलक्षणकोहेतुरलंकारः सकलेत्यादिवि

**गुरुनिलयनिवासंमादृशांशासनायसकलगुरुरकार्षीत्कृष्णवत्कृत्स्नवेत्ता जलनिधिसदृशी**
**र्यद्रत्नसंख्याःसविद्याजलनिधिमितमासैर्दुस्तरानिस्ततार ॥ १३ ॥**

शेषणानांसाभिप्रायत्वात्परिकरोपि लक्षणंतुकाव्यप्रकाशे विशेषणैर्यत्साकूतैरुक्तिःपरिकरस्तुसइति उक्तातिरिक्तप्रयोज नाभावस्योत्तरार्द्धेसमर्थनात्काव्यलिंगमप्यलंकारः समर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनामितिकुवलयानंदेतल्लक्षणात् तत्रापिवाक्यार्थहेतुकोऽयं साहित्यदर्पणादिषुहेतोर्वाक्यपदार्थत्वेकाव्यलिंगंनिगद्यतइतिवाक्यार्थपदार्थहेतुकत्वेनतद् द्वैविध्यनिरूपणात् मालिनीवृत्तं लक्षणंतु ननमयययुतेयंमालिनीभोगिलोकैरिति ॥ १३ ॥

१ अष्टभिःसप्तभिश्चयतिः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमध्ययनकार्यमुक्त्वातादृशंनमंति दैवोति दैवानामुत्धृतिरुद्धारः संसारविच्छेदपूर्वकभगवत्साक्षात्काररूपः सैवथाकृतिः कर्मतत्रकृतिनंकुशलं कृतीकुशलइत्यपीतितिकांडी नन्वासुरकल्पानांतेषांकथमुद्धारस्तत्राहुः हरीत्यादि हरौरतिः प्रीतिः भक्तिरितियावत् भक्तिमीमांसायां अ. १ सू.२ सापरानुरक्तिरीश्वरइतितल्लक्षणसूत्रेशांडिल्येनानुरक्तित्वोपपादनात् मति श्वमाहात्म्यबोधकतयातदुपकारकमंगभूतंज्ञानं तेउभेददातीतितथातं एवंचयेगुरूपदेशातशास्त्रानुसारेणज्ञात्वातंभजंते

**दैवोत्धृतिकृतिनंहरिरतिमतिदंगतंश्रुतस्यांतं ॥ वाक्पतिमुत्पथकदनंश्रेयःसदनंन मामिविधुवदनं ॥ १४ ॥**

तेषांसर्वांतरायान्सस्वयमेवहराति हरित्वात् तथाचोत्धृतिःसुकरैवेतिभावः उक्तंचपंचरात्रे माहात्म्यज्ञानपूर्वस्तुसुदृढःसर्वतोऽधिकः स्नेहोभक्तिरितिप्रोक्तस्तयामुक्तिर्नचान्यथेति [1]स्मर्यतेचेदं भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययमित्यादिना अत्रज्ञात्वेतिक्त्वाप्रत्ययेनज्ञानस्यपूर्वकालिकत्वंद्योत्यते अतएवभक्तिमीमांसायां अ. १ सू. २६ ब्रह्मकांडंतुभक्तौतस्यानज्ञानायसामान्यादितिसूत्र्यते तस्माज्ज्ञानस्यभक्त्यंगत्वंनिर्विवादं [2]ज्ञानेप्रयासमुदपास्येति श्रेयःसृतिंभक्तिमुदस्येत्या

१ गीतारूपस्मृत्योच्यते २ इदंवाक्यद्वयं भागवतदशमस्कंधीय ब्रह्मस्तुतिस्थम



For Private and Personal Use Only

दौकेवलस्यनिंदाश्रवणादफलितभक्तिकस्यतस्यानुपयोगश्चेतिकृतमप्रकृतप्रपंचेनन तस्माद्भयदानमत्रोक्तं तत्राप्य
भ्यर्हितत्वात्प्रथमतोरतिरुक्ता नन्वेतयोर्विवेचनमेवदुष्करंकुतस्तरांतद्दानमित्यतआहुः गतमिति श्रुतस्यशास्त्रस्यांतं
पारंनिश्चयंवाप्राप्तं श्रुतमाकर्णिते शास्त्रेइतिमेदिनी अंतःस्वरूपेनिकटेप्रांतेनिश्चयनाशयोरित्यभिधानचिंतामणिः इदम
नुपदमेवोक्तंचतुर्भिर्मासैरधीतमिति एवंसतितेसुशक्याविवेकेभविष्यतएवेत्याशयः नन्वेतदप्यशक्यं यत्प्रथमतएवा
पारस्यपुनरनेकऋषिमतभेदेनाशक्यनिश्चयस्यशास्त्रस्यांतप्राप्तिरितीत्याशंक्याहुः वाक्पतिमिति वाचांपतिंनियामकं
अतउक्तंयुक्तं यस्मात्साध्वीस्वभावमितिवल्लभाष्टकेप्रभुचरणोक्तप्रकारात् श्रूयतेचेदमृग्वेदे उतत्वःपश्यन्नददर्शवाच
मुतत्वःशृण्वन्नशृणोत्येनां उतोत्वस्मैतन्वांविसस्रेजायेवपत्यउशतीसुवासाइति अत्रत्वशब्दोऽन्यवाची उतशब्दोपिश
ब्दार्थेउतोइतिनिपातसमाहारइतिपस्पशान्हिकव्याख्यानेकैयटः तथाचायमर्थः त्वोऽन्योजीवः वाचंपश्यन्नपिनपश्य
ति अन्यःशृण्वन्नपिनशृणोति त्वस्मै जीवेभ्योऽन्यस्मै अप्राकृताग्रयएव वाक्तन्वांस्वरूपंविसस्रेविस्तारितवती तस्ये
श्वरमुखत्वेनसर्ववाङ्नियामकत्वात् यथोशतीपातिव्रत्यमनोहरासुवासास्सुवस्त्रास्त्रीभर्तुरेवाग्रेस्वरूपंप्रकाशयति नचमहा
भाष्यकृताशब्दानुशासनगौणप्रयोजनकथने अस्याः श्रुतेर्व्याकरणपरत्वेनव्याख्यानान्नायमेतच्छ्रुत्यर्थइतिशंक्यं सर्वं

---

१भक्तिरहितस्य ज्ञानस्य २ अंतशब्दस्यपारार्थकत्वेतत्प्राप्त्यभावपारस्येतिबाधकंनिश्चयार्थकत्वेचअशक्यनिश्चयस्येति ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रश्रुतेरनेकार्थत्वांगीकारात् अतएवचत्वारिशृंगेतिश्रुतिःशब्दशास्त्रपरत्वेनव्याख्यातामहाभाष्ये यास्केनत्वाग्निपरत्वेन पूर्वोक्तश्रुतेरपिनिरुक्तेऽन्यथाव्याख्यानंदृश्यते तत्त्वस्मदुक्तानुगुणमेव नन्वेवमपिमतांतरसत्त्वेसर्वजनीनःप्रत्ययःकथंभवेदितिचेदत्राहुः उत्पथेति उत्पथाअसन्मार्गास्तेषांकदनंयस्मात्तं एवंकरणात्फलितमाहुः श्रेयइति श्रेयसःकल्याणस्यसदनंगृहमाश्रयमितियावत् अतःसर्वेषांश्रेयोभविष्यतीतिफलितं विशेष्यस्वरूपमाहुः विधिवाति विधोर्भगवतोवदनंमुखंतद्रूपं तेनाग्नित्वाद्वाक्पतित्वमपिसमर्थितंबोध्यं अतोनकाप्यनुपपत्तिरित्यर्थः यद्वाभगवतोवदनमिववदनंवचनंयस्यतं तेन[1] यथागीतादिनासर्वश्रुतिसिद्धांतोदर्शितस्तथानेनापितत्त्वदीपादिनेतिभावः अथवा विधुश्चंद्रइवमुखंयस्यतं तेनदर्शनात्तापहानिःसुलभेतिभावः विधुःशशांकेकर्पूरेत्दर्षीकेशेपीतिविश्वः तादृशमाचार्य[2]नमामीतिसंबंधः अत्रापिकाव्यलिंगमलंकारः विशेषणगर्भीकृतैर्हेतुभिःपूर्वपूर्वार्थसमर्थनदर्शनात् सचानेकपदार्थहेतुकःउक्तंचकाव्यप्रकाशे काव्यलिंगंहेतोर्वाक्यपदार्थतेति एतद्व्याख्यायां हेतोर्वाक्यार्थतापदार्थताचेत्यर्थः अंत्याप्येकानेकपदार्थत्वेनद्विधा एवंत्रिविधामितिकमलाकरभट्टः तत्रापिपूर्वपूर्वविशेषणार्थस्योत्तरोत्तरविशेषणार्थैःसमर्थनदर्शनात्कारणमालाध्वनिगर्भतयाविच्छित्तिविशेषशाल्ययं कदनंसदनमित्यादौछेकानुप्रासःशब्दालंकारः लक्षणंतुचंद्रालोके स्वरव्यंजनसंदोहव्यूहाऽमंदोहदोहदा गौर्जगज्जाग्रदुत्सेकाछेकानु

१ श्रीकृष्णेन. २ श्रीमदाचार्येणापि.

For Private and Personal Use Only

भासभासुरेति गीतिरार्यावृत्तं लक्षणंत्वाहकालिदासः आर्यापूर्वार्द्धसमंद्वितीयमपिभवतियत्रहंसगते छंदोविदस्तदानीं गीतिंतामममृतवाणिभाषंतइति ॥ १४ ॥ एवमवरतामध्ययनंचोक्तातत्रमुख्यंप्रयोजनमाहुः विलोक्येति विभुं सर्वकरणेसमर्थंतंवल्लभंनिरंतरंउपास्महे भजामहइत्यर्थः तं कं यः ग्रसदिति ग्रसंतः अधर्मरूपायेन क्रामकराः तेषामाकरेउत्पत्तिस्थानेनक्रामतीतिनक्रइतिनामव्युत्पत्त्यातत्त्वारोपेण अधर्माणामपिनैश्चल्यंसूच्यते

**विलोक्यकलिसागरेग्रसदधर्मनक्राऽऽकरे पतज्जननिमज्जनंकरुणयावतीर्णःक्षितौ ॥**
**तदुत्तरणकारणंचरणभक्तिसेतुंहरेरचीक्लृपदुपास्महेतमनिशंविभुंवल्लभम् ॥ १५ ॥**

अधर्माणांबहुत्वंतुकायिकादिभेदात् तादृशेकलियुगरूपेसागरे दुस्तरत्वादिधर्मसाम्यात्कलौसमुद्रत्वारोपः पतदिति पततांनौकादिस्थानापन्नात्स्वधर्मात्च्यवमानानांजनानांनितरांतलपर्यंतमज्जनंविलोक्यस्वाभाविकधर्मभूतयाकृपयाक्षितौभूमाववतीर्णःसन्तस्यसमुद्रस्यउत्तरणेकारणंहेतुंहरेश्वरणभक्तिरूपसेतुं अचीक्लृपत्रचितवान् ण्यंतस्यकृपू सामर्थ्येइत्यस्यलुङिरूपं अनादिसिद्धंभक्तिमार्गंआविष्कृतवानित्यर्थः एकादशस्कंधेद्वितीयाध्याये येवैभगवता प्रोक्तात्युपायाआत्मलब्धये अंजःपुंसामविदुषांविद्धिभागवतान्हितान् यानास्थायनरोराजन्नप्रमाद्येत कर्हिचित्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धावन्निमील्यवानेत्रे नस्खलेन्नपतेदिह इत्याद्युक्तानेकधर्मसाम्याद्भगवन्मार्गेसेतुत्वारोपः यद्यपिपदार्थःपदार्थैनान्वेतिनतुपदार्थैकदेशेनेतिन्यायात्पदैकदेशेनचरणेंनहेरेरित्यस्यसंबंधोदुर्घटः तथापिदेवदत्तस्यगुरुकुलमित्यादिवन्नित्यसापेक्षत्वात्समासइत्यदोषः रूपकमलंकारः कलिप्रभृतिषुसागरत्वाद्यभेदरूपणात् लक्षणंत्वलंकारशेखरे तद्रूपकमभेदोयदुपमानोपमेययोरिति तत्रापिसविशेषणरूपकमिदं कलौसागरत्वारोपेतदाश्रिताऽधर्म्मादिषुनक्रत्वाद्यारोपात् उक्तंचदंडिना हरिपादःशिरोलग्नजन्हुकन्याजलांशुकः जयत्यसुरनिःशंकसुरानंदोत्सवध्वजः विशेषणसमग्रस्यरूपंकेतोर्यदीदृशंपादेतदर्पणादेतत्सविशेषणरूपकमिति पृथ्वीवृत्तं लक्षणंतु जसौजसयलावसुग्रहयतिश्चपृथ्वीगुरुः ॥ १५ ॥

अथाचार्यत्वप्राप्तिदिग्विजयादिचरित्राणिवक्तुमाहुः यइत्यादि श्रीमदाचार्यचरणाहिउक्तरीत्याधीत्यकानिचिद्वर्षाणिकाश्यां स्थित्वाततःसहमातापितृभ्यांप्रयातादाक्षिणयात्रांकुर्वंतोलक्ष्मणभट्टेषुशेषाद्रौव्यंकटेश्वरस्वरूपंप्रविष्टेषु विधेयं विधाय विद्यानगरंप्राप्ताः तत्रचिरप्रवृत्तेविवादयुद्धे मायावादिभिस्सर्वथापराजितान्शोकाब्धिमग्नान्वैष्णवाचार्यानसन्मार्गसमर्थनेनराजसदसिपुनरुद्धृत्यसर्वाचार्यैस्तिलककरणादिनार्पितमाचार्यत्वमूरीकृत्यसेवकीभूतेनतत्रत्यक्षितीशेनकृष्णदेवाख्येनकारितकनकाभिषेकास्तत्रैवमातृचरणान्मातुलगृहेस्थापयित्वाद्वादशाद्वर्षादारभ्यात्रिंशत्तमहायनावधिषड्भिः षड्भिर्वर्षैरेकै

१ अष्टभिर्नवभिश्चविरतिः २ अंत्येष्ट्यादिरूपंकर्त्तव्यम्. ३ विद्यानगरे.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमितित्रीन्दिग्विजयान्कृतवंतइतिकथासंदर्भः एतदेवाहुः योदक्षिणाशामित्यादिभिर्द्वादशभिः यइत्यस्यअग्रिमश्लोकवर्त्ति तच्छब्देनान्वयः यःदक्षिणाशांदक्षिणाख्यांदिशांप्राप्तोऽपिदुर्मतनिवृत्तिपूर्वकश्रुतिमतप्रवर्त्तनानुगुणकृतिरूपेणप्रकर्षेणआ गतोऽपिदक्षिणाशांअनाश्रितः तामनधिष्ठितइतिविरोधः परिहारस्तु दक्षिणाशांदक्षिणायाः यज्ञदानाद्यंगतयाब्राह्मणल भ्यस्यद्रव्यविशेषस्य आशां तृष्णां अनाश्रितः अप्राप्तः कृष्णदेवाख्यनरदेवेनदुर्वादिविजयानंतरंकनकाभिषेकंकारयित्वा

**योदक्षिणाशांप्राप्तोपिदक्षिणाशामनाश्रितः सभाजितोपिसर्वत्रतच्चित्रंनसभा जितः ॥ १६ ॥**

एतत्सुवर्णंग्राह्यमितिविज्ञापिताअपि स्नानांबुसदृशत्वान्नैतदस्माभिर्गृह्यतइत्यूचुःश्रीमदाचार्याः अनंतरंराज्ञाभिषेकसुव र्णंब्राह्मणेभ्योविभज्यदत्वापुनरपरस्मिन्सुवर्णमुद्राराशावुपायनत्वेनसमर्पितेसति द्रव्यस्यासुरत्वंदृष्ट्वादैवद्रविणभूताः स नैवमुद्रास्ततोगृहीताः श्रीहुताशनैरितिचरित्रस्यानुपदंनिरूपयिषितत्वाद्युक्तमेतत् दक्षिणः सरलाऽवामपरंच्छंदानुवृत्ति षु वाच्यवद्दक्षिणाऽवाचीयज्ञदानप्रतिष्ठयोरितिविश्वः आशाककुभितृष्णायामितिहैमः तथासभाजितोपिविद्यानगरेराजस

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाप्रवेशावसरेमहत्तरैरपितत्तन्मताचार्यसहितैर्व्यासतीर्थप्रभृतिभिःपंडितैः अभ्युत्थाननमस्कारादिनासत्कृतोपिनसभाजि तःतच्चित्रं आश्चर्यमित्यर्थः वस्तुतस्तुसभयाराजसंबंधिसदसानजितः सभालक्षितेभ्यस्तत्तत्पंडितेभ्यः पराजयमप्राप्तइ त्यर्थः यद्वाभासादीप्त्यासहितैःपंडितैर्नजितः अथवाभासासहितःसभाः तेजस्वीसःनजितः सर्वत्रेतिपदंमध्यमणिन्याया दुभयत्रान्वेति तथाचदिग्विजयेष्वपिसर्वदेशेषुपंडितैःसत्कृतोनतुक्वापिसभयापराजयंप्रापितइतिनिगर्वः आनंदनसभाज नेइत्यमरः विरोधाभासोऽलंकारः उपरिष्टाद्विरोधप्रतीतेः लक्षणंत्वाहजयदेवः श्लेषादिभिर्विरोधश्चेद्विरोधाभासइष्यत इति ॥ १६ ॥ अत्रकथाशेषस्तु दक्षिणदिशिकिष्किंधाप्रांतेषु इदानींबिजेनगरशब्देनप्रसिद्धेविद्यानगराख्ये ग्रामेपूर्वंकृष्णदेवोनामराजासीत् तस्यजगतिविविधवैदग्धीविशदानेकदृढतरमतदर्शनेनतात्त्विकवेदार्थानिश्चयात् तन्निर्णा यकचतुर्लक्षण्याअपिसर्वैराचार्यैर्महताप्रबंधेनस्वस्वानुगुणतयालापितत्वेनततोप्यनिश्चयात् कतमःखल्वेषांश्रुतिसंमतो ऽनादिसिद्धःसिद्धांतइत्यभूज्जिज्ञासाततस्तेनैतन्निश्चयायस्वस्वमतोपपादनेऽत्यंतसमर्थांस्तत्तदाचार्यान् तच्छिष्यभूतान् प्रबलतरपंडितांश्चैकीकृत्यप्रवर्तितंवादयुद्धं प्रतिज्ञातंच योऽत्रविजेष्यतेतंकनकेनाभिषिच्याहंतच्छिष्योभविष्यामीतित त्रवादसंगरप्रसंगे ब्रह्मणःसाकारत्वंजगतःसत्यत्वंजीवस्याणुत्वंभक्तेर्मुख्यसाधनत्वंफलरूपभक्तेर्मोक्षानंतरमपिसत्त्वंचे

१ मतानांमध्ये.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यादिवदंतोमाध्वरामानुजाद्यावैष्णवाचार्याएकतआसन् एकतश्चतद्विरुद्धमभ्युपगच्छंतोमायावादिनःशांकराद्याः एवं प्रचंडतरप्रमाणपरिबृढोद्दंडदृढयुक्तिसंघट्टैरन्योन्यविजिगीषयाविवदतांतेषामतीतेषुद्वादशसुवर्षेषु अवसानेग्राहग्रस्तगजवच्छैथिल्यमागच्छन्वैष्णवाचार्याः एतावतिव्यतिकरेश्रीमदाचार्याविद्यानगरंप्राप्तास्तत्रराज्ञोदानाध्यक्षस्यस्वमातुलस्यनिलयमाययुः ततस्तेनात्यंतंसत्कृत्यवार्ताप्रसंगेनोक्तं ईदृशेचिरात्प्रचलितेवादसमरेजितंशांकरैः पराजितंवैष्णवैः राजाचश्वोभूतेशांकरशिष्योभविष्यतीति एतदाकर्ण्योदीरितमाचार्यैः यदस्मिन्विषयेऽहमपिविवक्षुरस्मिसदसिकिंचिदिति अथमातुलेनभोजनार्थमुक्तेसति तस्यावैष्णवत्वात् शिवादिसर्वदेवेभ्योऽन्ननिवेदकत्वाच्चतत्पाकान्नभोजनमनभिलषंतोममायंनियमोयत्स्वहस्तपाचितमेवौदनादिकंभोक्तव्यमित्युक्तवंतः ततःकिंचित्कुपितेनतेनएवंसतिराज्ञः सभाप्रवेशादिकंदुर्लभमित्यादिविविधवचनपाषाणप्रवर्षणेविहितेऽपिनिरतिशयक्षमाश्रयतयाश्रीमदाचार्यैर्नकिंचिदवादि ततोऽर्द्धरात्रेश्रीगोवर्द्धनधरेणनिद्रापरतंत्रतयामीलितकमलकुड्मलललितविलोचनानपिश्रीमदाचार्यान्प्रतिबोध्य कुतोऽत्रापमानितैरपिस्थीयतेभवद्भिरित्युक्तेसतितदानीमेवतैःस्वसहवर्तिभिर्द्वित्रैःशिष्यैःसहततोनिर्गत्यग्रामाद्बहिः कस्यांचिद्वापिकायांयथो

१ वैष्णवस्याऽवैष्णवपक्वान्नभोजननिषेधात्शिवादिभुक्तान्नादनप्रतिषेधाच्चानिच्छंतः तादृशनिषेधवचनादिकंत्वेतट्टीकाकारेणगोवर्द्धनकविनाकृतसत्सिद्धांतमार्तंडेद्रष्टव्यम् ॥ २ स्वशब्दआत्मपरआत्मीयपरश्च.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चितंकालेसंध्यावंदनादिव्यधायि अथप्रातस्तस्मिन्दानाध्यक्षेपिराजद्वारेअद्यकश्चिन्नूत्नोब्राह्मणआगच्छेच्चेत्सनप्रवेश यितव्यइत्युक्त्वांतर्गतेसाति तावत्येवावसरेश्रीमदाचार्याअपिब्रह्मचर्योचितदंडमेखलादिसंभारभूषिताः कैशोर्येपिदुर्द्धर्षतर ब्रह्मवर्चसशालितयात्यंतसुंदरतयाचसर्वैः सादरंनेत्रचषकाभ्यांपेपीयमानरूपपीयूषानृपद्वारमागतवंतः ततस्तादृशस्वरू पनिरीक्षणाद्विस्मितेनद्वारपालेन निवेदितश्रीमदाचार्यप्रभावोराजाप्यागत्यसाष्टांगंप्रणिपत्यप्रकृतविषयेतत्वनिश्चयायप्रा

संवृत्तेवादयुद्धेपरिषदिनृपतेर्निश्चिकीर्षोर्मतानांप्रामाण्यंकृष्णवर्त्माश्रयविबुधचयेदु
र्मतस्थैःपरास्ते ॥ प्रायोमायोपलंभैरधिजलधितटंमोहगैरासुरैस्तंत्रातुंतत्रायतप्रा
क्हरिरिवकृपयानःसइष्टंप्रपूर्यात् ॥ १७ ॥

र्थनापुरःसरंसभांनीतवानित्यादिः तदेतत्सर्वंहृदिकृत्याहुः संवृत्तइतिद्वाभ्यां यःतंवैष्णवविबुधसमूहंकृपयात्रातुंसन्मार्ग स्थापनेनरक्षितुंतत्रनृपद्वारे आयतआगच्छत् आङ्पूर्वस्यअयगतावित्यस्यलङिरूपं सःश्रीवल्लभाख्यःनःइष्टंप्रपूर्यात् ॥२२॥ अस्माकंमनोभिलाषितं प्रकर्षेणपूरयत्वित्यर्थः प्रपूर्यादितिप्रपूर्वात्पृञ्पालनपूरणयोरित्यस्मादाशिषिलिङि उदोष्ठ्यपूर्व

For Private and Personal Use Only

स्येत्युक्ते हलिचेतिदीर्घेरूपं अथवापूरयतेश्चौरादिकस्यआशीर्लिङि णेरनिटीतिणिलोपेरूपं कस्मिन्सति नृपतेःकृष्णदेव नाम्नः परिषदिसभायां समज्यापरिषद्गोष्ठीत्यमरः संवृत्तेसम्यगुत्कटतयाप्रवृत्तेवादयुद्धेशास्त्रार्थवादरूपेसमरेविषये कृष्णेति कृष्णस्यभगवतोवर्त्ममार्गएवाश्रयोयस्यैवंभूते वैष्णवेइतियावत् विबुधचयेपंडितसमुदायेप्रायःबहुशःआसुरैःदेवप्रतिद्वंद्विजीवैःपरास्तेपराजितेसति कीदृशस्यनृपतेः मतानांविविधसिद्धांतानांप्रामाण्यंप्रमाणभावंप्रमाणशब्देमुखनासिकावचनोनुनासिकइत्यादिवद्बाहुलकात्कर्मणिल्युट् भावार्थकल्युडंतादर्शआद्यच्वा वेदादिप्रमितत्वमितियावत् अथवा प्रमीयतेभगवत्स्वरूपादिप्रमेयमनेनअत्रवेतिप्रमाणं करणाधिकरणयोश्चेतिल्युट् तद्भावंनिश्चिकीषोःनिश्चेतुमिच्छोः अत्रोपमानं प्राक् कृतयुगेसमुद्रमथनादमृतलाभोत्तरंअधिजलधितटं समुद्रतीरे अव्ययंविभक्तीत्यादिनासप्तम्यर्थेअव्ययीभावः वादयुद्धेविविधाक्षेपवादपूर्वकेरणेसम्यक्प्रवृत्तेसति तत्रचकृष्णेत्यादिकृष्णवर्त्माअग्निरेवहविःप्रापकत्वादाश्रयोयस्यैवंविधे अरयोपिहि संधेयाः सति कार्यार्थगौरवइत्यादिभगवदुपदिष्टनीतिमार्गाश्रितेवाविबुधचयेदेवसमूहेआसुरैः असुराणांदैत्यानांसमूहैः पराजितेपराभूतेसतितंदेवसमुदायंत्रातुंहरिरिवसर्वदुःखहर्ताभगवानिवेति कृपीटयोनिर्दमुनाः कृष्णवर्त्माशुशुक्षणिरितिहलायुधः कृष्णःकाकेपिकेवर्णे विष्णौव्यासेर्जुनेकलाविति हैमः अयनंवर्त्ममार्गाध्वपंथानःपदवी

१ मायावादिभिःपराजितानांत्राणायश्रीवल्लभाचार्याणामागमने ॥ २ इतिशब्दस्यइन्युपमानमितिपूर्वेणान्वयः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समाइत्यमरः विबुधोज्ञेसुरइतिमेदिनी उ[1]भयत्र कथंभूतैरासुरैर्दुर्मतस्थैःश्रुतिविरुद्धमतवार्तिभिः पक्षेआजन्मदुर्विचार प्रवृत्तैः पुनःकिंभूतैःमायोपलंभैःमायायाउपलंभोजगत्कारणतयांगीकारोयेषांतैः पक्षेमायानामनेकविधशांबरीणांउपलं भोयेभ्यस्तैः पुनःकीदृशैः मोहगैःदुर्मतसंबंधादेवपक्षेमद्यादिसंसर्गान्मोहिनीरूपस्यभगवतउद्योगाद्वामोहंप्राप्तैः श्लेषो पमालंकारः लक्षणंतुकाव्यादर्शे शिशिरांशुप्रतिस्पर्द्धिश्रीमत्सुरभिगंधिच अंभोजमिवतेवक्त्रमितिश्लेषोपमास्मृतेति वस्तुतस्तु श्रीमदाचार्याणामेवहरिरूपत्वादेकस्यैवकालभेदेनउपमानोपमेयभावाद्विचित्रेयं अथपरिषज्जलधितटयोरुप मानोपमेयभावादिहजयदेवोक्तास्तवकोपमापि स्रग्धरावृत्तं लक्षणंतूक्तं ॥ १७ ॥ एवंद्वारप्राप्तिमुक्त्वायदग्रेनिर्वृत्तंतदाहुः दृष्ट्वाविद्येति विद्यानगरपतिनाकृष्णदेवेनदृष्ट्वाताद्दशंदर्शनमात्रेणानुमीयमानातुलप्रभावंआचार्यस्वरूपंनिरीक्ष्यपादयोःवि ष्वपेमौलिरत्नैःमुकुटजटितमणिभिः स्पृष्ट्वासाष्टांगंप्रणिपत्येत्यर्थः मौलिःकिरीटेधम्मिल्लेचूडायामनपुंसकमितिमेदिनी कीदृ शैःरत्नैः स्फुटेत्यादि स्फुटाप्रसृमरायाश्रीमदाचार्यचरणनखानांरुक्कांतिःतयाआसमंताद्भातैः ॥ स्वनखकिरणेषुतत्कि रणमेलनेनद्विगुणंप्रदीप्तैः आरक्तैरितिपाठेतुतद्योगात्समंतादरुणीभूतैः एतेनाचार्याणांसौंदर्यातिशयोध्वनितः तथा आ

॥२३॥

१ आचार्यपक्षेहरिपक्षेच ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानींपूर्वोक्तद्विविधैविद्वद्धिष्ठितांस्वसभांनीत्वाप्रवेश्य ईशः सर्वसमर्थः श्रीमदाचार्यःकर्मभूतः उच्चैःस्वावेशि उच्चासने सुष्ठुआदरपूर्वकंउपवेशितः किंभूतेनराज्ञा हर्षितेन श्रीमदाचार्यैःस्वदर्शनादिनाहर्षप्रापितेन अथवासंजातहर्षेण तारका देराकृतिगणत्वादितच् कस्मिन्सति अभ्युत्थितेदर्शनमात्रेणसहसाकृताभ्युत्थाने तथा महसा श्रीमदाचार्यतेजसा क

**दृष्ट्वाविघानगरपतिनापादयोर्मौलिरत्नैः स्पृष्ट्वाऽऽभातैःस्फुटनखरुचाभ्युत्थितेसभ्यलोके॥**
**नीत्वास्थानींनमतिमहसाधर्षितेहर्षितेनस्वावेश्युच्चैःसरुचिरगुणः संसदुत्तंसईशः ॥ १८ ॥**

र्तृणाधर्षितेपरिभूतेसभ्यलोकेसभास्थविद्वद्वृंदे नमतिअभिवादयतिसति किंभूतः श्रीमदाचार्यः संसदुत्तंसः संसदः सभा याः शिरोभूषणरूपः अत्युच्चासनास्थितत्वेनसर्वविद्वद्भ्यउत्तमत्वेनसभाशोभाकरत्वेनचाशिरोभूषण तादात्म्यं सभासमिति संसदः आस्थानीक्लीबमास्थानमित्यमरः उत्तंसःकर्णपूरेपिशेखरेपिचनास्त्रियामितिमेदिनी उत्तंसत्वारोपेहेतुगर्भविशिं

---

१ आस्थीयतेस्यामित्यास्थानीशब्दस्ययौगिकार्थमप्यत्रानुसंधायैवंव्याख्यातं.   २ द्विविधाःवैष्णवामायावादिनश्च.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षान्ति रुचिरेति रुचिराःमनोज्ञाःगुणाःवैदुष्यसौशील्यादयोयस्यसतथा पक्षे रुचिराः शोभनाःधारणप्रीत्युत्पादकावागुणाः ग्रथनतंतवोयस्मिँस्तत्तथा गुणोज्यासूदतंतुषु रज्जौसत्वादौसंध्यादौशौर्यादौभीमइंद्रिये रूपादौचाऽप्रधानेचदोषान्यस्मिन्विशेषणइत्यभिधानचिंतामणिः रुचिरगुणाइत्यत्राश्लिष्टविशेषणमभेदरूपकम् इहसभ्याविद्वत्संभ्रमधर्षणादिकथनेन आचार्याणांमाहात्म्यातिशयवर्णनादुदात्तमप्यलंकारः लक्षणंत्वाहदंडी आशयस्यविभूतेर्वायन्महत्वमनुत्तमम् उदात्तनामतंप्राहुरलंकारंमनीषिणइतिनखकांत्यासर्वेषांमुकुटमणीनांरक्तत्ववर्णनात्तद्गुणोपि लक्षणंतुसाहित्यदर्पणे तद्गुणःस्वगुणत्यागादत्युत्कृष्टगुणग्रहइति मंदाक्रांतावृत्तम् लक्षणंतु मंदाक्रांताजलधिषडगैर्म्भौन्तौताद्गुरूचेत् ॥ १८ ॥

अथासनस्थितिकालेसाधारणसंभाषणश्रवणेनपरमतस्थानांविजयाशाप्रशममाहुः आचक्रमइति धीरः गजवन्मंदगामी सभाक्षोभादिरहितोवाअथवाधियंरातिददातीतितथास्वदर्शनमात्रेणराज्ञःसुबुध्युत्पादकइत्यर्थः सर्वत्रशास्त्रविषयेषुधियईरयतिप्रेरयतीतिवा अनेनप्रकृतविषयेयोग्यतादर्शिता यःचरणेनपादेनविष्टरमासनंतथावाचासामान्यतः प्रकृतानुरूपभाषणरूपयादुर्वादिनांवादबलंऊहापोहसामर्थ्यंचसमंसमकालमेवआचक्रमेआक्रांतवान्आसनेस्थितवान्सामर्थ्यंचहृतवानित्यर्थः किंभूतंविष्टरंबलंच धरेशाधिगतंधरेशात्राज्ञःसकाशात्अधिगतंप्राप्तं पक्षे धरेशेनराज्ञाआधिक्येनावगतं



---

१ रुचिंधारणादौप्रीतिंरांतिददतीतिव्युत्पत्तिमनुसंधाय धारणप्रीत्युत्पादकाइतिव्याख्यातं ॥

For Private and Personal Use Only

अपरिमिततयाबुद्धमितियावत् तथासमुन्नतंपरिमाणतःसम्यगुच्चं पक्षे अत्यूर्जितं अथवा आसनपक्षे अधरेशाधिअध राः अधमाः ईशाः उपास्यदेवताःयेषांतादृशानांक्षुद्रदेवोपासकानांवादिनांआधिः मानसीव्यथा यस्मात्तत्तथाइतिव्याधि करणोबहुव्रीहिः पुंस्याधिर्मानसीव्यथेत्यमरः वादिबलपक्षे धरेशाधिगतंपरस्परकलहाच्छास्त्रार्थसंशयोत्पादनेनधरेश स्यराज्ञोमानसीव्यथायतस्तादृशं पुनःउभयमपि कीदृशंसमुन्नतंगतं समुन्नतमितिभावेक्तः पक्षद्वयेपि उक्तरीतिकांसमुन्न

आचक्रमेयश्चरणेनविष्टरंधीरोधरेशाधिगतंसमुन्नतं ॥ दुर्वादिनांवादबलं
तथासमंवाचासदाचार्यहितंनमामितं ॥ ११ ॥

तिप्राप्तम् अथवावादबलपक्षे समुत्मुदाआनंदेनसहितंनतंगतंनमनंप्राप्तंवादिनामानंदोवादबलंचोभयमपितदानींतिरोब भूवेतिभावः सदाचार्यहितंवैष्णवाचार्येभ्योहितं चतुर्थीतदर्थार्थेत्यादिनासमासःसदेतिपृथक्पदंवा अन्यत्पूर्ववत् तं श्री वल्लभं नमामि अथवा अमितं अधिकं यथास्यात्तथानमेतिस्वचित्तंस्वजनंवाप्रत्युपदेशः अत्रसंभाषणहेतुकस्यवादबलहर णस्यआसनस्थित्युत्तरकालिकत्वेनतत्कार्यत्वाऽऽदरणेकार्यकारणयोर्यौगपद्यवर्णनादक्रमातिशयोक्तिरलंकारःलक्षणंतुकु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वलयानंदे अक्रमातिशयोक्तिःस्यात्सहत्वेहेतुकार्ययोरिति तयोःकार्यकारणभावाऽनूरीकारेतुतुल्ययोगितैवास्तु प्रकृतयो रासनवादबलयोराक्रमणरूपैकक्रियान्वयत्वात् लक्षणंतुकाव्यप्रकाशे नियतानांसकृद्धर्मःसापुनस्तुल्ययोगितेति नियता नांप्राकर्णिकानामेवअप्राकरणिकानामेववा इतिव्याख्या नचतेषांकर्तृतयैवान्वयोत्रालंकारेआवश्यकइतिवाच्यं मालती शशभृल्लेखा कदलीनांकठोरेतत्यादितदुदाहरणेषतथानियमादर्शनात् इंद्रवंशावृत्तं स्यादिंद्रवंशाततजैरसंयुतैरिति॥ १९॥ अथास्मिन् वादयुद्धे श्रीमद्भिरेवतत्वनिर्णयः प्रणेयइतिराज्ञाविज्ञापितेसति श्रीमदाचार्याः पराजितानां भक्तिमार्ग निष्ठानां ब्रह्मवादिनां मतस्य मंडनमुपक्रांतवंतइत्याहुः हरिचरणेति तत्र सभायां सः श्रीमदाचार्यः बुधेषु विद्वत्सुमध्ये विधुरिव साक्षाद्भगवानिव अथचचंद्रइवभ्रेजेशुशुभे विधुश्चंद्रेऽच्युतइतिहैमः किंभूतेषुबुधेषु लसद्भेषु उल्लसत्कांतिषु पक्षे लसत्सु शोभमानेषु भेषुनक्षत्रेषुमध्येइत्यर्थः स्युःप्रभारुग्रुचिस्त्विड्भा नक्षत्रमृक्षंभंतारेतिचामरः किंकुर्वन्सन् सतांवेदानुयायिनांमार्गान्सिद्धांतान् हरितांमार्गान्दिशांवर्त्मानिचंद्रइवविकासयन् कैःकरणैःस्वविशदगवीव्यूहैः स्वाः स्वीयाः विशदाःअसंदिग्धाः पक्षेशुभ्राःयाःगावःवाचः पक्षेकिरणाः तेषांव्यूहैःसमूहैः गोरतद्धितलुकीतिटच् टित्वात्ङीप् विशदःपांडुरेव्यक्तइतिहैममेदिन्यौ स्वर्गेवज्रेचरश्मौचबलीवर्देचगौःपुमान् स्त्रीबाणरोहिण्यादृग्दिग्वाग्भूमिष्वप्सुभूम्निचे तित्रिकांडशेषः यथामुख्यादिशश्चतस्रःचत्वारश्चकोणाः तथावैष्णवसंप्रदायाअपिविष्णुस्वामिरामानुजमाध्वनिंबार्कभेदेन



For Private and Personal Use Only

प्रधानाश्चत्वारः चत्वारश्चचैतन्यप्रकाशादयउपसंप्रदायाइतिसंकलनयाअष्टौभवंति यथाचचंद्रःसर्वदिङ्मार्गान्नयनानंद करैःशुभ्रैःस्वकिरणैः प्रकाशयतितथाश्रीमदाचार्याअपि सर्ववैष्णवसंप्रदायासिद्धांतान्श्रवणानंदकरैःस्ववाग्विलासैःप्रकाशितवंतइत्यभिसंधिः किंभूतान्मार्गान्हरिचरणसंगत्यापूतान्हरेर्भगवतश्चरणयोःपादयोःसंगेन पक्षे हरेः सूर्यस्यसंबंधिनश्चरणस्यसंचारस्ययोगेनपवित्रान् पुनःकिंकुर्वन् तमोंधकारमिवमतंमायावादिसिद्धांतंतिरस्कुर्वन् खंडनमपसारणंचेहतिरस्कारः किंभूतंमतंतमश्च अन्यथाकृतदृक् अन्यथावेदगीताद्यभिप्रेतातिरिक्तप्रकारेणकृतंदृक्ज्ञानंयत्रतत्तथा योऽन्यथासंतमात्मानमन्यथाप्रतिपद्यते[1] किंतेननकृतंपापंचौरेणात्मापहारिणेत्यादिषुश्रावितात्यंतानिष्टफलसाधकमित्यर्थः पक्षेअन्यथाकृतेदर्शनसाधनेअपितदसाधनीकृतेदृशौनेत्रेयेनतत्तथादृक्स्त्रियांदर्शनेनेत्रेबुद्धौचत्रिषुवीक्षकइतिमेदिनी किंभूतःश्रीमदाचार्यश्चंद्रश्च विष्णुपदाश्रयःविष्णुपदेभगवच्चरणौआश्रयतइतितथा अथवाविष्णोःपदंगीतादिरूपंवाक्यं आश्रयतेवेदार्थनिर्णयेउपष्टम्भोतिकृष्णवाक्यानुसारेण[2] शास्त्रार्थंयेवदन्तिहि तेहिभागवताज्ञेयाःशुद्धास्तेब्रह्मवादिनइतिस्व सिद्धांतात् यद्वाविष्णोःपदंजीवोद्धरणरूपंव्यवसायंगोलोकादिरूपंस्थानंवाविष्णुकर्तृकंपदंत्राणंवाआश्रयते अथवा विष्णोःपदंपादचिन्हंऊर्ध्वपुंड्रंतस्यांकभूतांगोपीचंदनमुद्रांवाआश्रयते पक्षेविष्णुपदमाकाशमाश्रयोयस्यसतथा पदंशब्दे

१ इयंश्रुतिर्महाभारतस्यादिपर्वणिशाकुंतलोपाख्याने शकुंतलावचनेष्वप्युपनिबद्धास्ति २ श्रीमदाचार्यकृततत्वदीपाख्यस्यशास्त्रार्थप्रकरणस्यकारिकेयं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चवाक्येचव्यवसायप्रदेशयोः पादतच्चिन्हयोःस्थानत्राणयोरंकवस्तुनोरितिमेदिनी वियद्विष्णुपदंवापिपुंस्याकाशविहा
यसी इत्यमरः अत्रदिक्तिमिरचंद्रादीनांसत्पुरुषदुर्मतश्रीमदाचार्यादीनांचानेकेषामुपमानोपमेयभाववर्णनात्प्रत्येकमिव
शब्दप्रयोगाच्चअनेकेवशब्दवाक्यार्थोपमालंकारः लक्षणंत्वाहदंडी वाक्यार्थेनैववाक्यार्थः कोपियद्युपमीयते एकाने

हरिचरणसगत्यापूतान्सतांहरितामिवस्वविशदगवीव्यूहैर्मार्गान्बुधेषुविकासयन् ॥
तमइवतिरस्कुर्वंस्तत्राऽन्यथाकृतदृङ्मतंविधुरिवलसङ्केषुभ्रेजेसविष्णुपदाश्रयः ॥ २० ॥

केवशब्दत्वात्सावाक्यार्थोपमाद्विधेति नचउपमानोपमेययोर्भिन्नवाक्योपात्तत्वएवसतितत्संभवइतिशंक्यम् नलिन्याइव
तन्वंग्यास्तस्याः पद्ममिवाननम् मयामधुव्रतेनेवपायंपायमरम्यतेति दंडयुक्तेतदुदाहरणएवभिन्नवाक्योपात्तत्वाऽदर्शनात्
सांचेहअन्यथाकृतदृगित्यादिपदानांश्लिष्टत्वात्तदुक्तलक्षणकश्लेषोपमागर्भेतितयोरंगांगिभावःसंकरः हरिणीवृत्तं रसयुम ॥ २६ ॥

---

१ षड्भिश्चतुर्भिःसप्तभिश्चयतिः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हर्येन्सौम्रौस्लौगोयदाहारिणीतंदेति ॥ २० ॥ अथवादप्रवृत्तिकालएवक्रमाद्वैष्णवावैष्णवानांहर्षविषादावाहुः यद्वाक्येति तंश्रीमदाचार्यरूपंभानुंसूर्यईडेस्तौमि तंकंयद्वाक्येत्यादि यस्यवाक्यरूपायेरश्मयःकिरणास्तेषांनिकरेसमूहेप्रसृतेप्रसारंग तेसति सद्वादीत्यादि संतःसमीचीनायेवादिनोरामानुजाद्याः अथवाजगतःसत्यत्ववादिनःयद्वाब्रह्मवादिनः ॐतत्सदिति निर्देशोब्रह्मणस्त्रिविधः स्मृतइत्यादौसच्छब्दस्यब्रह्मपरत्वात् तेषांहृत्सरसिजानिहृदयकमलानिउच्चैः प्रसादंप्रसन्नभावं

यद्वाक्यरश्मिनिकरेप्रसृतेप्रसादंसद्वादिहृत्सरसिजानिसमीयुरुच्चैः ॥
निद्रामनाप्तबुधहृत्कुमुदानिभानुंविद्रावितापमितसंतमसंतमीडे ॥ २१ ॥

पक्षेविकासंसमीयुःसम्यक्प्रापुः तथानिद्रामिति अनाप्ताःअयथार्थवादिनोयेबुधाः शांकरादयःतेषांहृत्कुमुदानिहृदयरूपाणिकैरवाणिनिद्रांअर्थान्मीलनंम्लानिमितियावत् समीयुः आप्तोलब्धेचसत्येचेत्यभिधानचिंतामणिः सितेकुमुदकैरवे इत्यमरः पुनःकिंभूतंभानुं विद्रावितेति विद्रावितानिनिरस्तानिअप्रमितानिप्रमाणशून्यानियानिसंतमसानिसर्वतोव्याप्तां

१ नसमरसयगणाःलघुर्गुरुश्च

For Private and Personal Use Only

धकाराःतद्वत्तत्वावबोधप्रतिबंधकाःसिद्धांतायेनतं संतमसमित्यत्रअवसमंधेभ्यस्तमसइतिसमासांतोऽच् ध्वांतेगाढंधत
मसंक्षीणेवतमसंतमः विष्वक्संतमसमित्यमरःअत्रश्रीमदाचार्याणांसूर्याभेदनिरूपणान्न्यूनाधिकत्वयोरवचनाभावाच्चा
नुभयाभेदरूपकमलंकारः तत्रापिवाक्यादिपुरश्मित्वाद्यारोपात्सकलरूपकं उक्तंचदंडिना ताम्रांगुलिदलश्रेणिनखदीधि
तिकेसरं ध्रियतेमूर्ध्निभूपालैर्भवच्चरणपंकजं अंगुल्यादौदलादित्वंपादेचारोप्यपद्मतां तद्योग्यस्थानविन्यासादेतत्सकल
रूपकमिति तत्रापिविशेषणानांसमासशालित्वात् दंडयुक्तरीतिकंसमस्तरूपकमेतत् अथकमलकुमुदानांएकसरोवर्ति
त्वेसतिसूर्योदयेयुगपद्विकाससंकोचशालित्वदर्शनात् तद्वत्प्रकृतेसदसद्वादिनामपिएकसभास्थानांहृदयेषुक्रमात्प्रसाद
विषादयोःयुगपत्संभवेनतत्रतत्वारोपादेतदेवयुक्तरूपकं उक्तंचतेनैव स्मितपुष्पोज्ज्वलंलोलनेत्रभृंगमिदंमुखं इतिपुष्प
द्विरेफाणांसंगत्यायुक्तरूपकमिति वसंततिलकावृत्तम् लक्षणंतु उक्तावसंततिलकातभजाजगौगः ॥ २१॥ अथदुर्वाद
खंडनादेवश्रुतिसिद्धांताःस्वयंप्राकाशंतेत्याहुः कुमतमिति तंगुरुंश्रीमदाचार्यमुपाश्रये तंकं अभ्रवृंदवत्मेघसमूहवत्तततंवि
स्तीर्णं कुमतंमायावादादिरूपंमतंयदुदितैःयस्यवचनैर्हेतुभिःधुतंसंक्षोभितंसत्शतशः विभिद्यस्वयमेवभेदंप्राप्यविननाश
विशेषतोनष्टं अभ्रंमेघोवारिवाहस्तनयित्नुर्बलाहकइत्यमरः उदितमित्यत्रवदतेर्भावेक्तः वचिस्वपीत्यादिनाकितिसम्प्रसा
रणं विभिद्येत्यत्राभिदःकर्मकर्त्रर्थविवक्षायांक्त्वोल्यप् किंभूतैर्वचनैःसदागतिभिः सद्भ्योवेदभ्यआगतिर्येषांतैः मेघपक्षेयदुदि ॥२७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैःयतउदयंप्राप्तैःसदागतिभिःपवनैःधुतमित्यादितुल्यं भीषास्माद्वातःपवते यद्भयाद्वातिवातोयमित्यादिश्रुतिस्मृतिभ्यः मातरिश्वासदागतिरितिवायुपर्यायेष्वमरः मतंस्वाभिप्रेतसिद्धांतः अर्कवत्सूर्यबिंबवत् दद्दशे स्वयमेवादृश्यत दृशेःकर्मणएवकर्तृत्वविवक्षायांलिटिरूपम् कीदृशंमतसूर्यबिंबंचजाड्यहरंअविद्याकृतमौढ्यहरं पक्षेशैत्यहरंजडोमूर्खेहिमाघातइतिहैमःपुनःकिंभूतंअच्युताश्रयं नच्युतःपरिभ्रष्टःआश्रयःभगवदेकशरणत्वबुद्धिर्यस्मिँस्तत्तथा अच्युतंभगवंतमाश्रयतइति

कुमतंततंयदुदितैर्धुतंसदागतिभिर्विभिद्यशतशोऽभ्रवृंदवत् ॥
विननाशजाड्यहरमर्कवन्मतंददृशेऽच्युताश्रयमुपाश्रयेगुरुम् ॥ २२ ॥

वा पक्षेअच्युतंनारायणंआश्रयतिस्वस्यांतःस्थापयतीतितथा पीतांबरोच्युतःशार्ङ्गीत्यमरः अत्रपूर्वोक्तलक्षणयोः दंडयभिमतवाक्यार्थोपमाश्लेषोपमयोःसंकरः मंजुभाषिणीवृत्तम् लक्षणंतु सजसाजगौभवतिमंजुभाषिणीति ॥ २२ ॥ अथेत्थं श्रीमदाचार्यविजयेनैवसर्वेषांवैष्णवानांजयोजातइत्याहुः सदिति विभुःश्रीमदाचार्यःश्रीकृष्णश्चसदानिरंतरंसमवतु सम्यकरक्षतु सप्रसिद्धोदासंमामवत्विितिवा किंभूतःसाधुचक्रभृत्साधूनांसतांचक्रंसमूहंबिभर्तिपुष्णातीति पक्षेसमीचीनं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रमायुधविशेषंसुदर्शनाख्यंधारयतीतिचतथा डुभृञ्धारणपोषणयोः श्लुविकरणःचक्रंप्रहरणेगणे कुलालाद्युपकरणेरा ष्ट्रेसैन्यरथांगयोरितिहैमः सः कः यदागमाद्यस्यागमनाद्धेतोःसमितिपदेसभास्थानेसभारक्षणनिमित्तंवा पक्षेसमितेःसमुद्र मथनोत्तरंतत्तीरेअमृतार्थंप्रवृत्तस्यदेवासुराख्यसंग्रामस्यपदेस्थाने तादृशयुद्धरूपेव्यवसायेवा समितिःसांपरायेस्यात्सभा यांसंगमेपिचेतिमेदिनी पदंशब्देचवाक्येचव्यवसायापदेशयोःपादतच्चिन्हयोःस्थानत्राणयोरंकवस्तुनोरितिविश्वःसदाश्रि तैःसंतंवेदमाश्रयाद्भिः उषित्वादिश्यसन्मार्गमित्यादौसच्छब्दस्यवेदपरत्वंप्रसिद्धं अथवा सत् सत्कार्यवादादिरूपंमतमा श्रितैः पक्षेसदानिरंतरंश्रितैःअथवासदितिक्रियाविशेषणं सम्यगाश्रितैः देवानांभगवदेकशरणत्वात् बुधैःवैष्णवविद्वद्भिः पक्षेदेवैश्च तथाचपुनः असत्परैःअसत्कार्यवादतत्परैः असमीचीनवादप्रवणैर्वाअवैदिकवादपरैर्वा पक्षेअसमीचीनकार्य परैः परैःवैष्णवेतरैर्मायावादिभिः पक्षेशत्रुभिर्दैत्यैः परःस्यादुत्तमात्मान्यवैरिदूरेषुकेवलइतिविश्वः अपीतिसमुच्चये उभयैरपि युगपदेवपरमजयः ययेप्रापे ननुउभयेषामपिकथंपरमजयःसंभवति अन्यतरपराजयस्यावश्यंभावादित्याशंक्य यउभयसा धारणंहेतुमाहुः अभेदतइति तथाचशुद्धतया अद्वैतस्यप्रतिपादनात् वैष्णवसिद्धांतानांपरस्परविलक्षणत्वेपिभगवदे कतात्पर्यकत्वादिनासर्वेषामैक्यप्रतिपादनाद्वा वैष्णवैःसुरैश्चपरमउत्कृष्टोजयःप्रापे इतरैस्तुअभेदतःअस्यअकारस्यभे दतःपदकरणावसरेपरंअजयइतिछेदात् स प्रापे तथाचजयविरुद्धःपराजयएवतैःप्राप्तइत्यर्थः अमित्रादिशब्दवदिहविरो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धोनऽर्थः अतएवोक्तंव्यासकृतेयोगसूत्रभाष्ये अमित्रोनमित्रं नापिमित्राभावः किंतु मित्रविरुद्धसंपदिति अभेदतइ त्यत्रअकारमात्रेणभेदतइतितृतीयातत्पुरुषोवा देवासुरसंग्रामेहिदैत्यकृतमायाभिर्देवेषुम्लायत्सुसत्सुसर्वमायानिवर्तकसु दर्शनधरेणभगवता तत्रागत्यदेवजयःसंपादितइतिश्रीभागवताष्टमस्कंधादिषुप्रसिद्धं कीदृशैर्बुधैरितरैश्च सुरोचितैः दे वपक्षेपीतामृततयासुष्ठुशोभितैः वैष्णवपक्षे सुरेषुदेवेषूचितैर्योग्यैः दैवसृष्टौगणनार्हैरित्यर्थः दैत्यपक्षे सुरामद्यंतदुचितैः

**सदाश्रितैःसमितिपदेसुरोचितैरभेदतःपरमजयोययेबुधैः ॥**
**असत्परैरपिचपरैर्यदागमाद्विभुःसदासमवतुसाधुचक्रभृत् ॥ २३ ॥**

तत्पानादौयोग्यैःनत्वमृतपानादौ अतएवसमुद्रनिष्पन्नेषुरत्नेषुवारुणीलाभोदैत्यानांनतुसुधालाभः दुर्वादिपक्षेतु अकार च्छेदःआसुरसृष्टौगणनार्हैरित्यर्थः अत्र प्रकृतःश्रीमदाचार्यःअप्रकृतोभगवांश्चश्लेषेणवर्णितइतिप्रकृताऽप्रकृतश्लेषोऽलं कारः तथासुरासुराणांवैष्णवावैष्णवानांचपरमजयप्राप्तिरूपैकक्रियान्वयात्श्लेषांगभूतातुल्ययोगितापि लक्षणंतुसाहित्य

१. इहवैष्णवावैष्णवाः प्रस्तुताःसुरासुराअप्रस्तुताइतिक्रमाद्विविधाप्यत्रतुल्ययोगिताबोध्या ॥

For Private and Personal Use Only

दर्पणे पदार्थानांप्रस्तुतानामन्येषांवायदाभवेत् एकधर्माभिसंबंधःस्यात्तदातुल्ययोगितेति धर्मोगुणक्रियारूपइतिव्या
ख्या अकारमात्रेणभेदतइतिव्याख्यानेतु कृपणस्यकृपाणस्यचकेवलमाकारतोभेदइत्यादिवद्व्यतिरेकः लक्षणंत्वाहदंडी
शब्दोपात्तेप्रतीतेवासादृश्येवस्तुनोर्द्वयोः तत्रयद्भेदकथनंव्यतिरेकःसकथ्यतइति अतिरुचिरावृत्तं चतुर्ग्रहैरतिरुचिराजभौ
स्जगाइतितल्लक्षणात् ॥ २ ३ ॥ अथवैष्णवविबुधैर्जयध्वनिःकृतइतिवर्णयंतःस्वयमपिवंदंते वंदेविभुमिति विभुंनिग्रहा

वंदेविभुंयद्वचनाहतेद्राग्ध्वस्तेबुधैर्मायिमतेवितेने
तज्जेतुकामैर्जयगीर्यथोच्चैःप्रागिंद्रवज्राहतइंद्रशत्रौ ॥ २४ ॥

नुग्रहादौसर्वत्रसमर्थंश्रीवल्लभंवंदे कीदृशंविभुं मायिमतेमायावादसिद्धांते यद्वचनैःआहते तिरस्कृते ततएवद्राक्शीघ्रंध्वस्ते
प्रमाणशून्यतयानिर्मूलप्रायतांप्राप्तेचसाति तत् मायिमतं जेतुकामैः प्रथमतएवतज्जिगीषावद्भिः बुधैः वैष्णवविद्वद्भिः
जयगीः जयजयेतिरूपा जयस्यप्रतिपादिका वाक् उच्चैः वितेने चक्रे तमितिशेषः अत्रदृष्टांतःयथेत्यादि यथाप्राक् ॥ २९ ॥

---

१ श्रीमदाचार्यकर्तृकेण मायावादखंडनेन रामानुजादिसर्ववैष्णवानांस्वतोजयसिद्धयनंतरं.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वंइंद्रशत्रौवृत्रे इंद्रवज्राहते इंद्रस्यवज्रेण आहते ताडिते ध्वस्ते नष्टेचसति तज्जिगीषुभिर्बुधैर्देवैः उच्चैर्जयगीर्वितेने इंद्रशत्रुशब्दस्यवृत्रेप्रवृत्तिःइंद्रशत्रोविवर्द्धस्वेत्यादौप्रसिद्धा अत्रमायामतवृत्रयोर्वचनवज्रयोराचार्यपुरंदरयोश्वसाम्यवर्णनात स्तबकोपमालंकारः मायामतंजिगीषतामयत्नेनतद्वाभवर्णनात्प्रहर्षणमपि लक्षणंतु कुवलयानंदे उत्कंठितार्थसंसिद्धिर्विनायत्नंप्रहर्षणमिति इंद्रवज्रावृत्तं चतुर्थचरणेइंद्रवज्राहतइत्यत्रतन्नाममुद्रणान्मुद्रालंकारोपि लक्षणंतु तत्रैवसूच्यार्थ

दृक्पात्राभ्यामपिकलयतारूपपीयूषपानंतत्वज्ञानंपरिगतवताऽतृप्यताऽऽचार्यएकः ॥ राज्ञा
प्राज्ञाभिमतिभरितोद्दामदुर्वादिजेतावाचांनेताभुविविजयतेक्लृप्तहेमाभिषेकः ॥ २५ ॥

सूचनंमुद्राप्रकृतार्थपरैःपदैरिति ॥ २४ ॥ एवंजयेजातेसतिराजकर्तृकंकनकाभिषेकंवर्णयंति दृगिति दृशावेवपात्रेपात्रेताभ्यांकरणाभ्यांरूपपीयूषपानं श्रीमदाचार्यसौंदर्यरूपंयदमृतंतस्यपानंकलयताकुर्वताअपिसात्यादरंताद्विलोकयतापिअतृप्यतादर्शनविषयेतृप्तिमलभमानेनतथा तत्वज्ञानं नानामतदर्शनेनपूर्वंसंशयविषयस्यकांडद्वयविशिष्टवेदनिर्ग

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लितार्थस्यबोधं परिगतवताअसंभावनाविपरीतभावनाऽनाक्रांतंभाभवताराज्ञाकृष्णदेवाख्येन कृतहेमाभिषेकःरचित क
नकाभिषेकोयस्यतादृशः तथाएकः वादिविजयेपंडितांतरसाहाय्यशून्यः तथाप्राज्ञेत्यादि प्राज्ञाः विद्वांसःतथाअभिमतिभ
रिताःइदानींविजयेनद्विगुणाभिमानपूर्णाः भृजोऽनिट्त्वेनभरितइतिरूपाऽसंभवेपिसमूहवाचिभरशब्दातृतारकादित्वादित
चिभरितशब्दसिद्धिर्ज्ञेया एवमेव दिगंतानातेनेमधुपकुलझंकारभरितानित्यादयोजगन्नाथपंडितराजादिप्रयोगात्संगच्छंते
तथा उद्दामाः शिवादिरचितयुक्तिजालैरत्युत्कटाः शांकरादयःतथादुर्वादिनोवेदादिकंविहायवितंडामात्रकारिणोबौद्धाद
यः तेचंतेचेतिद्वंद्वः तेषां जेता तन्मतनिरासपूर्वकंसन्मार्गस्थापकइत्यर्थः एवंह्यत्राख्यायिका शांकरादिषुसर्वेषुप्रतिपक्ष
मतेषुश्रीमदाचार्यैर्निराकृतेषुसत्सु ततोद्वादशदिनपर्यंतंवादीच्छानुरोधातृस्थानिवदादेशसूत्रभाष्येपिसम्यगुपपादितेसति
अवसानेरोषविषादविषकलुषमनस्कतयाबौद्धादिनास्तिकमतानिप्रातिपक्षिभिरुपात्तानि ततोनास्तिकानांसंभाषणानर्हत
या श्रीमदाचार्यैर्मुखंपरिवर्त्यकंचिन्मध्येश्रोतारमवस्थाप्यतान्यपिनिराकृतानीति अथकैशोर्येपीदृशसामर्थ्येनैवाश्चर्यंकर
मित्याशयेनविशिषन्ति वाचांनेतेति अशेषवाक्पतिरित्यर्थः आचार्यः सर्वैःसदाचार्यैस्तदानींतिलककरणादिनासमर्पि ॥ ३० ॥

॥ ३० ॥

---

१ परिगतवतेतिमूलस्थपर्युपसर्गस्यार्थोयं, असंभावना अज्ञानं, असंभवज्ञानंवा, विपरीतभावनातु विरुद्धज्ञानं, अन्यथासंभवज्ञानंवा. २ विदुषामेवजये पुरुषार्थो नत्वविदुषामितिविशेषणस्वारस्यं ॥ ३ उद्दामाश्चदुर्वादिनश्चेति.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताचार्यभावःप्रकरणाच्छ्रीवल्लभाख्यः भुवि विजयते विशेषतःसर्वप्रातियोगिकोत्कर्षेणवर्त्ततेविपराभ्यांजेरित्यात्म
नेपदम् इतःप्रभृत्येव श्रीमदाचार्येष्वाचार्यशब्दव्यवहारोलोकेप्रवृत्तइतिज्ञापनायास्मिन् ग्रंथे आचार्यशब्दःप्रथममिहै
वोक्तः इहराज्ञोदर्शनाऽतृप्तिवर्णनाच्छ्रीमदाचार्यवपुषआसेचनकत्वंध्वनितं अत्र समृद्ध्यतिशयवर्णनादुदात्तम
लंकारः लक्षणंतुकुवलयानंदे उदात्तमृद्धेश्चरितंश्लाघ्यंचान्योपलक्षणमिति इहविजयतइतिवर्तमानप्रयोगेण भूत
स्यापितात्कालिकोत्सवस्य कविमनसा साक्षात्कृतत्वप्रतीत्याभाविकमप्यलंकारः लक्षणंतुकाव्यप्रकाशे प्रत्यक्षाइवय
द्भावाः क्रियंतेभूतभाविनः तद्भाविकमिति भूताश्चभाविनश्चेतिद्वंद्वः भावाअर्थाइतिकमलाकरः मुनिर्जयतियोगींद्रोमहा
त्माकुंभसंभवइतिसाहित्यदर्पणोदाहरणमप्येवंसंगच्छते पूर्वोत्तरार्द्धयोरंत्योनुप्रासः मंदाक्रांतावृत्तम् लक्षणंतूक्तं ॥ २ ५ ॥
अथाभिषेकसुवर्णमेतद्गाकार्यमितिविज्ञापितेसतिस्नानसलिलसदृक्षमस्माभिरिदमादीयतइत्युक्तवंतः श्रीमदाचार्याः
ततःक्षितीशेन तद्धिरण्यंधरणीगीवार्णेभ्योविभज्यवितीर्यमहत्तरेकनकभाजनेभृत्वा अपरस्मिन्स्वर्णमुद्राराशौनिवेदिते
सति समग्रद्रव्यस्याऽऽसुरत्वंदृष्ट्वाततोऽन्विष्यसम्यैवदैवद्रव्यभूतामुद्राः स्वीकृत्यवैष्णवत्वमभिलषतोराज्ञोपिमनोरथंशरणमं
त्रोपदेशेनतूर्णंपूर्णंकृत्वापांडुरंगपुरंप्रस्थितवंतोभगवंतइत्याहुः ततइति आम्नायथार्थसिद्धांतवादी यः ततः अभिषेकानं

१ तदासेचनकं तृप्तेर्नास्त्यंतोयस्यदर्शनादित्यमरः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरं यद्वा स्नानसुवर्णस्यद्विजेभ्योदानानंतरं अंघ्रिनिहितात् चरणयोःसमर्पितात् नतुदक्षिणावद्धस्तेदत्तात् अनेनराज्ञ आचार्याज्ञानुसारित्वंदैन्यातिशयश्चव्यज्यते पदंघ्रिश्चरणोस्त्रियामितित्रिकांडी द्रविणनिवहात्स्वर्णमुद्रारूपद्रव्यसमूहात् सकाशात् मुनिपरिमिताः सप्तसंख्याकाः दैवीः देवस्यभगवतःसंबंधिनीः तत्कार्ययोग्याइतियावत् द्वौभूतसर्गौलोकेऽस्मिन् दैवआसुरएवचेत्यादिवचनेभ्यो दैवासुरत्वविभागस्य जडेष्वपिसत्वात् मुद्राः स्वर्णमुद्राः

**ततोमुद्रायोद्राङ्मुनिपरिमितामेरुशिखरप्रभादाप्तोदैवीर्द्रविणनिवहादंघ्रिनिहितात् ॥**
**उरीकृत्योपेतंनृपमपिविधायात्मशरणंप्रभुःप्राच्छ्रत्प्रेष्ठंप्रदिशतुमुदंविठ्ठलपदं ॥ २६ ॥**

द्राक् शीघ्रं उरीकृत्यस्वीकृत्य ऊरीकृतमुररीकृतमित्यमरोक्तौ उरीकृतंऊरीकृतमित्यपिइत्यमरविवेककृताव्याख्यातं द्रागित्यनेन महत्यपिराशौ स्वल्पतराणामपि सप्तानां दैवत्वपरीक्षापूर्वकमन्वेषणे विलंबाभावकथनादैश्वर्यंव्यज्यते तथाउपेतं स्वस्यवैष्णवत्वसिद्ध्येपुरःप्राप्तंउपसन्नमितियावत्नृपमपि कृष्णदेवाख्यंराजानमपि अपिशब्दःपरिकरस्यसमुच्चायकः आत्मशरणंविधाय अष्टाक्षरोपदेशेनआत्मास्वएवरक्षितायस्यैतादृशंकृत्वा अथवागौणश्चेन्नात्मशब्दा

१ पत्रामात्यादे राजपरिकरस्य.



For Private and Personal Use Only

दित्यादौ आत्मशब्दप्रवृत्तेर्मुख्यतयाभगवत्येवसमार्थितत्वात् आत्माश्रीकृष्णएवशरणंयस्यैवंविधंकृत्वाअनेनशरणमंत्रो
पदेशएवस्फुटीकृतः विठ्ठलपदंप्राछंत् विद्यानगरात्पांडुरंगस्थानमगमत् सइतिशेषः सःश्रीमदाचार्योमुदंप्रभुविसन्मार्गप्र
चारप्रयुक्तमानंदंप्रदिशतु प्रकर्षेणत्वरितंफलसंपादनलक्षणेन दद्यात्वितिस्वान्प्रत्याशीः कीदृशः सः प्रभुः सर्वविजयप
रःसरंसन्मार्गप्रवर्तनंसर्वोद्धरणादिषुचसमर्थः कीदृशं विठ्ठलपदं प्रेष्ठं स्वामित्रस्थानत्वादतिशयेनप्रियं अनेनप्रथमतस्तत्र
गमनेहेतुर्दर्शितः कथंभूतात्द्रविणनिवहात् मेरुशिखरप्रभात् देवगिरिशिखरसदृशात् गिरिशृंगंहि मूलेस्थूलंक्रमेणाग्रपर्यंतं
सूक्ष्मंप्रायोभवति तयाराशिरपि मेरुशिखराणिसुवर्णमयान्येवभवंतीतिस्वर्णराशेरतितौल्यं वस्तुतस्तु राशेरत्यौन्नत्य
द्योतनफलिकासंबंधातिशयोक्तिरियं शिखरोन्नतिसदृशौन्नत्यायोगेपिराशौतद्योगकल्पनात् लक्षणंतुकुवलयानंदे संबंधा
तिशयोक्तिःस्यादयोगेयोगकल्पनमिति तथाचैवंबहुतरमपिसुवर्णराशिमनादृत्यसप्रैवमुद्रागृहीताइत्याचार्याणामत्यंतत.रं
निर्लोभत्वंद्योत्यते अत्रप्रभापदेनैवसादृश्यवर्णनात् जयदेवमतेललितोपमा उक्तंचचंद्रालोके उपमानेतुलीलादिपदाढ्ये
ललितोपमेति आत्मशरणंविधायेत्यनेनशरणमंत्रोपदेशस्यभंग्यंतरेणसंग्रहात्पर्यायोक्तं लक्षणंतु साहित्यदर्पणे अर्थामि
ष्टमनाख्यायसाक्षात्तस्यैवसिद्धये यत्प्रकारांतराख्यानंपर्यायोक्तंतदिष्यतइति इष्टंविवक्षितमर्थंवक्तुर्वैदग्ध्यभंगापत्या
साक्षाद्वाचकशब्देनानाख्यायेत्यादितत्रैवव्याख्यातं दैवीःप्रेष्ठं इत्यादिविशेषणानांसाभिप्रायत्वात्परिकरोपि लक्ष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णंतु कुवलयानंदे अलंकारःपरिकरःसाभिप्रायेविशेषणइति शिखरिणीवृत्तं लक्षणंतु रसैरुद्रैश्छिन्नायमनसभलागः शिख
रिणीति ॥ २६ ॥ अथपांडुरंगपुरंप्राप्यतत्रस्वमित्रस्यहरेःसमागमात् नेत्रांभोजेबहुलामोदविकस्वरेविधाय चंद्रभा
गातीरेश्रीभागवतपारायणादिकंच प्रणीय ततोभगवदाज्ञयानिष्क्रम्यादिग्विजयादिकंकृतवंतइत्याशयेनाहुः यात्रेतियः
श्रीमदाचार्यः यात्रायाःभूपरिक्रमणरूपायाः मिषात् व्याजात् ल्यब्लोपेपंचमी यात्रायामिषंविधायेत्यर्थः दिग्विजयांस्त्रीन्

यात्रामिषादकृतदिग्विजयांश्चतीर्थान्यद्धापुनान्निजजनान्व्यतनोत्सनाथान् ॥व्यान
क्स्वकेलिसहितंशिखरीशगूढंश्रीशंसतामिहहितायसवल्लभोऽव्यात् ॥ २७ ॥

अकृत अकार्षीत् सामान्यवहुवचननिर्दिष्टानामपिदिग्विजयानांकपिंजलालभनन्यायेनात्रित्वं तथाभूवलयेतानितानि
तीर्थानि अद्धासाक्षात् अपुनात् स्वचरणरेण्वादिसंसर्गेणपवित्रीकृतवान् नचैतदयुक्तं भवद्विधाभागवतास्तीर्थीभूताः
स्वयंविभो तीर्थीकुर्वंतितीर्थानिस्वांतस्थेनगदाभृतेत्यादिश्रीभागवतप्रथमस्कंधादिवचनेषु तादृशभक्तानामपितीर्थपाव ॥ ३२ ॥
कत्वकथनात् तथा यः निजजनान् विष्णुस्वामिमतवर्तिनोमनुष्यान् पुनःस्वमार्गमंडनेनसनाथान् व्यतनोत् विशेषे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णाकरोत् लुप्तस्यानादिसिद्धश्रुतिमतस्यपुनःप्रचारेणाशिष्यान् विस्तारितवानितिवा यात्रामिषादितिहेतोर्वाक्यत्रयेप्यनु
कर्षणबोधनार्थश्चकारः प्राकृतवदीश्वराणांनयात्रामात्रोद्देशेनपरिभ्रमणंसंभवतीतिभावः तथा शिखरीशगूढं व्रजदेशेगि
रिराजइति प्रसिद्धिमत्वात् शिखरिणांपर्वतानां ईशे गोवर्द्धनेगुप्तंश्रीशंगोवर्द्धनोद्धरणसामायिकंतादृशाकृतिश्रीनाथाख्यंभ
गवत्स्वरूपं इहअस्मिन्लोकेऽभ्यानक् व्यक्तीकृतवान् सर्वलोकदृग्गोचरंकृतवानित्यर्थः किंभूतंतत्स्वरूपं स्वकेलीति
विविधस्वकीयलीलाविशिष्टं तथाचसेवाप्रकाराविष्करणश्रीभागवतविवरणादिनालीलाअपिस्फुटीकृतवानित्यर्थः सतांदै
वानां हितायेतिदिग्विजयादिषुसर्वत्रप्रयोजनतयान्वेति सःवल्लभः एतन्नामकआचार्यः अव्यात्रक्ष्यात् अथवा सव
ल्लभइत्येकंपदं वल्लभेनप्रियेणश्रीनाथेनसहितः प्रक्रांतत्वादाचार्योऽव्यादित्यर्थः इदंश्रीनाथस्वरूपप्रकटनंतुद्वितीयस्मि
न्दिग्विजयेनिर्वृत्तं तथाहिश्रीमदाचार्याभुवंपरिक्रामंतोयदालोकेझाडखंडीतिप्रसिद्धंस्थलंप्राप्तास्तदातत्रभगवदाज्ञाभूत्
यद्देवदमनोनागदमनइंद्रदमनइतित्रिभिर्नामाभिःप्रसिद्धोगिरिराजेऽहमस्मितदिहागत्यमांप्रत्यक्षीकुरुध्वमिति ततस्तस्याआं
नुल्लंघ्यत्वात्पूर्वमिदंविधायानंतरमितएवपरिक्रमणक्रमःप्रारप्स्यतइतिनिर्धार्यमध्यतएवव्रजदेशंगतवंतः तत्रगोवर्द्धनगि
रिंप्राप्यतदुपत्यकायांसिद्धूपांडेनामकस्यकस्यचिद्द्विजस्यगृहबाह्यवेदिकायांक्षणंविश्रांतवंतः सहिद्विजोऽत्यंतभक्तःपरम
कृपालुनाश्रीनाथेनमह्यंत्वयाप्रत्यहंपयोर्पणीयमितिपुरैवाज्ञप्तआसीत् अथतदाश्रीमदाचार्यानालोक्यातिश्रद्धयानुयुंजानं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तंगृहस्वामिनंद्विजंअस्मद्गुरुभिरशिष्यस्यकिंचिदपिनादीयतइतिकृष्णदासाख्यःसेवकोयावदुत्तरयामास तावत्कृपातिशया
द्भगवत्कृतंपयोर्थेतत्कुमारिकाव्हानंश्रुतवंतः ततस्तान्निवेद्यप्रतिनिवृत्तयास्वस्यभगवद्दर्शनोत्कंठयात् पुत्रियस्मैत्वयादुग्धं
समर्पितंक्वसभगवांस्तिष्ठतीतिपृष्टयाचतयानिवेदितेनपथा पर्वतोपरिप्रयांतोमध्येमार्गेसहर्षमभिमुखमागतेनतेनैवगोवर्ध
नधरेणस्वयंसरभसंसमाश्लिष्यान्योन्यमुखाब्जावलोकनकुशलप्रश्नादिनासमंतेनभगवतापरमानंदमाविंदंत अथोप्रथमतः
प्रक्रांतंपरिक्रमणंसमाप्यसकुटुंबमिहागत्यविधीयतांसेवनमित्याज्ञप्तास्तथैवकरिष्यइतिविज्ञाप्य कंचित्कालंसेवनंकृत्वाऽ
प्सरः कुंडपरिसरगव्हरनिवासिरामदासाभिख्यौदीच्यद्विजन्मनेसेवनाज्ञांदत्वाविप्रयोगाकृष्टचित्ताअपिभगवदाज्ञयाकथं
कथमपिततोनिर्गत्यप्रतिज्ञातपरिक्रमणंपुरोक्तस्थलात्पुनरुद्भावयांतिस्मेतिकथासंदर्भः विस्तरस्तुभाषासंस्कृतमयाभ्यां
श्रीनाथप्राकट्यनिरूपणग्रंथाभ्यामवगंतव्यः श्रीनाथस्वरूपस्यसाक्षाद्भगवत्वगोवर्द्धनधरणसामयिकत्वादिकंतुगर्गसंहिता
यांगिरिराजखंडे कदंबखंडेतीर्थेचलीलायुक्तोहरिस्सदा तस्यदर्शनमात्रेणनरोनारायणोभवेत् १ यत्रवैराधयारासेशृंगारोऽ
कारिमैथिल तत्रगोवर्धनेजातंस्थलंशृंगारमंडलं २ येनरूपेणकृष्णेनधृतोगोवर्धनोगिरिः तद्रूपंविद्यतेतत्रराजन्शृंगारमंडले ३
अब्दाश्चतुःसहस्राणितथाचाष्टौशतानिच गतास्तत्रकलेरादौक्षेत्रेशृंगारमंडले ४ गिरिराजगुहामध्यात्सर्वेषांपश्यतांनृप ॥ ३२ ॥

१. पंचेतिपाठांतरं.

स्वतःसिद्धंचतद्रूपंहरेःप्रादुर्भविष्यति ५ श्रीनाथंदेवदमनंतंवंदिष्यंतिसज्जनाः गिरिराजगिरौराजन्सदालीलांकरोतियः ६
येकरिष्यंतिनेत्राभ्यांतस्यरूपस्यदर्शनं तेकृतार्थाभविष्यंतिमैथिलेंद्रकलौजनाः ७ जगन्नाथोरंगनाथोद्वारकानाथएवच
बद्रिनाथश्चतुष्कोणेभारतस्यापिवर्तते ८ मध्येगोवर्धनस्यापिनाथोयंवर्ततेनृप पवित्रेभारतेवर्षेपंचनाथाःसुरेश्वराः ९
सद्धर्ममंडपस्तंभाआर्तत्राणपरायणाः तेषांतुदर्शनंकृत्वानरोनारायणोभवेत् १० चतुर्णांभुविनाथानांकृत्वायात्रांनरः
सुधीः नपश्येद्देवदमनंनसयात्राफलंलभेत् ११ श्रीनाथंदेवदमनंपश्येत्गोवर्धनेगिरौ चतुर्णांभुविनाथानांयात्रायाश्चफलं
लभेदित्युक्तं १२ अत्रएकस्यैव यइतिकर्तृकारकस्य अकृत व्यतनोत् व्यानक् इत्यनेकक्रियान्वयित्वात्कारकदीपकमलं
कारः लक्षणंतुकुवलयानंदे क्रमिकैकगतानांतुगुंफःकारकदीपकमिति क्रमिकाणांएककारकाश्रितानांअनेकक्रियाणां
गुंफइत्यर्थः सैवक्रियासुबह्वीषुकारकस्येतिदीपकमित्यन्यत्रोक्तेः अथवा दिग्विजयकारणतीर्थपावनस्वजनसनाथीक
रणानांयात्राभिषेणयुगपदेवाचरणात्समुच्चयोस्तु लक्षणंतुतत्रैव बहूनांयुगपद्भावभाजांगुंफःसमुच्चयइति तीर्थान्यद्भापु
नादित्यत्रआचार्यगुणेनतीर्थानांपाविञ्यगुणावाप्तिवर्णनात् उल्लासोपि लक्षणंतुतत्रैव एकस्यगुणदोषाभ्यामुल्लासोन्य
स्यतौयदीति यत्रकस्यचिद्गुणेनान्यस्यगुणोदोषेणदोषोगुणेनदोषोदोषेणगुणोवावर्ण्यते सउल्लासइतिव्याख्यानं उक्तलक्ष
णकंवसंततिलकावृत्तं ॥२७॥ एवंसामान्यतोदिग्विजयानुक्रान्ताद्विशेषकार्याणिवादिष्यंतः खंडनीयमंडनीयवस्तुविवेकंहे

योपादेयत्वायतावदाहुः मायेति मायायाजगत्कारणत्वादिप्रतिपादकानियानिमतानितद्रूपायेउन्मत्ताःउद्रिक्तमदामतं गाः गजाः तेषां येमूर्द्धानः शिरस्तादात्म्यमापामुख्यसिद्धांताः तेषांप्रपाटने निरासरूपेविदारणे पटीयानतिशये नपटुः चतुरः कोप्यद्भुतोहरिःसिंहः कोपोऽस्यास्तीतिकोपीतादृशश्चासौहरिश्चेतिवा वस्तुतस्तु हरिर्भगवानेव हरिर्वा तार्कचंद्रेंद्रयमोपेंद्रमरीचिषु सिंहाश्वकपिभेकाहिशुकलोकांतरेषुचेतिविश्वः यथा उन्मत्ताः करिणः अशक्यनिरोधाः सर्वान्भृशंभ्रंशयंति तथामायामतान्यपिसामान्यजनेनानिरसितुमशक्यानिसन्मार्गात्भ्रंशयंति हस्तिनांचसिंहोयथा

**मायामतोन्मत्तमतंगमूर्द्धप्रपाटनेकोपिहरिःपटीयान् ॥ गवादिगोप्याश्रितकृष्ण सारःश्रीवल्लभाख्यःशरणंममास्तु ॥ २८ ॥**

स्वाभाविकोवैरीनियमनक्षमश्चतथायमप्येषामितिभावः अद्भुतत्वमेवविवृण्वंति गवित्यादि गावोवाचः वेदगीतादिप्रमाण चतुष्टयात्मिकाः आदिशब्देनप्रमेयसाधनफलानितानिगोपायतिरक्षतीतितथा गवास्ववाचाकरणभूतयाआदिप्राक्तनं श्रुतिसिद्धांतं गोपायतीतिवा आयप्रत्ययस्यआयादयआर्धधातुकेवेतिवैकल्पिकत्वात्णिनेश्चार्धधातुकत्वान्निहायः किंच आश्रितोयःकृष्णःभगवान्सएवसारोबलंयस्यसः अथवा गोभिःधेनुभिः आदिशब्दाद्गोपैर्मृगादिभिश्चगोपीभिश्च ॥ ३४ ॥
आश्रितोयःकृष्णःसएवसारःस्थिरांशरूपःसारंधनरूपोवायस्यसतथा सारोमज्जास्थिरांशयोः बलेश्रेष्ठेचसारंतुद्रविणन्या

For Private and Personal Use Only

य्यवारिर्ष्विर्तिर्हैमः सिंहस्तुगवादिगोपीधेन्वादिपशुरक्षकोनभवति मृगादनत्वात् आश्रिताःकृष्णसारामृगायेनतादृशोपि
नभवतिमृगराजत्वात् इतिविरोधाभासमूलकमद्भुतत्वं तादृशःश्रीवल्लभाख्यःममशरणंरक्षितास्त्वितिप्रार्थना अत्रतृतीय
चरणेभक्तैर्लीलाभिश्चसहितंपरमकाष्ठापन्नंवस्तुभजनीयत्वायसारत्वेनोक्तमितितद्भजनंमंडयत्वेनोपादेयं एतद्विरुद्धसिद्धां
तास्तुमायाप्रतिपादकाःपूर्वार्द्धेखंडयत्वेनहेयाज्ञेयाः अत्रपूर्वार्द्धेसाहित्यदर्पणोक्तरीतिकंसांगरूपकं आचार्येषुसिंहत्वारोपा
त् वादप्रभृतिषुगजत्वाद्यारोपात् उत्तरार्द्धेतुसिंहविरुद्धकार्यवर्णनेनततोवैधर्म्यख्यापनात् व्यतिरेकरूपकं उक्तंचदंडिना
इष्टंसाधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः उपमाव्यतिरेकाख्यंरूपकद्वितयंयथेति उक्तलक्षणकमुपजातिर्वृत्तं ॥ २८ ॥
एवंपरमतखंडनेसामर्थ्यमुक्त्वासाक्षात्तत्करणमाहुः पक्षमिति गुरुश्चासौवल्लभश्चगुरुवल्लभःसोऽवतात् रक्षणेहेतुः यःस
ल्लोकानांसत्पुरुषाणांसच्छास्त्राणांवापालकः लोकस्तुभुवनेजनइत्यमरः आलोचनकर्मत्वात् क्वचिच्छास्त्रविषयेप्ययंदृष्टः
बाहुलकात्कर्मणिघञ् उक्तस्थलेरामाश्रमेणापितथैवसाधितः अत्रापिहेतुः हरिरितिसर्वदुःखहर्तृभगवद्रूपः एवंचपरित्रा
णायसाधूनामितियदायदाहिधर्मस्येतिवाक्यतएतद्द्वयंकर्तव्यमेवेत्यर्थः ननुतर्हिभगवतापूर्वावतारेअसुरसंहारइवात्रकिं
माचरितमित्याशंक्यतदाहुः यइत्यादि उपाधिसाधिनां उपाधिंसाधयंतिप्रतिपादयंतीतितथातेषां ब्रह्म स्वतोनिर्धर्मकम
पिमायोपहितंसत् जगत्कर्तृत्वादिधर्मवच्छबलापरपर्यायेश्वरसंज्ञांलभते अविद्योपहितंचसत् जीवसंज्ञामितिकल्पनया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भगवतोऽपरिच्छिन्नमैश्वर्यंदूषयतामितियावत् एवमुपाधिनिरूपणं शांकराणांद्वैतार्थं भास्कराणांदुग्धांबुवत् भिन्नोभिन्न
सखंडनंमयावेदांतचिंतामण्यादिषु प्रपंचितमितिनेहोच्यते कीदृशानां तेषां गिर्युत्कटानां गिरिवाग्विषयेउद्भतानां
केनाप्यपराजय्यानामितियावत् एषां पक्षं अभिमतशास्त्रार्थयोव्यतक्षत् विशेषेणतनूकृतवान् यद्वा तदभिमत
सिद्धांतनिराकरणेन तेषांपक्षंबलं तनूकृतवान् पक्षोमासार्द्धकेपार्श्वे गृहेसाध्यविरोधयोः केशादेःपरतोवृंदेबलेस

**पक्षंव्यतक्षद्यउपाधिसाधिनांसद्ब्रह्मसारोद्भवतोबुधाग्रणीः ॥ गिर्युत्कटानांशत**
**कोटितोऽवतात्सल्लोकपालोगुरुवल्लभोहरिः ॥ २९ ॥**

खिसहाययोः चुल्लीरंध्रेपतत्रेचेतिमेदिनी तक्षूत्वक्षूतनूकरणे केनव्यतक्षदित्यतआहुः सद्ब्रह्मसारोद्भवतःशतकोटि
तइति सार्वविभक्तिकस्तसिः सत्नित्यं अकृतकं यत्ब्रह्मवेदः वेदस्तत्वंतपोब्रह्मेतित्रिकांडी तस्ययत्सारोनिष्कृष्टार्थः
बलंवातस्मादुद्भवंतीतितथाताभिः तसिलादिष्वाकृत्वसुचइतितसिपुंवद्भावः शतकोटितःशतमनेकाःकोटयउत्कर्षाबिवा
दयुक्तयोवा कोट्युत्कर्षाटनीसंख्येत्यभिधानचिंतामणिः कोटिशब्दस्यविवादयुक्तिपरत्वंतुकोटिक्रमोऽयं अनेनेत्थंकोटिः ॥३५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृता इयंनैय्यायिककोटिरित्यादिव्यवहारसिद्धं शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्चेतितस्यापिशक्ति
ग्राहकत्वात् अतएवबुधेषुपंडितेष्वग्रणीर्मुख्यः ज्ञातृचांद्रिसुराबुधाइतिक्षीरस्वामीअस्मिन्श्लोकेहरिपदांदिद्ररूपोऽपिपा
क्षिकोऽर्थःस्फोर्यते हरिरिंद्रोहरिर्भानुर्हरिर्विष्णुर्हरिर्मरुत् हरिःसिंहोहरिर्भेकइत्यनेकार्थः तथाहि सोऽपिगुरुवल्लभः गुरोः
बृहस्पतेः प्रियःसवाप्रियोयस्यतादृशः गुरुर्महत्यांगिरसेपित्रादौधर्मदेशके अलघौदुर्जरेचापीतिहैमः अष्टसुदिक्पालेषुप्रथ
मत्वात्सल्लोकपालः बुधाग्रणीर्देवाग्रणीः राजत्वात् तथा यः उपाधिमुपद्रवंपाक्षित्वेनाकाशगमनात् स्वर्गस्योपसमीपेआ
धिमानसींव्यथांवासाधयतां गिरिषूत्कटानांउद्धतपर्वतानांपक्षंपतत्रमुत्पतनसाधनमवमवंमहातपास्वित्वातसद्ब्रह्मणःसमी
चीनब्राह्मणस्यदधीचेःसारोद्भवतः अस्थिरूपात्तस्थिरांशादुत्पन्नेन शतकोटितः वज्रेणव्यतक्षत् आच्छिनत् शतकोटिः
स्वरुःशंबइतिवज्रपर्यायेष्वमरः कुवलयानंदे उच्छलद्भूरिकीलालःशुशुभेवाहिनीपतिरित्यत्रेवप्रकृताप्रकृतयोःश्लेषोऽयं इंद्र
वंशावृत्तं लक्षणंतु स्यादिंद्रवंशाततजैरसंयुतैरिति॥२१॥एवंखंडनीयमतानांखंडनमुक्त्वा स्वपक्षरहितपरपक्षदूषणस्यावितं
डात्वात् आचार्यवाचितथात्ववारणार्थंश्रुतिसंमतस्वसिद्धांतस्थापनमाहुः मोहेति यः एतंसर्वसच्छास्त्रप्रसिद्धंशुद्धाद्वैतोद्दी
पं अयनंइतंभावेक्तः द्वयोरितंद्वीतंद्वीतमेवद्वैतंप्रज्ञादित्वात्स्वार्थेऽण् गत्यर्थकानांज्ञानार्थकत्वस्याप्यंगीकाराद्वित्वप्रकारकं
ज्ञानमित्यर्थः तद्विरुद्धमद्वैतंएकत्वप्रकारकज्ञानमित्यर्थः तच्च शांकरादिभिरपि कथंचिदंगीक्रियतइतितद्व्यवच्छे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दार्थशुद्धपदं शुद्धत्वंचोपाधिसंसर्गशून्यत्वं शुद्धंचतदद्वैतंचेतिविग्रहः अथवाशुद्धयोर्मायासंबंधरहितयोः कार्यकारणयोरद्वैतमिति तत्वंचेतरसंबंधानवछिन्नकार्यकारणादिरूपद्वित्वप्रकारकज्ञानप्रतियोगिताकाभावत्वमितिलक्षणपरिष्कारेरामकृष्णभट्टाः विशेषतस्तत्स्वरूपंतुमार्तंडादिषुभाक्तनग्रंथेषुवेदांतचिंतामण्यादिषुमत्कृतेषुग्रंथेषुचास्त्येवेतिततोऽवधेयंशुद्धाद्वैतमेवान्नतोदीपः दीपवत्प्रकाशकःसिद्धांतः तंइहअस्मिँह्लोकेअदिद्युतत् प्रकाशितवान् तंआचार्यश्रीवल्लभाख्यं

मोहध्वांताऽऽक्रांतदृशोदर्शयितारंविश्वाऽऽकारंकर्त्रविकारंपरऽमस्य ॥ शुद्धाद्वैतोद्दीपमिहादिद्युतदेतंयःश्रौतस्नेहांचितमाचार्यमुपासे ॥ ३० ॥

उपासे सेवे किंभूतं दीपं मोहेत्यादिमोहःअविद्याकार्याहंत्वममत्वरूपः सएवध्वांतमंधकारः तत्वज्ञानावरकत्वात् तेनआक्रांतादृक्ज्ञानं पक्षेदृष्टिश्चयेषांतान्जीवान् परं परब्रह्मस्वरूपंदर्शयितारं दृक्ज्ञानंज्ञातरित्रिष्वित्यमरः अण्यंतावस्थायांकर्तृणांमोहध्वांताऽऽक्रांतदृशां दृशेश्चेतिवार्तिकेनणौकर्मत्वं कथंभूतंपरं अस्यप्रत्यक्षस्यजगतःकर्तृ यतोवाइमानि तस्माद्वाएतस्मादात्मनइत्यादिश्रुतीरनुसृत्य जन्माद्यस्ययतःशास्त्रयोनित्वात् इतिसूत्रणात् नन्वेवंकर्तृकार्यभावेघटकुलाल ॥ ३६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वत्भत्युतद्वैतमेवापद्यतइतितद्व्युदसितुंविशेषणांतरमाहुः विश्वेति किंभूतंतत् विश्वाकारं विश्वंजगत् आकारोयस्यतत्
स्वयमेकमपिरमणार्थंबहुभावेच्छयास्वालौकिकसामर्थ्याज्जगदाकारेणपरिणतमित्यर्थः सऐक्षतलोकान्नुत्सृजाइति तदै
क्षतबहुस्यांप्रजायेयेति सवैनैवरेमे तस्मादेकाकीनरमते सद्वितीयमैच्छत् सहैतावानास तदात्मानंस्वयमकुरुतेत्याद्यै
तरेयच्छांदोग्यबृहदारण्यकब्रह्मवल्ल्यादिश्रुतीरनुसृत्यईक्षतेर्नाशब्दं आत्मकृतेःपरिणामादितिसूत्रणात् तथाच यथोर्ण
नाभिःसृजतेगृण्हतेवा यथापृथिव्यामोषधयःसंभवंति यथासतःपुरुषात्केशलोमानितथाऽक्षरात्संभवतीहविश्वमित्यादि
मुंडकादिश्रुतिसिद्धाऽभिन्ननिमित्तोपादानवादांगीकारान्नद्वैतगंधोपीतिभावः नन्वेवंपरिणामित्वेविकारित्वमापद्येतेत्य
तआहुः अविकारमिति कारणत्वेपिदुग्धादिवद्विकृतंनभवति तथाचसुवर्णादिवदविकृतमेवतत्परिणमतीतिभावः अतए
वदृष्टांतआम्नायतेश्वेतकेतुविद्यायां यथासोम्यैकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंलोह
मित्येवसत्यमिति उपबृंहितंचैतच्छ्रीभागवतेएकादशस्कंधे अध्याय २८ श्लोक १९ यथाहिरण्यंसुकृतंपुरस्तात्पश्चा
च्चसर्वस्यहिरण्मयस्य तदेवमध्येव्यवहार्यमाणंनानापदेशैरहमस्यतद्वदिति विस्तरतश्चेदंउभयव्यपदेशात्वहिकुंडलवदि
त्यादिसूत्रेष्ववधेयं किंचविश्वाकारमित्यत्र विश्वेसर्वेआकारारूपाणियस्येत्यर्थांतरेण विश्वतश्चक्षुः समोमशकेनसमोना
गेनेत्यादिश्रुतिसिद्धमप्राकृताखिलाकारत्वमपिसंगृहीतं तेनोपलक्षणविधयानामरूपयोरपिब्रह्मरूपत्वंनतुमिथ्यात्वमि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिदर्शितं पुनःकीदृशंदीपं श्रौतस्नेहांचितं श्रौतंपूर्वकांडार्थभूतंयागादिरूपंश्रौतकर्मतद्रूपेणतैलेनयुक्तं यद्वा श्रौतःश्रद्धाभ
क्तिध्यानयोगादवोह भक्तिरस्यभजनंतादिहामुत्रोपाधिनैराश्येनमनःकल्पनं ब्रह्मसंस्थोऽमृतत्वमेतीत्यादिकैवल्यगोपालता
पनायच्छांदाग्यादश्रुतिप्रतिपादित : श्रुतिरूपभक्तानांसंबंधीवा यःस्नेहोभक्तिः पक्षेतैलं तेनांचितंपूजितं स्नेहःप्रेम्णिघृ
तादिकेइत्यभिधानचिंतामणिः तथार्चनिरुपाधिशुद्धभक्तिसहितंशुद्धाद्वैतविज्ञानमाविष्कृतवानितिश्लोकानिगर्वः सां
गरूपकमलंकारः अत्रपादत्रयेसविशेषणरूपकं श्रौतस्नेहेत्यत्रतुश्लिष्टरूपकमपीति दंडयुक्तलक्षणकयोरनयोःसंकरः
मत्तमयूरंवृत्तं वेदैरंध्रैर्म्तौयसगामत्तमयूरमितितल्लक्षणात् ॥ ३० ॥ एवंसर्वेषांजयंस्वसिद्धांतस्थापनंचोक्त्वा ततोजातंय
शोवृद्ध्यादिकमाहुः उच्चैरिति यतोजिष्णुर्जयशीलः अतएवउच्चैरुत्कर्षेणश्रवोभृद्यशोधारकः वृद्धश्रवाः शुनासीरः हयउ
च्चैःश्रवाइत्यादौव्याख्यासुधायांश्रवस्शब्दस्ययशःपरत्वेनापिव्याख्यानात् यशःस्वरूपमाहुः विबुधाधिनाथइति पंडिता
नामधीश्वरइत्यर्थःमतांतरस्थविबुधानधिकंनाथयत्युपतापयतीतिवा स्वीयांस्तानधिनाथतआशिषासमर्द्धयतीतिवा वि
बुधःपंडितेसुरेइतिहैमः नाथनाधृयांचोपतापैश्वर्याशीःषु किंच सुधर्मावनकृत् सुष्ठुधर्मस्यसुधर्मणांपुंसांवारक्षकः अत्रवेद
प्रतिपाद्यप्रयोजनवदर्थोधर्मइतिसर्वसंमतलक्षणंतत्रयद्यपिपदत्रयेणभोजनादौस्वर्गेअनर्थभूतश्येनादौचातिव्याप्तिर्वारिता ॥ ३७॥

१. धर्मादनिच्केवलादितिबहुव्रीहावनिजंतं ।

For Private and Personal Use Only

तथापिवायव्यंश्वेतमालभेतभूतिकामइत्याद्युक्तेषुकाम्येष्वेतत्प्रविशतीतितद्वारणाय श्रीमदाचार्यैर्द्वापरादौतुधर्मस्येत्यत्र चोदनाविषयत्वेनावश्यकर्तव्यताकत्वे नाभिमतोऽर्थोधर्मइतिलक्षणंपृथक्कृतं तथाचसुधर्मोनित्यनैमित्तिकलक्षणोधर्मइत्य र्थः पंचात्मकःसभगवानित्यादौहरिरूपत्वोक्तेः अनेनविशेषणेनपूर्वमीमांसाभाष्यकारत्वंद्योत्यते तथा पवित्रः वेदांतविचा रेणातिशुद्धः यदेवविद्ययाकरोतिश्रद्धयोपनिषदावातदेववीर्यवत्तरंभवति ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेत्यादि

उच्चैःश्रवोभृद्विबुधाधिनाथोजिष्णुःसुधर्मावनकृत्पवित्रः ॥ श्रीशप्रसादा
मृतसाधनोऽव्यात्सन्नंदनोवल्लभभूसुरेंद्रः ॥ ३१ ॥

श्रुतिस्मृतिभिस्तान्निष्ठशुद्धयाधिक्यकथनात् तेनोत्तरमीमांसायाअपिभाष्यकृदितिबोधितं उभयभाष्यकरणफलमाहुः श्रीशेति भगवत्प्रसादं अमृतंमोक्षंचसाधयतीतितथानंद्यादित्वाल्ल्युः अमृतंयज्ञशेषेस्यात्पीयूषेसलिलेघृते अयाचितेच मोक्षेचेतिमेदिनी अथवा श्रीशप्रसादेनभगवदनुग्रहेणैवमुक्तिसाधकः अतएवैतन्मार्गस्यपुष्टिमार्गत्वं पोषणंतदनुग्रहइति द्वितीयस्कंधवाक्येनपुष्टिरनुग्रहस्तत्प्रधानोयोमार्गःसपुष्टिमार्गइत्यर्थोभिकारात् उक्तंच अनुग्रहःपुष्टिमार्गेनियामकइति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



।स्थितिरितिफलस्यानुग्रहैकसाध्यत्वंतुभक्तिहेतुनिर्णयेप्रपंचितंप्रभुभिरित्यलंपल्लवितेन अत्रधर्मब्रह्ममीमांसयोर्व्याख्याने
नोभयकांडार्थप्रतिपादनमुक्तं लक्ष्मीपत्यनुग्रहस्यसाधनत्वोक्त्यातत्संस्थस्यामृतत्वोपदेशादितिभक्तिसूत्राद्भक्तिफलस्यामृ
तस्यसाध्यत्वोक्त्याचससाधनफलाभक्तिरपिकथितेतिदिग्विजयानंतरंभूयःस्थिरीकृतःशुद्धकर्मज्ञानभक्तिरूपः स्वराद्धांतः
सुधर्मेत्यादिविशेषणत्रयेणध्वानितइतिबोध्यं एवंसिद्धांतस्यसमर्थनमुक्त्वाऽग्रेतत्प्रचारबीजमाहुः सन्नंदनइति संतौस्वाभी
ष्टश्रौतमार्गस्यपुनःप्रचारणधुरीणौनंदनौश्रीमद्गोपीनाथविठ्ठलनाथाख्यौसुतौयस्यसइति यद्वासत्पुरुषान्नंदयतिवर्द्धयती
तितथा तेनसच्छिष्यबाहुल्यंप्रचारहेतुभूतंध्वनितं तादृशोवल्लभाख्योभूसुराणांब्राह्मणानां इंद्रः अव्यात् रक्षतात् सुरेंद्र
शब्दादत्रमहेंद्रपरतयार्थोपिस्फोर्य्यते तथाहि देवेंद्रोपिजिष्णुनामकः जिष्णुर्लेखर्षभःशक्रइत्यमरोक्तेः तथा उच्चैःश्रवसो
निजाश्वस्यपोषकः विबुधानांदेवानांअधिपतिः सुधर्मायाःदेवसभायाः रक्षकः स्यात्सुधर्मादेवसभेत्यमरः पवित्रः पविना
वज्रेणत्रायतइतितथा पर्वतभेदिपवित्रंजैत्रंनरकस्यवहुमतंगहनं हरिमिवहरिमिवहरिमिववहतिपयःपश्यतपयोष्णीत्या
दिनलचंप्वादिप्रयोगेषुतथार्थप्रतीतेः सुपिस्थइत्यत्रसुपीतियोगविभागात्द्विपादिवदादंतात्कः अथवा पवित्रायतेरक्षति
स्वायुधत्वेनसंगृण्हातीतियावत् सतथाआतोऽनुपसर्गइतिकः यद्वापवित्रंजलंतद्वर्षणंवातद्विद्यतेऽस्येतितथोक्तः अर्शआ
द्यच् जलधाराधिपातित्वात् पवित्रंवर्षणेकुशे ताम्रेपयसिचक्लीबंमेध्येस्यादभिधेयवदितिमेदिनी तथाश्रीशप्रसादएवपी



For Private and Personal Use Only

यूपप्राप्तेःसाधनंयस्यसःसमुद्रमथनेभगवताऽनेकधासाहाय्यकरणात् उक्तंच तत्रामृतंसुरगणाःफलमंजसाऽपुर्यत्पादपंकजरजःश्रयणान्नदैत्याइति समीचीनंनंदनंएतन्नामकंवनंयस्यतादृशश्चास्ति अत्रपूर्वोक्तलक्षणकश्लिष्टरूपकमलंकारः कोपिसभूसुरेंद्रइतिपाठेतु दंडिसंमताअभिन्नविशेषणासमासोक्तिः यथोक्तं तेन वस्तुकिंचिदभिप्रेत्यतत्तुल्यस्यान्यवस्तुनः उक्तिःसंक्षेपरूपत्वात्सासमासोक्तिरिष्यते विशेष्यमात्रभिन्नापितुल्याकारविशेषणा ॥ अस्त्यसावपराप्यस्तिभिन्नाभिन्नविशेषणेति अत्रैवमालिन्यप्रोंछन्यांश्लिष्टविशेषणाश्लिष्टाश्लिष्टविशेषणाचेतिद्वौभेदावितिव्याख्यातं अतः रूढमूलःफलभरैः पुष्णन्ननिशमार्थिनः सांद्रच्छायोमहावृक्षःसोयमासादितोमयेत्यत्रैवश्लेषादभिन्नविशेषणेहसमासोक्तिः वहुभभूसुरेंद्रइतिपाठेपिइंद्रशब्दस्येश्वरार्थकत्वादरणेतुप्रस्तुतादाचार्यवृत्तांतादप्रस्तुतपुरंदरवृत्तांतस्फूर्त्या समासोक्तिःपरिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्यचेदितिकुवलयानंदाद्युक्तलक्षणकासमासोक्तिरेव उक्तलक्षणकंइंद्रवज्रावृत्तं ॥ ३१ ॥

एवंसर्ववादान्निरस्यचिरकालोच्छिन्नामपिसपरिकरांहरिभक्तिप्रमाणसंबद्धैः स्वग्रंथैः पुनरुज्जीव्यसज्जनेषुप्रचारितवंतोदिग्विजयेष्वित्याशयेनाहुः कलिकालेतियुग्मेन यःभक्तिलतां भक्तिरूपामेवफलादिमत्तयालतां व्रततिं वचनैःस्वग्रंथैः परिपुष्य परितोभूमंडलेपुष्ट्वा विभावपल्लवितां विभावैर्भक्त्युद्दीपकैः कीर्तनादिभिः पल्लवितांविस्तीर्णांपक्षेसंजाताकिसलयांविभावःस्यात्परिचयेरसस्योद्दीपनादिष्विति पल्लवोऽस्त्रीकिसलयेविटपेविस्तरेवनेश्रृंगारेऽलक्तरागेऽस्त्रीतिचमेदिनीतथा

सुमनःस्वामोदसंपदं दधतीं सुमनःसु सुचित्तेषु आमोदसंपदं आनंदस्यसमृद्धिंदधतींपुष्णंतीं पक्षे सुमनःसुपुष्पेषुआमोदस्यसुगंधस्यसंपदंदधतीं धारयंतीं सुमनाःप्राज्ञदैवयोः जात्यांपुष्पइतिहैमः आमोदोगंधहर्षयोरितिमेदिनी तथापरफलितां परेणपुरुषोत्तमेनसंजातफलां तद्रूपफलवतीमित्यर्थः धान्येनधनवानित्यादिवदभेदस्तृतीयार्थः ब्रह्मविदाप्नोतिपरमित्यादौतस्यफलत्वंप्रसिद्धं पक्षेपराण्युत्कृष्टानिफलानिसंजातान्यस्यास्तादृशीं तथासदालिकालितां सतांसत्पुरुषाणां आल्या

**कलिकालोष्णक्लांतांसुमनःस्वामोदसंपदंदधतीं ॥**
**भक्तिलतांपरफलितांसदालिकालितांविभावपल्लवितां ॥ ३२ ॥**

पंक्त्यानिषेवितां अथवासद्भिरालिभिर्विशदाशयैःकलितां आलिर्विशदाशये त्रिषुस्त्रियांवयस्यायांसेतौपंक्तौचकीर्तिते तिमेदिनी पक्षेसदेतिपृथक्पदं निरंतरं अलिभिर्भ्रमरैःकलितां सुगंधलोभात्सेवितां अलिःसुरापुष्पलिहोः कह्लोलेपीति त्रिकांडशेषः रचयति एतादृशविशेषणविशिष्टांकरोति किंभूतैर्वचनैः सदमृतघटकैः सत् इतरापेक्षयोत्तमं यत् अमृतं मोक्षःतत् घटयंति जीवान्प्रापयंतीतितथातैः पक्षेसमीचीनंयदमृतंजलंतस्यघटकाः अल्पकुंभास्तैःअल्पार्थेकन् मह



For Private and Personal Use Only

त्तैर्घटैःकोमललतायाः सेचनेतन्नाशप्रसंगात् भक्तौलतात्वारोपाज्जलघटीतादात्म्यापन्नैर्वचनैः परिपुष्येत्यर्थः मोक्षःसु धायज्ञशेषोऽयाचितंवारिस्चामृतमितित्रिकांडशेषः पुनःकिंभूतैः सुवर्णमयैः सुष्टुवर्णाः प्रमाणसंबद्धान्यक्षराणितद्रूपैः कन्या मयेनेत्रशतैकलक्ष्यइत्यादिवत्स्वार्थेमयट् चिन्मयमित्यत्रापिशेखरकृतातथैवांगीकृतं घटपक्षे हेमप्रचुरैः किंभूतांलतां कलिकालोष्णक्लांतां कलियुगावसरएवसंतापादिहेतुत्वादुष्णोग्रीष्मऋतुःतेनक्लांतांम्लानां उष्णऊष्मागमस्तपइत्यमरः

वचनैःसदमृतघटकैरचयतिपरिपुष्यय:सुवर्णमयैः ॥
वित्रासीष्टनिजेष्टःसत्रासंमांभवात्सवागीशः ॥ ३३ ॥

सःवागीशः वाक्पतित्वादीदृशवचनरचनशक्तःश्रीमदाचार्यः सत्रासं सभयं मां भवात् संसारात् वित्रासीष्ट विशेषेण त्रायतां आशिषिलिङ् भवादिति भीत्रार्थानांभयहेतुरित्यपादानत्वात्पंचमी किंभूतःवागीशः निजेष्टः स्वीयेष्टदेवतारूपः एतेनविशेषतस्त्राणे हेतुर्दर्शितः अत्रभक्तौलतात्वारोपात्ताद्रूप्यरूपकं तच्चन्यौन्याधिक्ययोरभावादनुभयोक्तिरूपं उक्तंच कुवलयानंदे विषय्यभेदताद्रूप्यरंजनंविषयस्ययत् रूपकंतत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिरिति तत्रापिविशेषणाना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लिष्टत्वादुक्तलक्षणकमिदंश्लिष्टरूपकं तत्रापिभक्तौलतात्वमारोप्यतज्जलपयितरिकालिकालेग्रीष्मर्तुत्वारोपात्विभावेषुप
ल्लवत्वारोपाच्चसावयवरूपकमिदं यथा साहित्यसारेरूपकंलक्षयित्वा तस्याष्टविधत्वंप्रतिज्ञाय तद्यथारूपकंसामान्यत
स्त्रिविधमुच्यते अंश्यनंशित्वभेदाभ्यांपरंपरितभेदतइत्याद्यभिधाय आद्यमन्योन्यसापेक्षोत्पत्तिरूपकसंहतिरितिसावयवं
लक्षितं अंशिसावयवंनिरंशिनिरवयवमितिचतत्रैवव्याख्यातं तत्राप्याचार्येषु लतास्वामित्वारोपस्याक्षेपलभ्यत्वादेक

सुमनसामघसंघजयाप्तयेवितनुतेऽतनुतेजासियःप्रभौ ॥
गुरुरलंसकलस्वनिवेदनंपरमसारमसावधिरातुशम् ॥ ३४ ॥

देशविवर्त्यैतत् अतएवरसगंगाधरे यत्रक्वचिदवयवे शब्दोपात्तमारोप्यमाणंक्वचिच्चार्थसामर्थ्याक्षिप्तंतदेकदेशश
ब्दानुपात्तविषयिके अवयवरूपके विवर्तनात्स्वस्वरूपगोपनेनान्यथात्वेनचवर्तनादेकदेशविवर्तीति उभयत्रगीतिरा
र्यावृत्तं ॥ ३२ ॥ ॥ ३३ ॥ ननुजन्मांतरसहस्रेषुतपोध्यानसमाधिभिः नराणांक्षीणपापानांमयिभक्तिःप्रजायते
दानव्रततपोहोमजपस्वाध्यायसंयमैःश्रेयोभिर्विविधैश्चान्यैः कृष्णेभक्तिर्हिसाध्यतइत्यादिषुभगवद्भक्तेरतिदुर्लभत्वकथनात्

For Private and Personal Use Only

पापक्षयेसत्येवतात्सिद्धिकथनाच्च इदानींकलिकालानुकूलकुकर्मकलापकलिलकलितांतःकरणेषुजनेषुकथंतत्प्रचारः संभवतीत्याशं[illegible]त्किसिद्ध्यर्थंभगवदुक्तप्रकारेणपंचविधदोषनिवर्तकमात्मनिवेदनमेवजीवानांकारितं श्रीमदाचार्यैरित्याशयेन[illegible]नामिति मंत्रोपदेशकर्तृत्वाद्गुरुः यःश्रीमदाचार्यः प्रभौसर्वदोषहरणपूर्वकंसर्वोद्धारसमर्थेभगवति आधारत्वविवक्षयास[illegible] सुमनसां पूर्वशरणमंत्रोपदेशेनशुद्धचित्तानां अलंसर्वदोषदाहेपर्याप्तं सकलस्वनिवेदनं ब्रह्मसंबंधमंत्रद्वारासर्वस्वसमर्पणंवितनुते कुरुते सर्वस्वसमर्पणंतुबृहदारण्यकचतुर्थाध्यायेमधुविद्याख्यपंचमब्राह्मणे पृष्ठ ४८७ सवा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानांराजा तद्यथारथनाभौचरथनेमौचाराःसर्वेसमर्पिताएवमेवास्मिन्नात्मनिसर्वाणि भूतानि सर्व एत आत्मानः समर्पिताः ॥ एकादशस्कंधेतृतीयाध्याये इष्टंदत्तंतपोजप्तंवृत्तंयच्चात्मनःप्रियं दारान्सुतान्गृहान्प्राणान्यत्परस्मैनिवेदनमित्यादिश्रुतिपुराणप्रसिद्धं तत्रप्रयोजनं अघेत्यादि अघानांपापानां संघस्यसमूहस्य जयः तत्कर्मकोजयःतस्याप्तयेसर्वांशतोदोषसमूहनिवृत्तयइतियावत् नचात्र कर्मषष्ठ्याःसमासानुपपत्तिःशंक्या कर्मणिचेतिशास्त्रेचशब्दस्येतिशब्दार्थकतयाकर्मणीत्युच्चार्यविहितषष्ठ्याएवसमासनिषेधात् तथाचोभयप्राप्तौकर्मणीतिविहितायाएवषष्ठ्याः समासप्रतिषेधोनतुकर्तृकर्मणोःकृतीतिविहितायाअपिस्पष्टं चेदमथशब्दानुशासनमित्यत्रप्रदीपाविवरणयोः एवंचात्मनिवेदनेनैवसर्वदोषनिवृत्त्याएतत्कालिकानामपिभक्तिः सुलभैवे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिभावः अतएव एकादशस्कंधेएकोनविंशाध्यायेउद्धवंप्रतिभगवान् पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरमितिस्वभ
क्तेःपरमकारणकथनं प्रतिज्ञाय श्रद्धामृतकथायांमेशश्वन्मदनुकीर्तनमित्यादिनातनुजवित्तजसेवादिकमुक्तोपसंहारेप्राह
एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां मयिसंजायतेभक्तिःकोन्योर्थोऽस्यावशिष्यतइति अतआत्मनिवेदनपूर्वकाणामेव
कथाश्रवणादीनांभक्तिसाधकत्वकथनात् युक्तंतस्यतत्प्रतिबंधनिवर्तकत्वं ननुदानादिनादातुर्दोषक्षयेपिप्रतिग्रहीतुस्तदु
द्धववदात्मनिवेदनेनजीवानांदोषक्षयेपिभगवतितत्संसर्गःस्यान्नवेतिसंशये आहुः अतनुतेजसीति किंभूतेभगवति अ
तनु अनल्पं तेजः दोषादिदाहसामर्थ्यंयस्यसतथातास्मिन् विद्यातपोभ्यांतेजस्विनिपात्रेऽपिप्रतिग्रहजन्यदोषासंसर्गस्य
शास्त्रसिद्धत्वाद्भगवतिकुतस्तत्संभावनापीतिभावः अथवानास्तितनुःशरीरंयस्यसोऽतनुरनंगःकामः तस्य तेजइवतेजो
यस्यसतथातास्मिन् तनुःकायेवशेचाल्पेविरलेपिचवाच्यवदितिविश्वः एतेन कंदर्पकोटिलावण्येत्वयिदृष्टेमनांसिनः पी
तांबरधरःस्रग्वीसाक्षान्मन्मथमन्मथइत्यादौबृहद्वामनश्रीमद्भागवतादिषूक्तंकोटिकामाधिकसौंदर्यशालित्वंसंगृहीतं अ
सौश्रीमदाचार्यः परमसारंमोक्षांतसर्वफलापेक्षयोत्तमं शं प्रेमलक्षणभक्तिरूपंकल्याणं अधिरातु अधिकंददातु अस्म
भ्यमितिशेषः रादाने लुग्विकरणः अथवा असावधीतिरात्विति पृथक्पदे अवधिनासहवर्तमानं सावधि तन्नभवतीत्य
सावधि अनंतपुनरावृत्तिशून्यं शं रात्विति संबंधः अथच परमसारमितिनिवेदनस्यापिविशेषणंभवति सर्वसच्छास्त्रेषुसार



For Private and Personal Use Only

त्वेननिरूपितामित्यर्थः अथवा परमःसारोभक्तिलक्षणंबलंयस्मात्तादृशं नायमात्माबलहीनेनलभ्यइत्यादिश्रुतिषुभक्तेरेव बलत्वेनस्वीकारात् यथोक्तं उक्तश्रुतौरश्मिकाद्भिः बलंभक्तिरितिसिद्धांतइति अथात्रगुरुर्बृहस्पतिः गुरुर्गीष्पतिपित्राद्या वित्यमरः सुमनसांदेवानांकर्तृणां सुमनाःपुष्पमालत्योःस्त्रियांनाधीरदेवयोरितिमेदिनी ॥ अघसंघस्यपापदैत्यसमुदाय स्यकर्मभूतस्यजयाऽऽनये प्रभौसर्वश्रौतकर्मप्रवर्त्तनसमर्थेहविःप्रापणसमर्थेवा अतनुतेजासिअनल्पज्योतिषिवन्हौ परम सारं परमःसारोदेवानांबलंयस्मात्तादृशं सारोबलेस्थिरांशेचेत्यमरः सकलस्वनिवेदनं आयुर्वैघृतं तेजोवैघृतं घृतस्यना मगुह्यंयदस्तिजिव्हादेवानाममृतस्यनाभिरित्यादिश्रुतिभिः देवसर्वस्वभूतस्यघृतादेः निवेदनंहोमद्वारासमर्पणंवितनुतेविश्व रूपवद्दैत्येभ्योभागानदत्वादेवेभ्यएवभागान्ददातिसः निरवधि शं ददातु शंनइंद्रोबृहस्पतिः स्वस्तिनोबृहस्पतिर्दधात्वित्या दिश्रुतिभ्यः इत्थमप्रकृतस्यबृहस्पतिवृत्तांतस्यस्फोरणात्समासोक्तिरलंकारः लक्षणंतुकाव्यप्रकाशे परोक्तिर्भेदकैःश्लिष्टैः समासोक्तिरिति एतद्व्याख्यानेश्लिष्टैःसमानैर्भेदकैर्विशेषणैःपरस्याप्रस्तुतस्यउक्तिरितिकमलाकरः गुरुपदस्ययच्छब्दविशे षणत्वान्नाव्याप्तिः अत्रातीतश्लोकयुग्मेरचयतीतिअस्मिन्पद्येचावितनुतइतिवर्त्तमानप्रयोगेणभूतार्थस्यापिकविसाक्षात्कृ तत्वप्रतीत्याभाविकमप्यलंकारः लक्षणंतुकुवलयानंदे ॥ भाविकंभूतभाव्यर्थसाक्षात्कारस्यवर्णनामिति ॥ शब्दालंकारस्तु

१ गुरुशब्दस्यविशेषत्वेतस्यापिश्लिष्टत्वात्प्रकृताप्रकृतश्लेषएवेहस्यादितिशंकांवारयितुमाहगुर्वित्यादि.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यमकं लक्षणंतुममैवग्रंथांतरे भिन्नार्थःसार्थशब्दाद्यवयवोवापुनःक्रमात् यदावर्त्यैतसंघातोव्यंजनानांस्वरैःसह तदातद्य
मकंप्राहुस्तद्द्वेधादंडिनोदितम् वर्णांतरव्यवहितेस्तदव्यवहितेस्तथा श्लोकार्द्धश्लोकपादैकदेशवृत्तितयात्विदं द्विधाप्यनेक
धाशक्यंकर्तुंतांच्चित्यतेयथेत्यादि ॥ तदत्रद्वितीयपादे तनुतेतनुतेइतिचतुर्थपादेरमसारमसाइतिचतकारनकारतका
राणांरेफमकारसकाराणांचव्यंजनानांस्वोत्तरवर्तिस्वरसहितानांतेनैवक्रमेणावृत्तिदृश्यतइतिसमन्वितं इदंच राजी
वराजीवशलोलभृंगमित्यादिवदव्यवहितरूपं त्वदयसदायादवतः पापाटव्यादुरासदायादवतः इत्यादिनलोदयादिप
द्यवद्वर्णांतरैर्व्यवधानाभावात् अतएवास्यद्वैविध्यमाहदंडी अव्यपेतव्यपेतात्माव्यावृत्तिर्वर्णसंहतेः यमकंतच्चपादा
नामादिमध्यांतगोचरमिति अव्यपेतोऽव्यवहितः व्यपेतोव्यवहितइतिव्याख्यातंप्रेमचंद्रेण इदंविस्तरतोऽन्यत्रमयानि
रूपितमितिविरम्यते द्रुतविलंबितंवृत्तं ॥ लक्षणंतु द्रुतविलंबितमाहनभौभराविति ॥ ३४ ॥ किंच नकेवलंब्रह्मसंबंधेन
दोषनिवर्तनमेव अपितुभगवदनुग्रहपूर्वकंतत्स्वरूपानुभवादिकमप्यनेनैवसाध्यतइत्याशयेनाहुः उपदेशेति सःवाक्पति
स्तुष्टःप्रसन्नोस्तुयउपदेशरूपसुधावर्षणेनदैवसृष्टीः लक्षणयादेवसर्गोत्पन्नान्जनान् पुष्ट्या पोषणं तदनुग्रहइतिवाक्या
द्भगवदनुग्रहेण आयोज्य सर्वतोयुक्ताहरेर्भगवतोयत्तत्वंयथार्थस्वरूपविज्ञानंतद्द्रुतीरकृत कृतवान् कः काइव घनोमेघो
विटपिततीर्वृक्षपंक्तीरिव सोपिसर्वदेशसमीपेअमृतस्यजलस्यवृष्ट्या ताः पुष्ट्या पल्लवितफलितत्वादिरूपेणपोषणेनयुक्ताः ॥ ४२ ॥

कृत्वाहरितत्ववतीः हरितस्यभावोहरितत्वंतद्वतीः हरिद्वर्णाःकरोति पयःकीलालममृतमितिपालाशोहरितोहरिदितिचामरः एतेनश्लोकद्वयेन गोविंदघट्टाख्येश्रीयमुनातीरेश्रावणशुक्लैकादश्यामध्यरात्रेश्रीमदाचार्येभ्योभगवतानिवेदनमंत्रमुपादिश्यत मेवमंत्रंजीवेभ्योऽखिलदोषक्षोषायोपदेष्टुमाज्ञप्तमित्यादिवृत्तांतःसंगृहीतः अत्रश्लोके कृतापुष्टिर्यथायस्यावेतिस्पष्टार्थोप लंभात्कृतपुष्टये तिवृष्टिविशेषणंशीघ्रंप्रतिभातितेनक्रियागुप्ताचित्रम् पूर्वोक्तलक्षणकःश्लेषोपमालंकारःसचस्तबकोपमारूपः

उपदेशामृतवृष्ट्याऽकृतपुष्ट्याऽऽयोज्यदैवसृष्टीर्यः ॥
घनइवहरितत्ववतीर्विटपिततीर्वाक्पतिःसतुष्टःस्तात् ॥ ३५ ॥

आचार्यघनयोःदैवजनतरुसमूहयोश्चसाधर्म्यात् उक्तलक्षणकंगीतिरार्यावृत्तं ॥ ३५॥ इत्थंभगवत्तत्वावगमप्रतिबंधकानांजीवदृढदोषाणांपंचविधानामपिलघुनोपायेनात्मनिवेदनरूपेणनिरासंसाश्चर्यमाहुः कलीति यः कलिनाकलुषिताः पातकंतःकृताःयेमनुजनुषोमनुष्याःतान्कृष्णरसेकृष्णस्यभगवतोभक्तिरूपेरसेप्लावयन्निमज्जयन्संन्नपिविमलयतिनिर्मलान्करोति कलुषितइतिपापवाचिकलुषशब्दादशआद्यजंतात्तत्करोतीतिणिचिकर्मणिक्तांतरूपं वक्ष्यमाणेऽर्थांतरेत्वितजंतं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तत्पक्षेकलुषशब्दो गुणपरः अथवा मुख्यपक्षेकलुषवंतः कृताइत्यर्थः तत्करोतीतिणिचिप्रातिपदिकाद्धात्वर्थेबहुलमिष्ठवच्चे ति इष्ठवत्कार्यातिदेशात्विन्मतोर्लुगितिमतुपोलुक् पक्षांतरेत्वाविलपर्यायात्कलुषशब्दादेवणिचिकर्मणिक्तः कलुषंत्वा विलेपापइतिमेदिनी तथाचयत्प्रथममेवकलुषितंमलिनंतस्यपुनःकृष्णरसेश्यामरंगेप्लावनेनविमलीकरणं अतीवाश्चर्यकरं विष्णुर्नारायणः कृष्णइतिकृष्णेनीलासितश्यामकालश्यामलमेचकाइतिचामरः रसोगंधरसेजले शृंगारादौविषेवीर्येतिक्ता

**कलिकलुषितमनुजनुषःकृष्णरसप्लावयनविमलयनियः ॥**
**तमहंचित्रचरित्रंशरणंश्रीवल्लभंकलये ॥ ३६ ॥**

दोद्रवरागयोरितिमेदिनी अतश्चित्रचरित्रं अद्भुतकर्माणं अतएव श्रीवल्लभं भगवदभिन्नं भगवतोविरुद्धधर्माश्रयाद्भुतक र्मत्वात् तंशरणंकलयेव्रजामीत्यर्थः कलेधातोःकामधेनुत्वात् अत्रविमलीकरणरूपकार्यसंपत्तेःश्लेषेणविरुद्धकारणजन्य त्ववर्णनाच्छ्लेषमूलकोविभावनालंकारः विरुद्धाकार्यसंपत्तिर्दृष्टाकाचिद्विभावनेतिकुवलयानंदेतल्लक्षणात् पथ्यार्यावृत्तम् लक्षणंतु त्रिष्वंशकेषुपादोदलयोराद्येषुदृश्यतेयस्याः पथ्येतिनामतस्याश्छंदोविद्भिःसमाख्यातामिति ॥३६॥ अद्भुतचरि ॥ ४३ ॥

For Private and Personal Use Only

त्रत्वमेवपुनराहुस्त्रिभिः द्विजेत्यादिभिः योद्विजराजश्चंद्रोप्यकलंकीलांछनशून्यः द्विजराजःशशधरइत्यमरः किंच कविः शुक्रोपिकृतंदैवस्यदेवसमूहस्यजीवस्यबृहस्पतेश्चभाविकंक्षेमंयेनसतथा जीवःस्यात्त्रिदशाचार्येद्रुमभेदेशरीरिणीत्याभिधानचिंतामणिः भावुकंभविकंभव्यंकुशलंक्षेममस्त्रियामित्यमरः शुक्रोहिदैत्यगुरुस्तत्पक्षपातातिशयादसुरद्विषांदेवानांगुरुत्वेन तदेकपक्षपातिनोधिषणस्यचनकदापिशुभंकरोति अतएवज्योतिर्विदः परस्परस्यशत्रुतांगुरुशुक्रयोर्वदंति अतश्चित्रमि

द्विजराजोप्यकलंकीकविरपिकृतदैवजीवभविकोयः ॥
कृष्णानुराग्यपिशुचिःकृपयतुमयिवल्लभोद्भुतभूः ॥ ३७ ॥

दम् अन्यच्चकृष्णानुरागीश्यामरंगविशिष्टोपिशुचिर्धवलइतिविरोधाभासः वस्तुतस्तुद्विजराजोब्राह्मणराजः अपिपुनः अकलंकी अपवादरहितः कलंकोंकापवादयोरितिहैमः कविर्विद्वान्कवनकर्तावा कविर्वाल्मीकिशुक्रयोः सूरौकाव्यकरेपुंसीतिमेदिनी तथाकृतंदैवजीवानांकल्याणंयेनसतादृशः कृष्णेऽनुरागोभक्तिस्तद्वान् रागोऽनुरक्तौमात्सर्येक्लेशादौलोहितादिष्वितिशाश्वतः सोपसर्गस्यापिरागशब्दस्यरंगपर्यायत्वंतुकुवलयानंदोदाहृते अनुरागवतीसंध्येतिविशेषोक्त्युदाहरणेचांद्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कायांस्फुटं शुचिः शुद्धोग्निरूपोवा शुचिर्ग्रीष्माग्निशृंगारेष्वाषाढेशुद्धमंत्रिणि ज्येष्ठेचपुंसिधवलेशुद्धेऽनुपहतेत्रिष्वितिमेदिनी एवंभूतोद्भुतभूराश्वर्यस्छानंवह्लभोमयिकृपयतु पूर्वश्लोकेशरणगमनमुक्तं तदपिपुष्टिमार्गेऽनुग्रहैकसाध्यमितिकृपेहप्रार्थ्यते उक्तलक्षणकोविरोधाभासोलंकारः समर्थनीयस्याद्भुतस्थानत्वस्याश्लिष्टविशेषणैःसमर्थनाच्छ्लेषमूलकंकाव्यलिंगमपि पूर्ववत्पथ्यायावृत्तं॥ ३७॥ द्विजेंद्रइति द्विजेंद्रोनिशाकरः सहिअजस्रंनक्तंदिवंनप्रकाशते नापिगोसुधां किरणसंबंध्यमृतंप्रवहति

द्विजेंद्रोपिजर्हर्तिजाड्यंजनानांविराजन्नजस्रंझरैर्गोसुधायाः ॥
त्रितापीप्रतापेनवैश्वानरोपिप्रपायादपायात्सवोवल्लभेशः ॥ ३८ ॥

सुधाकरत्वात्तद्वैशिष्ट्यंत्वस्त्येव शीतकिरणत्वान्नजाड्यंशैत्यंहरति प्रत्युततदुत्पादयति अयंतुब्राह्मणेंद्रः अजस्रंसंततं विराजन्दीप्यमानःसन् गोसुधायाझरैः वचनामृतस्यप्रवाहैः करणभूतैः स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले लक्ष्यदृष्ट्यास्त्रियांपुंसिगौरिति प्रवाहोनिर्झरोझरइतिचामरः जनानांजाड्यंजडभावं अज्ञानकृतंमौढ्यंजर्हर्ति अतिशयेनपुनः पुनर्वाहरति तथावैश्वानरोग्निरपि त्रितापी आध्यात्मिकाधिदैविकाधिभौतिकाख्यानांत्रयाणांतापानांसमाहारस्त्रितापी ॥ ४४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तां द्विगोश्चेतिङीप् निजप्रतापेनजर्हति प्राकृतोग्निस्तुस्वतःसंतापकः किंपुनःप्रकृष्टतापेनकरणेन सवल्लभाख्यः ईश्वरः अपायात् स्वरूपाज्ञानप्रयुक्तान्नाशात् प्रकर्षेणपायात् अस्यापायत्वंतुबुद्धिनाशात्प्रणश्यतीत्यादिप्रमाणेषुप्रसिद्धं इह क्रमाच्चंद्रवीतिहोत्रयोः प्रकृत्याशीतोष्णयोर्जाड्यतापहरणविरुद्धमितिविरोधाभासः गोसुधाझरप्रतापरूपयोः प्रतिबंधक योः सत्त्वेपिजाड्यतापनाशाख्यकार्योत्पत्तिवर्णनात्तृतीयाविभावनालक्षणंतुकुवलयानंदे कार्योत्पत्तिस्तृतीयास्यात्सत्य

वागीशितापिकविगीतगुणानुवादोयःसूक्ष्मदृक्सरसिजायतलोचनोपि ॥
स्वायंत्रितोच्युतगुणैरपिनित्यमुक्तोबंधाद्गुणप्रभवतःप्रभुवल्लभोव्यात् ॥ ३९ ॥

पिप्रतिबंधकइति गोसुधाझराणांप्रतापस्यचजाड्यतापत्रययोर्हरणेकारणत्वविवक्षणेतुपंचमीसा लक्षणंतूक्तमधस्तात् भुजंगप्रयातंवृत्तं लक्षणंतु भुजंगप्रयातंभवेद्यैश्चतुर्भिरिति ॥ ३८ ॥ वागिति वागीशिता देवगुरुरपि कविना उशनसा गीतागुणानुवादा गुणस्तावकग्रंथायस्यसः इदंपूर्वोक्तरीतिकाद्वैरान्नसंभवति वस्तुतस्त्वाधिदैविकवाणीपतिः पंडितैः कवयितृभिर्वा गीतगुणानुवादश्च जीवआंगिरसोवाचस्पतिरित्यमरः कविः काव्यस्यकर्तरि विचक्षणेदैत्यगुराविति है

For Private and Personal Use Only

मः अनुवादपदाद्गुणानांतत्रस्वतःसिद्धत्वंनतुप्रशंसार्थमारोप्यमाणत्वमितिद्योत्यते सिद्धस्यकथनमनुवादइतिप्रसिद्धेः
नचानुवादस्यगीतत्ववर्णनंद्वयोरपिधात्वोः समानार्थकत्वात्पुनरुक्तिरूपमितिशंक्यं गुणानुवादपदस्यगुणानामनुवादोय
त्रेतिव्यधिकरणबहुव्रीहिणाअधिकरणार्थघञावाग्रंथार्थकत्वात श्रीभागवतादिषु निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्र
मनोभिरामात् कउत्तमश्लोकगुणानुवादादित्यादौतथावर्णनाच्च किंच सरसिजेकमलेइवआयतेविस्तीर्णेलोचनेयस्यसत
था स्वानंदतुंदिलःपद्मदलायतविलोचनइत्युक्तेः तादृशोपि सूक्ष्मदृक् अल्पनेत्रः वस्तुतस्तु सूक्ष्मंदुर्ज्ञेयमपिवेदशास्त्रादिसर्वं
तात्पर्यंपश्यति जानातीतितथा अथवा सूक्ष्मस्य ब्रह्मणःदृक् ज्ञाता इत्येवविग्रहः दृग्ज्ञानेज्ञातरित्रिष्वित्यमरः एषसर्वे
षुभूतेषुगूढोत्मानप्रकाशते दृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिकठश्रुतिः सूत्रितंचभगवताबादरायणेनआनु
मानिकाधिकरणे सूक्ष्मंतुतदर्हत्वादिति अपिच अच्युतैरत्रुटितैर्गुणैरज्जुभिःसुष्ठुसमंतात्यंत्रितोपिबद्धोपिनित्यमेव
मुक्तः वस्तुतस्तुभगवद्गुणैर्बद्धः स्नेहविशेषात तथापिनित्यमुक्तःईश्वरत्वात् नमेमोक्षोनबंधनमित्येकादशस्कंधेभगवद्वा
क्यात एतादृशःप्रभुःसंसारमोचनसमर्थोवल्लभः सत्वादिगुणत्रयोद्भवात बंधनादभ्यात यःस्वयंदृढरज्जुबद्धोपिसर्वदा
मुक्तःतस्यसामान्यरज्जुजन्यबंधनंतुअतीवसुकरच्छेदमतस्तथाकरोत्विति भावः गुणोप्रधानेरूपादौमौर्व्यांसूदेवृकोदरे
शुल्बेसत्वादिसंध्यादिविद्यादिहरितादिष्वितिविश्वः अत्रवस्तुतोविरोधाभावेपिविरोधस्यप्रथमप्रतीतिविषयत्वाद्विरोधोऽ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लंकारः लक्षणंतुकाव्यप्रकाशे विरोधःसोऽविरोधेपिविरुद्धत्वेनयद्वचइति दृढगुणरूपप्रतिबंधकसत्वेपिमोक्षाख्यकार्यव र्णनादुक्तलक्षणकातृतीयाविभावना दृढगुणबंधनसत्वेपि नित्यमुक्तस्यपरबंधनमोक्षाख्यकार्यकर्तृत्वौ।चित्यात।द्वितीयःस मभेदः सारूप्यमपिकार्यस्यकारणेनसमंविदुरितिकुवलयानंदेतल्लक्षणात् अथवानित्यमुक्तपदस्यसाभिप्रायत्वात्परिकर एवास्तु ॥ ३९ ॥ एवंविरुद्धचरित्रनिरूपणेनभगवत्त्वमुक्तं तस्यापितदेजतितन्नैजाति अणोरणीयान्महतोमहीया

कृष्णोपिवास्तवतयाजनशासनायतत्सेवनादिकृतिमातकुशलंविधित्सुः ॥
आसीन्नृविग्रहइहासुरमोहनायश्रीवल्लभंतमुपयामिपरंकृपालुं ॥ ४० ॥

न् आसीनोदूरंव्रजतिशयानोयातिसर्वतइत्यादीशावास्यतैत्तिरीयकठवल्ल्यादिश्रुतिसिद्धविरुद्धधर्माधारत्वात एवंसतिस्व स्यैवसेवनं किमर्थमित्यत्राहुः कृष्णइति वास्तवतया यथार्थतयाविचारेसाक्षात्कृष्णोपि यःजनानांजन्ममरणशालिनां संसारिणांशासनाय अर्थात्सेवाप्रकारग्राहणायतस्यकृष्णस्यसेवनादिकृतिमान् आसीत् आदिशब्देनश्रवणादयः स वैभक्तिप्रकाराः संगृह्यंते कृतिश्चपुनःपुनरावृत्तिरूपा चतुर्लक्षण्यांतृतीयाध्याये साधनानिव्याख्यायफलाध्यायारंभे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आवृत्तिरसकृदुपदेशातइतिफलमुखतयातथाकथनात् विस्तरस्तुतस्माद्धारतसर्वात्मेत्यत्रसुबोधिन्यांफलाध्यायभाष्ये
चद्रष्टव्यः युक्तंचैतत्स्वसेवादिकरणं कृष्णावतारे दध्यौप्रसन्नकरणमात्मानंतमसःपरमित्यादिनिरूपणवदत्रापिजन
शिक्षाकृतेकृष्णभक्तिकृदितिनामकथनात् यतः कुशलंविधित्सुः तेषांकल्याणंविधातुमिच्छुः अवतारद्वयेप्येवं
करणेहेतुरयमेव नमेपार्थास्तिकर्त्तव्यमित्यादिषुतथानिश्चयात् ननुतर्हिसवैरीश्वरत्वंकुतोनज्ञातमित्याशंक्याहुः न्विति
आसुराणामपिज्ञाने निबंधायासुरीमतेतिस्वप्रतिज्ञाभंगापत्तेस्तन्मोहनायइहअस्मिंल्लोके नृविग्रहः मानुषशरीरधार्य
भूत् पूर्वावतारे अवजानंतिमांमूढामानुषींतनुमाश्रितमित्यादिवदिहापिप्राकृतानुकृतिव्याजमोहितासुरमानुषइत्युक्तेः तं
जीवार्थस्वयमपीदृशानेकश्रमकरणात्परंकृपालुंश्रीवल्लभमुपयामिशरणंगच्छामि अत्र असावुदेतिशीतांशुर्मानच्छेदायसुभ्रु
वामित्यादिवदुक्तलक्षणकोहेत्वलंकारः समर्थनीयस्यकृपालुभावस्यपूर्वार्द्धेसमर्थनात्काव्यलिंगमपि कुशलंविधित्सुरिति
विशेषणस्यसाभिप्रायत्वात्परिकरोपि श्लोकद्वयेपिवसंततिलकावृत्तं ॥ ४० ॥ अथविशेषतःश्रीकृष्णसेवनंक्वश्रीमदा
चार्यैःकृतमित्याकांक्षायामाहुः मुररिपुमिति यःश्रीमदाचार्यः अगराजस्यगिरिराजस्यमस्तकेशिखरेतस्यगोवर्द्धनाचलस्य
मुकुटमिवोल्लसत् उच्चतयाशोभमानं अग्र्यंनवीनंमंदिरंभगवदालयं प्राऽग्र्याऽग्र्याग्रीयमग्रियमित्यमरः विरचय्यका
रयित्वातत्रस्थापितंमुररिपुंश्रीगोवर्द्धनधरंव्यजुषत विशेषणभावपूर्वकंक्रमपूर्वकंचसेवितवान् अत्रगोवर्धनस्यअगराज



For Private and Personal Use Only

त्ववर्णनात् तस्यराजाचिन्हभूतमुकुटधारणमुचितं मंदिरमपिसुधाधवलं मुकुटाग्रवदुल्लसत्कलशं शिखरबद्धं हीरकमुकुटमनुकरोतीतियुक्तंतत्रतत्वसंभावनं तं श्रीमदाचार्यमुपयामीतिपूर्वेणान्वयः कथंभूते गिरिराजमस्तके यत्रव्रतितिततिः लतापंक्तिः पुष्पिताग्रा पुष्पितानिसंजातपुष्पाणि अग्राणियस्यास्तादृशीसतीनित्यंपरिभाति सर्वदामंदिरंमभितः शोभते नित्यमित्यनेनविकासादौऋतुसूर्यादिसंसर्गानपेक्षत्वंलतानांध्वन्यते बृहद्वामनपुराणेउत्तरखिल्ये यत्र

मुररिपुमगराजमस्तकेतन्मुकुटमिवोल्लुसदग्र्यमंदिरंयः ॥
व्यजुषतविरचय्ययत्रनित्यंव्रततिततिःपरिभातिपुष्पिताग्रा ॥ ४१ ॥

गोवर्द्धनोनामसुनिर्झरदरीयुतः रत्नधातुमयःश्रीमानसुपक्षिगणसंकुलइत्यादिष्वत्यलौकिकत्वेनवर्णितेतस्मिन्नेतदसंभावनांनुदयात् पूर्वदिग्विजयेयदागोवर्द्धनधरसमागमोजातस्तदातु सिद्धपांडप्रभृतिभिः कारितेतात्कालिकस्वल्पसेवानिर्वाहकेलघुन्येवमंदिरेभगवंतंस्थापितवंतः अथदिग्विजयादिकार्यसमाप्त्यनंतरंतुप्राच्यदेशवासिनेस्वसेवकंपूर्णमल्लाख्यक्ष

१. पर्युपसर्गार्थोयं.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४७ ॥ त्रियमाज्ञाप्यतत्समर्पितलक्षमुद्राभिर्नूत्नंबृहन्मंदिरंकारयित्वा तत्रभगवंतंस्थापयित्वा चिरंसेवितवंतइतिकथासंक्षेपः
अद्यापितन्मंदिरद्वयंगोवर्द्धनाद्रौप्रसिद्धं अत्र अमुकुटभूतेपिमंदिरेमुकुटतादात्म्यसंभावनादुत्प्रेक्षालंकारः लक्षणंत्वाहदं
डी अन्यथैवास्थितावृत्तिश्चेतनस्येतरस्यवा अन्यथोत्प्रेक्षतेयत्रतामुत्प्रेक्षांविदुर्यथेति तत्रापि उक्तास्पदावस्तूत्प्रेक्षेयं
लक्षणंतुकुवलयानंदस्थमुपन्यस्तमधस्तात् अत्रश्रीगोवर्द्धनधराविषयकरतिरूपस्यभावस्यआचार्यभक्तिरूपभावांगत्वा
त्प्रेयोलंकारः लक्षणंतुसाहित्यदर्पणे रसभावौतदाभासौभावस्यप्रशमस्तथा गुणीभूतत्वमायांतियदालंकृतयस्तदा रस
वत्प्रेयऊर्जस्वित्समाहितमितिक्रमादिति पुष्पिताग्रावृत्तम् चतुर्थचरणांतेतन्नाममुद्रणान्मुद्रालंकारोपि लक्षणंतुकुव
लयानंदे सूच्यार्थसूचनंमुद्राप्रकृतार्थपरैःपदैरिति वृत्तलक्षणंतु अयुजिनयुगरेफतोयकारोयुजितुनजौजरगाश्चपुष्पिता
ग्रेति ॥ ४१ ॥ एवंबहुविधोपदेशेनस्वयमाचरणेनचभक्तिमार्गः सुप्रवर्तितइत्याहुः अदीदृशदिति योगोभिर्वाग्भिःपक्षे
मयूखैश्चभूरिबहुलंमायातमः नामैकदेशेनामग्रहणान्मायावादकृतमंधकारंनिरस्यहरेःपुरुषोत्तमस्यभक्तिमार्गान्श्रवणकी
र्तनादिरूपानेकविधभक्तिप्रकारान् अदीदृशत् दर्शितवान् हरिपदंदेवतांतरव्यावर्तनाय अन्यथा अन्याश्रयदोषःस्यात्
सचानिष्टः आचारप्रकाशादिषुसर्वसाधारणेषुधर्मशास्त्रग्रंथेष्वपिवैष्णवधर्मानुपक्रम्योदाहृतेभ्यः नान्यंदेवंनमस्कुर्यान्ना ॥ ४७ ॥
न्यंमंत्रमुदीरयेदित्यादिकाशीखंडादिवचनेभ्यः जीवाःकृष्णेऽनुरज्यंतेसचैषांदुःखंहरतीतिपरस्परसंभावनेनसत्वरं परमश्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यःसाधकान्मार्गानित्यर्थः भक्तिमार्गाणांबहुविधत्वं भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यतइत्यादिकपिलदेवादिवचनेषु स्फुटं किंचमाययामोहकभगवच्छक्त्याकृतंतमःअज्ञानंविदार्यदैवानांत्हृदब्जकोशान् अंतःकरणकमलमुकुलान् व्यचीकसत् विकासितवान् हृदयंहि अधोमुखमीलितपद्माकारं तैत्तिरीयेनारायणोपनिषदि पद्मकोशप्रतीकाशंहृदयंचाप्यधोमुखमित्यादिनातथाश्रावणात् तच्चोर्ध्वमुखंकृत्वाविकास्यचतत्रहरिंसंतोध्यायंतीतिप्रसिद्धंयोगशास्त्रादौ सआ

अदीदृशद्योहरिभक्तिमार्गान्व्यचीकसद्दैवत्हृदब्जकोशान् ॥
मायातमोभूरिविदार्यगोभिःपायात्सदाचार्यविभाकरोस्मान् ॥ ४२ ॥

चार्यरूपोविभाकरोरविः अस्मान्सदापायात् संश्चासावाचार्यश्चेतिकर्मधारयोवा विभायाः प्रभायाः आकरः खनिरित्याचार्यपक्षेपिविभाकरपदंसंगच्छते मार्गदर्शकत्वंपद्मविकासकत्वंतमोनाशिगवीमत्त्वंचेति धर्मसाम्यात्कृतःसूर्यत्वारोपस्तेजोतिशयंचद्योतयति अभेदरूपकमलंकारः तच्चसावयवं लक्षणंतुकाव्यप्रकाशे तद्रूपकमभेदोयउपमानोपमेययोः समस्तवस्तुविषयंश्रौताआरोपितायदा तिङंतद्वयेपिआचार्यविभाकरपदस्यैवकर्तृतयान्वयात्कारकदीपकमपि लक्षणं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुकुवलयानंदे क्रमिकैकगतानांतुगुंफःकारकदीपकमिति पूर्वोत्तरार्द्धयोःपादाद्यनुप्रासःशब्दालंकारः उपजातिर्वृत्तं ॥४२॥
ननूपदेशेनस्वयमाचरणेनचआचार्याणांसाक्षात्कारेतुजीवोद्धारोभविष्यति परंदूरदेशस्थानांजीवानांतत्तिरोधानानंतरंच
सर्वेषांकथमुद्धारः नचभाष्यद्वयालोकनात्ससाध्यइतिवाच्यं त्रैवर्णिकमात्राधिकारकत्वात्तयोः स्वमार्गेस्त्रीशूद्रादीनामप्यु
द्धार्यत्वेनतेषांतत्राऽसिद्धेः अनेकवादसंकुलत्वेनसुदुरूहत्वाच्च ननुतर्हिलघुग्रंथैरेवंकार्यंसेत्स्यतीतिचेत्सत्यं परंतत्राति

श्रीमद्भागवतार्णवंकरुणयानिर्मथ्यगूढंततःप्रोद्धृत्यार्थपरामृतंपदजुषोदैवानपीप्यन्मुदा ॥
यःश्रीकौस्तुभकंबुकार्मुकमुखैरत्नैःश्रितंश्रीपतितद्वश्यंसकलंचकारकलयेश्रीवल्लभंसर्वदा ॥४३॥

संक्षिप्तत्वादुत्तमानामेवसमग्रंसेत्स्यति नत्वसंभावनाविपरीतभावनानिवृत्तिपूर्वकमुद्धारहेतुभूतंस्वरूपज्ञानादिकंमध्यमा
नामधमानांच दशविधलीलास्वादस्तूत्तमानामप्यवशिष्टः अतःकथंभक्तिमार्गानदीदृशदितिसार्वदिकत्वेनसंगच्छताम्मि
त्याशंकायांविवक्षिताधिकफलसाधकंतादृशग्रंथकरणमाहुः श्रीमदिति तं श्रीवल्लभंसर्वदाकलयेध्यायामि यः अगाध
त्वादिनाश्रीभागवतरूपं अर्णवं समुद्रं कृपया निर्मथ्य गुप्तत्वाद्दुर्लभमपिअर्थरूपंपरामृतमुत्कृष्टपीयूषंश्रीमत्सुबोधिन्या
ख्यव्याख्याकरणेनसूक्ष्मटीकातत्वदीपतत्वप्रकाशसहस्रनामादिप्रणयनेनचतस्मात्समुद्धृत्य पदजुषः चरणसेवकान् श्र

For Private and Personal Use Only

वणार्थस्वाश्रमनिषेविणोवादेवान् मुदा आनंदपूर्वकमपीप्यत् पायितवान् पदंशब्देचवाक्येचव्यवसायापदेशयोः पा
दताच्चिन्हयोःस्थानत्राणयोरंकवस्तुनोरितिमेदिनी अपीप्यदितिपिबतेर्णिचिलुङि लोपःपिबतेरीच्चाभ्यासस्येतिउप
धालोपेपूर्वखंडस्यईदादेशेरूपं अण्यंतावस्थायां कर्तृणांदेवानांगतिबुद्धिप्रत्यवसानार्थेत्यादिनाणौकर्मत्वम् अपिच यः
श्रीकौस्तुभकंबुकार्मुकमुखैः कमलाकौस्तुभमणिपांचजन्यशंखशार्ङ्गधनुरादिभीरत्नैः आश्रितं श्रीपतिं तेषुमुख्यायाल
क्ष्म्याश्वसाक्षात्पतिं सकलंपूर्णं ईदृशानेककलासहितंवाहरिं तद्वश्यं तेषांदेवानामधीनंचकार अर्थपरामृतमित्यत्र अ
र्थेभ्योधर्मादिपुरुषार्थेभ्यः परं उत्कृष्टं अमृतं मोक्षमितिवार्थः इहयथाभगवान्अर्णवंनिर्मथ्यतत्रगूढं अर्थेभ्यःतदानीं
समुद्रोत्पन्नपदार्थेभ्यःपरमुत्कृष्टंयदमृतंसुधा तामुद्धृत्य पदजुषः स्वचरणसेवकान् देवान् देवाएवदैवास्तान् प्रज्ञा
दित्वात्स्वार्थेऽण् तदपाययदित्यप्रस्तुतवृत्तांतस्फूर्त्यासमासोक्तिरलंकारः समासोक्तिःपरिस्फूर्तिःप्रस्तुतेऽप्रस्तुत
स्यचेदितिकुवलयानंदेतल्लक्षणात साचश्रीमद्भागवतार्णवमित्यादिरूपकमूलिकेत्यनयोरंगांगिभावःसंकरः तत्रापिप्र
सिद्धसमुद्रमथनेदेवासुरोरणोऽभूत अत्रतुमुदेव तत्रैकैकेनएकंद्वेवारत्नेलब्धे इहचानेकरत्नाश्रितः सर्वाशिभूतोभगवान्स
र्वै दैवैरितिपूर्वापेक्षयाधिक्यातआधिक्यरूपकमेतत गम्यमानवर्ण्योत्कर्षहेतुयुक्तआधिक्यव्यतिरेकोवा उक्तंचसा
हित्यदर्पणे आधिक्यमुपमेयस्योपमानान्न्यूनताथवा व्यतिरेकएकउक्तेहेतौनोक्तेसचत्रिधा चतुर्विधोपिसाम्यस्यबोध

नाच्छब्दतोऽर्थतः आक्षेपाच्चद्वादशधाश्लेषपीतित्रिरष्टधा प्रत्येकंस्यान्मिलित्वाष्टचत्वारिंशद्विधःपुनरिति शब्दालंकारस्तु
पूर्वोत्तरार्द्धयोरंत्यानुप्रासादिः शार्दूलविक्रीडितंवृत्तम् ॥ ४३ ॥ एवंबहुतरमुद्धारसाधनंविधायानेकधादेवानुद्धरं
तोवसुधातलमलंचक्रुरितिसूचयंतः सर्वोद्धारप्रयत्नात्मतयैवसिद्धंभगवत्त्वंस्फुटीकर्तुंभगशब्दवाच्याऽलौकिकषड्गुणेष्वेकै
कपद्येनैकैकंनिरूपयंतोबव्हारोपपूर्वकंस्तुवंति जाड्यमित्यादिभिः षड्भिः भगवतःषड्गुणास्तुविष्णुपुराणे ऐश्वर्यस्यसम
ग्रस्यवीर्यस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैव षण्णांभगइतीरणेत्यादिपूक्ताःप्रसिद्धाएव तेष्वत्रप्राथमिकत्वादैश्वर्यंनिरू
प्यते इहास्मिँल्लोकेप्रकटं विचित्रं लौकिकाग्निसूर्यापेक्षया विलक्षणं तं गुरुचित्रभानुं प्रक्रान्तत्वातगुरुःश्रीवल्लभाचा
र्यःतद्रूपंचित्रभानुंसूर्यमग्निवावंदे चित्रभानुस्तुहुताशनदिनेशयोरितिहैमः तथाहि यःस्मृतोपिस्मरणमात्रविषयीकृतोपि
पंकानां पापानां ततिं पंक्तिं हरति किंच यः स्मरतां तमः स्वरूपविषयकमज्ञानं जाड्यं अध्यासचतुष्टयकृतंमौढ्यंच
हरति स्मृतिमात्रार्तिनाशनइत्यभिधानाद्युक्तमेतत् लौकिकौ वन्हिसूर्यौतु साक्षाद्भूतावेव पंकततिं कर्दमवि
स्तारं तमः अंधकारं जाड्यं शैत्यंच हरतः पंकोऽस्त्रीकर्दमेपापइति तमोध्वांतेगुणेशोकेक्लीबमितिचमेदिनी जडोमूर्खेहिमा
घातइतिहैमः तथायः प्रतापीप्रभाववान् पक्षेप्रकर्षेणतापकरणशीलोपिदृष्टःसन्नेवदृशोः द्रष्टॄणां नयनयोः शीतलतां कर्पू
रादिशीतवस्त्वंजनजनितशैत्यवत्आनंदातिशयंदिशति समर्पयति वन्हिसूर्यौतुप्रकृष्टतापवत्वात्स्वदर्शनेननयनयोः स ॥ ४१ ॥

न्तापमेवकुरुतःनतुशीतलतां तथा यः पराङ्मुखानां बहिर्मुखानां तापाद्दरंतापहेतुकंभयंपरितनोति परितःविस्तारयति
दरःस्याद्भयगर्तयोरितिहैमः प्राकृतरविहुतवहौतुअभिमुखानामेव यतःस्वयंस्थितौततएवचतापभीतिंकुरुतः अत्रपा
पिनोपि अज्ञानिनोपि मूढाअपि तंस्मरन्तिसचतेषांतंतंदोषंनिराकरोतीतिवर्णनादैश्वर्यमुक्तंभवति उक्तंच धन्यास्तुमूढ
मतयइत्यस्यविवरणेश्रीमदाचार्यचरणैः ईश्वरःपूज्यतेलोकेमूढैरपियदातदेति स्मृतिमात्रेणतमोनाशकत्वादिधर्मैः उपमान

जाड्यंतमोहरतिपंकर्तानिस्मृतोपिदृष्टोदृशोर्दिशतिशीतलतांप्रतापी ॥
तापाद्दरंपरितनोतिपराङ्मुखानांवंदेविचित्रमिहतंगुरुचित्रभानुं ॥ ४४ ॥

तोवैधर्म्यवर्णनात्व्यतिरेकरूपकमलंकारः लक्षणंतूक्तंकाव्यादर्शे इष्टंसाधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः उपमाव्यतिरे
काख्यंरूपकद्वितयंयथेति गौणमुख्ययोरुपमानोपमेययोरितिमालिन्यप्रोञ्छनीकारः वसन्ततिलकावृत्तम् ॥ ४१ ॥
वीर्यवदन्तस्तेजस्त्रयत्वमारोपयान्ति श्रीगोकुलेति योभगवद्भावरूपसुधासमुद्रस्यवर्द्धकत्वाच्चंद्रः इहदेवताविषयारति
र्भावः रतिर्देवादिविषयाव्यभिचारीतथांजितः भावःप्रोक्तइतिकाव्यप्रकाशोक्तेः अप्ययदीक्षितोप्याह देवतागुरुशिष्यादि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जपुत्रादावभिव्यज्यमानारतिर्भावइति एवंविशिष्टवाचकस्यापिभावपदस्यश्रीगोकुलाधिपतीतिपृथक्स्वाधिकरणलाभा
तूरतिमात्रपरत्वम् विशिष्टवाचकानांपदानांसतिपृथक्विशेषणवाचकपदसमभिव्याहारेविशेष्यमात्रपरत्वमितिकाशिका
कारादिसिद्धांतात् तथाचश्रीगोकुलेशविषयिणीरतिर्भक्तिरित्यर्थः श्रीगोकुलाधिपतिपदाच्छ्रीशब्दवाच्यभक्तयुक्तस्यगवा
दिपालकत्वेनसर्वलीलासहितस्यभक्तिरेतन्मार्गेविवक्षितेतिद्योत्यते भक्तेरीश्वरविषयकपरानुरक्तिरूपत्वात्रतित्वमक्षतं
अमृताब्धितादात्म्यंचमृत्युभयहारित्वंअपारत्वंविलक्षणास्वादजनकत्वंचतादृशभावस्यबोधयति अथवासेवासमयेभगव
त्स्वरूपेसेवोपयोगिपदार्थेषुचकर्त्तव्याभावनाविशेषाइहभावशब्देनोच्यंते तेचश्रीद्वारकानाथश्रीहरिरायादिकृतभावनाग्रन्थे
षुप्रसिद्धाः किंच तत्रबाह्यतःप्रतिबंधकर्त्र्योयाःमर्त्यसत्तमानांमनुष्योत्तमानांविपत्तयःतद्रूपांधकारस्यनाशकत्वेनयोविव
स्वान्सूर्यः अन्यच्चयःकलिजकल्मषकाननानांवैश्वानरः अंतःकरणाऽऽवरकत्वेन भगवद्भावानुद्भासकानांकलियुगोत्पा
दितदोषरूपमहावनानांआभ्यंतरबाधकानांदाहकत्वादग्निः गहनंकाननंवनमित्यमरः अतएवतैलंगानांआन्ध्रदेशवासिवि
प्राणांकुलेतिलकः तद्वन्मूर्धाभिनंदनीयोवल्लभः स्वान्स्वकीयान्अस्मान्अवतु तिलकोश्वद्रुमाभिदोःपुंड्रकेइतिहैमः अत्र
सर्वलोकप्रकाशकानांतेजस्त्रयीभूतानांचंद्रसूर्याग्नीनांत्रयाणामपिदेवानांकार्यस्यस्वयमेवाचरणं तथा कलेर्नियमनपूर्वकं
स्वाभीष्टभक्तिवर्द्धनंवर्ण्यतइति कृष्णंनिरीक्ष्यवनितोत्सवरूपवेषमित्यस्यविवरणेदेवेष्वितिकारिकोक्तंवीर्यमवगम्यते



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इहसोमत्वाद्यारोपात्रूपकमलंकारः तच्चपरंपारितम् भक्त्यादिषुसमुद्रत्वाद्यारोपस्यआचार्येसोमत्वाद्यारोपनिमित्तत्वात् तदपिअनेकारोपसत्वात्श्लेषाभावाच्चमालारूपमश्लिष्टविशेषणम् उक्तंचसाहित्यदर्पणे रूपकंरूपितारोपाद्विषयेनिर पन्हवे तत्परंपरितंसांगंनिरंगमितिचत्रिधा यस्यकस्यचिदारोपःपरारोपणकारणं तत्परंपरितंश्लिष्टाश्लिष्टशब्दनिबंधन म् प्रत्येकंकेवलंमालारूपंचेतिचतुर्विधमिति पूर्वोत्तरार्द्धयोरंतेछेकाऽनुप्रासः ॥४५॥ यशआहुः श्रीकृष्णेति श्रीसहि

श्रीगोकुलाधिपतिभावसुधाब्धिसोमोयोमर्त्यसत्तमविपत्तमसोविवस्वान् ॥
वैश्वानरःकलिजकल्मषकाननानांतैलंगवंशतिलकोऽवतुवल्लभःस्वान् ॥४५॥

तस्यभगवतोभक्तिरूपाणांनलिनीनां कमलिनीनां चयस्यसमूहस्यचित्रभानुःसूर्यः तद्विकासकइत्यर्थः चित्रभानुर्विरोच नइतिसूर्यपर्यायेष्वमरः कमलिनीपुमकरंदस्येवकृष्णभक्तिपुरसस्याधिक्यादुभयत्रतापनाशकत्वाच्चतत्रतत्त्वारोपः भ क्तियोगोबहुविधोमार्गैर्भामिनिभाव्यतइतिश्रीकपिलदेववाक्येन श्रवणंकीर्तनंविष्णोःस्मरणमितिप्रल्हादवाक्येनचभक्ती नांबहुविधत्वात्तत्रापिचयपदंसंगच्छते प्रतिबंधकनिवर्त्तनमाहुः पाखंडेति पाखंडवादरूपायेदवावनानि वनेचवनव न्है

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चदवोदावइहेष्यतइतियादवः तेषांदाहेविषयेमहान्समर्थः कृशानुरग्निः अनिष्टनिवर्त्तनमुक्तेष्टप्रापणमाहुः योदैवेति दैव
जनरूपपक्षिणांआश्रयभूतोदेवतरुः यदिपक्षिणःसामान्यमपिसत्फलशालिनंमहावृक्षमाश्रित्यसुख्यन्ति किंपुनःसर्वम
नोरथपूरकंकल्पवृक्षं एवमत्रापिदैवानांसमग्रवांछितावाप्तिस्तस्माद्भवतीतिबोध्यम् एवंविविधविचित्रचरित्राचरणा
त्कीर्तिवितानदक्षः यशोविस्तारणचतुरः श्रीवल्लभोजयतिसर्वोत्कर्षेणवर्तते वर्तमानप्रयोगान्नित्यत्वम् अत्रपक्षिवत्यथा

श्रीकृष्णभक्तिनलिनीचयचित्रभानुःपाखंडवाददवदाहमहाकृशानुः ॥
योदैवदेहिविहगाश्रयकल्पवृक्षःश्रीवल्लभोजयतिकीर्तिवितानदक्षः॥४६॥

र्थस्वरूपमज्ञात्वाप्याश्रयतांदैवानांपाखंडमतखंडनेनतत्रासक्तिनिवार्यविविधभगवदनुरक्तिसंपादनपूर्वकं सर्वमनोरथपूर
कत्वंनिरूपितमितियशोयुक्तमेव गावस्तुकृष्णमुखनिर्गतवेणुगीतेत्यस्यविवरणे यशोयदिविमूढानांप्रत्यक्षासक्तिवारणात्
इत्युक्तेः इहसूर्याद्यभेदवर्णनादभेदरूपकंतच्चमालारूपम् तृतीयचरणेदैवेषुविहगत्वारोपरयआचार्येषुकल्पतरुत्वारोपनि
मित्तत्वात्परंपरितमपि जयतीतिवर्त्तमानप्रयोगेणभूतवृत्तांतस्यापिप्रत्यक्षायमाणत्वातभाविकमप्यलंकारः लक्षणंतूक्तं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काव्यप्रकाशे प्रत्यक्षाइवयद्भावाःक्रियंतेभूतभाविनः तद्भाविकमिति भूताश्चभाविनश्चेतिद्वंद्वः पूर्वोत्तरार्द्धयोः पादांतेछे कानुप्रासः लक्षणंतूक्तंसाहित्यदर्पणकृता अनुप्रासःशब्दसाम्यंवैषम्येपिस्वरस्ययत् छेकोव्यंजनसंघस्यसकृत्साम्यमने कधेति ॥ ४६ ॥ एवंसदास्थितिरुक्ता ननु अत्राज्ञानामप्याश्रयतांपरमकाष्ठापन्नभक्तिप्रकाशनेनाखिलमनोरथपूरण मुच्यते परंआभ्यंतराणांबाह्यानांचबहुविधबाधकानांसत्वात्कथंभक्तेरेवसंभवइत्याशंक्यतान्यपिआचार्यैरेवनिवर्तयिष्य

भक्तालिचिंतानलवारिवाहंभक्तद्विषद्दर्वहव्यवाहं ॥
संस्तौमिसन्मानसराजहंसंश्रीवल्लभंसूरिसभावतंसम् ॥४७॥

न्तइतिवर्णयंतःश्रियमाहुः भक्तेति भक्तपंक्तेर्याश्चितात्मकः संतापकत्वादनलोवन्हिः तस्यवारिवाहं मेघं नवरत्नादिरूप वागमृतेनतच्छामकमित्यर्थः वारिवाट्पदाद्रसंपूर्णत्वंसूच्यते अतस्त्वरितंतच्छांतिरितिभावः एतेनाभ्यंतरविघ्ननिरासः अपरंच भक्तद्विषदिति भक्तैर्वैरायमाणानांदुरासदत्वतत्सरणिनिरोधकत्वादिनादुर्वनतादात्म्यंश्रयतांहुताशंतद्विनाशकमि

१ भक्तिकारुण्येजलंच,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यर्थः एतेनबाह्यानांविघ्नानामपिनिरासःसूचितः तथा सूरिसभावतंसं पंडितसभानांशिरोभूषणरूपंतद्वन्मूर्द्धन्यमित्यर्थः अवतंसोनस्त्रियांस्यात्कर्णपूरेचशेखरेइतिमेदिनी एतेनागंतुकवादभयमपिनिरस्तं अन्यच्च सज्जनानां मानसे हृदि राजहंसं सतिसमीचीनेमानसाख्येदिव्यसरोवरविशेषेराजहंसमिवसत्पुरुषचित्तेविहरंतमित्यर्थः तेनसेवायांप्रवर्त्तनानंतरमपीतरासत्त्यपुनःपातभीतिर्निराकृता मानसंस्वांतसरसोरित्यभिधानचिंतामणिः ईदृशंश्रीवल्लभं सम्यक् कायिकादिप्रह्वीभावपूर्वकं स्तौमि वाचनिकप्रह्वीभावपात्रंकरोमि अत्रैवंसर्वबाधकनिवृत्तिपूर्वकंभक्तानांहृदयेस्वनिवासकरणेनतेषामुत्कर्षापादनाच्छ्रीरुक्ता प्रायोबतांबविहगाइत्यस्यविवरणेश्रियोहिपरमाकाष्ठासेवकास्तादृशायदीतिलक्षणात् इहपूर्ववदश्लिष्टविशेषणंपरंपरितंमालारूपमभेदरूपकमर्थाऽलंकारः तृतीयचरणेतुश्लिष्टविशेषणं मानसशब्दस्यश्लिष्टत्वात् तथा अत्रपूर्वार्द्धपादद्वयांतेयमकम् लक्षणंतूक्तं उत्तरार्द्धपादद्वयांतेअनुप्रासएव इंद्रवज्रावृत्तम् ॥ ४७ ॥ एवंविघ्ननिवृत्तिस्तुस्वतएवभविष्यतीतितामनभ्यर्थ्यसर्वप्रार्थनीयंदास्यमभ्यर्थयमानाःज्ञानंवर्णयंति वेदेति आगमाःशास्त्राणि आदिशब्दात्स्मृतयःतत्र विहितायेउत्तमाउत्कृष्टाः उत्तमस्यविष्णोर्वाधर्मास्तेषांसेतुर्द्धोमार्गस्तद्वत्तत्प्रापकइत्यर्थः तथा मोहेत्यादि मोहागमाःकाणादन्यायादयःतेभ्य उद्गमउद्भवोयस्यैवंविधं यत तमः अज्ञानं पक्षे मोहाएव अगमावृक्षास्तदुद्भवतमोऽंधकारः तच्छमनेधूमकेतुरग्निः निबिडवृक्षसमुदायस्यतमोजनकत्वं वन्हेर्वृक्षादिदाहकत्वंप्रकाशकत्वंतमोनिवर्तकत्वंचप्र



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धम् आगमःशास्त्रआगमेइति स्याद्धूमकेतुरुत्पातभेदेवैश्वानरेपुमानइतिचमेदिनी पलाशीद्रुद्रुमाऽगमाइत्यमरः किंच यःकृष्णेत्यादि भक्तौदृढस्नेहांशसाधिकानांकृष्णस्यकेलीनांलीलानांज्ञानांशसाधकस्य महिम्नोमाहात्म्यस्यचएतद्द्वेहेनानुभवेइतःप्रेत्याऽप्राकृततन्वातत्प्राप्तौचहेतुःकारणं दैवानांनेतुर्नायकस्यतस्य निरंतरंदासभावएवमेस्त्वितिप्रार्थना इदमेवमुख्यम् अतः समग्रभक्तमुकुटाग्रमणीभिर्व्रजरमणीभिः स्यामसुंदरतेदास्यः अशुल्कदासिकाः भवामदास्य

वेदागमादिविहितोत्तमधर्मसेतुर्मोहागमोद्गततमःशमधूमकेतुः ॥
यःकृष्णकेलिमहिमानुभवाप्तिहेतुस्तस्यास्तुदास्यमनिशंममदैवनेतुः ॥४८॥

इत्यादौतदेवप्रार्थितम् पुष्टिमार्गीयोवृत्रोपि अहंहरेतवपादैकमूलदासानुदासोभवितास्मिभूयइत्याद्यवोचत् विचारितमन्यत्रेदमितिकृतंव्याप्तातिवितानेन अत्रस्वभावविजयहेतुवेदादिसिद्धभगवद्धर्माचरणदृढीकरणंप्रमाणांतरानधिगतब्रह्मस्वरूपज्ञापकवेदादेःसमर्थनं मोहार्थतस्यार्थमन्यथायोजयतांकुशास्त्राणांनिरसनंभगवतः केलिमाहात्म्यज्ञानयोरनु

१ मणिशब्दस्यदीर्घांतत्वमपिश्रीनिवासचंद्रादिषुददौसुरमणीभिनेत्यादौप्रसिद्धं.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भावकत्वंतत्प्रापकत्वंचनिरूपितमितिनद्यस्तदेत्यस्यव्याख्याने ज्ञानोत्कर्षस्तदैवस्यात्स्वभावविजयोयदीत्युक्तंज्ञानंस्फुट
मेवप्रतीयते काणादमायावादादीनांमोहकशास्त्रत्वंतुपाद्मवाराहादिषुप्रसिद्धम् तद्वचनानिचस्मार्तादिप्रामाणिकग्रंथेष्व
प्युपलभ्यन्तेअतोनतेषुकल्पितत्वशंकापीत्याद्यन्यत्रविस्तरः अत्रतमःशमनादिविषयभेदेनअग्नित्वाद्यारोपाद्द्वितीयउल्ले
खभेदः लक्षणंतुसाहित्यदर्पणे क्वचिद्भेदाद्ग्रहीतृणांविषयाणांतथाक्वचित् एकस्यानेकधोल्लेखोयःसउल्लेखउच्यतइति
पादचतुष्टयस्याप्यन्त्योऽनुप्रासः वसंततिलकावृत्तम् ॥ ४८ ॥ अथ मनःस्मरेतासुपतेर्गुणानांगृणीतवाक्कर्मकरोतु
कायइतिवृत्रवचनात्प्रह्वीभावस्त्रिविधः तत्रभक्तालीतिश्लोकेसंस्तौमीतिवाचनिकःससुकरत्वात्पूर्वमुक्तः दास्यरूपःकायि
कश्चानुपदमेवदुर्लभत्वात्प्रार्थितः अथावशिष्टंमानसंप्रह्वीभावंसर्वोतरत्वान्निरोद्धुमशक्यत्वाच्चमनसस्तद्द्वयकथनानंतरंव
दंतःक्रमप्राप्तंवैराग्यमाहुः गोपीशेति यःगोपीशपादरूपेअम्बुजनुषिकमलेमधुव्रतोऽलिः भ्रमरस्यकमलइवयस्यभगवच्च
रणेसहजोऽनुरागइत्यर्थः च पुनर्यःतद्वक्त्रेति तस्यश्रीकृष्णस्यैवमुखस्यानिरतिशयतेजस्वित्वादाल्हादकत्वाच्चपूर्णमासीचंद्र
तादात्म्यमाप्तस्यदर्शनरसैकासक्तत्वाच्चकोरः किंच तत्प्रेमेत्यादि निरतिशयस्वादुत्वात्कृष्णप्रेमात्मिकायापीयूषधुनीसुधा
नदी तस्याघनाघनोवर्षुकमेघः तद्वत्तत्पूरकइत्यर्थः तटिनीह्रदिनीधुनी वर्षुकाब्देघनाघनइतिचामरः अतएवसत्पुरुषा
णांप्रीतिपात्रंतंवल्लभमुपैमिशरणंयामि तदेकशरणत्वंहिमनसःप्रह्वीभावः अत्रप्रथमचरणेभगवच्चरणेनैसर्गिकप्रीतिः द्वि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीयपादेचकोरवदितरत्रविरक्तिः तृतीयपादेभगवदभिलषितायाभक्तेर्वर्द्धकत्वकथनात्हरेरपिसंतापहरणम् चतुर्थपादे भगवतेस्वसर्वस्वनिवेदनेनतादृशमहानुभावप्रीतिपात्रत्वंचवर्णितमितिदृष्टातपेव्रजपशून्सहरामगोपैरित्यस्यविवरणेहरेश्च रणयोःप्रीतिःस्वसर्वस्वनिवेदनात् उत्कर्षश्चापिवैराग्येहरेरपिहारियदीतिकारिकोक्तंसमग्रमपिवैराग्यंनिरूपितंभवति ए तदन्तेव्याख्यातश्लोकपंचकेप्रायःपूर्वश्लोकोक्तउल्लेखोऽलंकारः विश्वनाथमतेनतुमालारूपंरूपकंवा इंद्रवंशावृत्तम् ॥४१॥

गोपीशपादांबुजनुर्मधुव्रतस्तद्वक्त्रपूर्णेंदुचकोरकश्चयः ॥
तत्प्रेमपीयूषधुनीघनाघनःसत्प्रीतिपात्रंतमुपैमिवल्लभम् ॥४१॥

नन्वेवंकृतेपित्रिविधभक्तीभावे जीवकर्तृकस्यतस्याल्पयिस्त्वात्कथंतावन्मात्रेणसर्वथासर्वफलप्राप्तिः प्राप्तेचफलेकथं तस्यनित्यत्वमित्याशंक्यकल्पद्रुमत्वात्समग्रमनोरथसंपत्तिः अलौकिकत्वात्तद्दत्तस्यपुनरनुच्छेदश्चेत्याभिप्रायेणाहुः यः स्मृत्येति तंगुरुंस्वाचार्यरूपंसर्वमनोरथपूरकत्वाद्देवतरुंकल्पद्रुमंभुविवर्त्तमानंसदासेवेआश्रये अथवा गुरुमेवतरुं प्रसंगात्कल्पवृक्षंसेवेतएवभजेदेवेतिश्रोतृनुद्दिश्यविधिः चक्षिङोङित्करणाज्ज्ञापकादनुदात्तेत्वलक्षणस्यात्मनेपदस्यानित्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथासेवते:परस्मैपदमविरुद्धम् सकलसिद्धिदासेवतां सेवतांभुक्तिमुक्तिदेत्यादिवत् अथद्रुमाणांजडत्वादुपमेयोपितथा
त्वंसंभाव्येतेतितद्व्युदसितुमाहुः चिदानंदस्वरूपमिति चिदानंदात्मकं नतुवृक्षवत्सदंशमात्रविशिष्टं भगवताहिसृष्टिकाले
एकोऽहंबहुस्यामितिबहुत्वइष्टेशुद्धाद्वैतेस्वात्मनिभेदात्यंताभावाद्भेदंविनाबहुत्वासंभवात्तत्सिद्धयैस्वरूपभूतसच्चिदानंदेभ्य.
जडाःजीवाःअंतरात्मानश्चेतित्रिविधानंशानाविर्भाव्यतत्रोत्तरोत्तरांशास्तिरोभाविताः तिरोसानीतिपुरुषविधब्राह्मण
श्रुतेः अतोजडेसदंशःप्रकटःइतरावाच्छन्नौ जीवेत्वानंदस्तिरोहितःपूर्वांशौस्पष्टौ अंतर्यामिणित्रयमपिस्पष्टमितिविवेकः
सदादीनांस्फुटलक्षणंतुमदीयेवेदांतचिंतामणौ सन्नामविद्यतेचिच्चचैतन्येनप्रकाशते आनंदःप्रियतातीवेत्येषांप्रत्यक्ष
लक्षणमिति एवंकृतेपिवास्तविकभेदस्तुशुद्धाद्वैतचंद्रोदयेमाध्वनिरासाकिरणेनिराकृतोमयेत्यलंप्रासंगिकोह्लेखेन प्रकृत
मनुसरामः एतेनसच्चिदानंदरूपत्वात्पुरुषोत्तमत्वमुक्तंभवति किंच सकलपद्रुस्तुस्वर्गएवायंतुभुव्यपीत्याधिक्यम् कल्पवृ
क्षादाधिक्यमेवप्रपंचयन्ति स्मृत्येत्यादिना यःअक्षय्यार्थचतुष्कदः क्षेतुमशक्यान्धर्मार्थकाममोक्षाख्यांश्चतुरःपुमर्थान्द
दातीतितथा क्षय्यजय्यौशक्त्यार्थइतिवार्तिकेनायादेशनिपातः सुरद्रुस्तुत्रिवर्गमेववितरति तमपिनश्वरं किंचयःसुम
नसां विदुषां शुद्धचित्तानांवा चूडामणिः शिरोरत्नं तद्वन्मूर्द्धन्यइत्यर्थः एतेनप्रथमपुरुषार्थसंपत्तिर्दर्शिता चित्तशुद्धेर्धर्म
कार्यत्वात् धर्मश्चात्रभगवद्दास्यरूपोमुख्यतयाज्ञेयः द्रुमस्यतु सुमनसःपुष्पाणिचूडामणयोभवन्ति उपरिविकस्वरत्वात् ॥५४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नत्वेषामर्यं सुमनाःपुष्पमालत्योस्त्रिदशेकोविदेपिचेतिविश्वः अपिच यः श्रीकृष्णं लीलांसहितं पुरुषोत्तमं इहआस्मिँल्लोकेआनीतवान् तेनार्थोपलंभोदर्शितः सिद्धांतेभगवतएवार्थत्वेनोरीकारात् दिव्यतरुस्तु भगवताभुवमानीतःनतुतेनसः इतरत्र यस्यपदरजः चरणरेणुः द्विजानांआल्या त्रैवर्णिकानांतत्याश्रितं श्रीमदाचार्याणांभगवद्दर्शकत्वात्तद्दिदृक्षुभिस्तैरा

यःस्मृत्यापिभवातपक्लमशमःसन्नन्दनोत्पादकोयःश्रीकृष्णमिहान
यत्पदरजोयस्यद्विजाल्याश्रितम् ॥ अक्षय्यार्थचतुष्कदःसुमनसां
चूडामणिश्चित्रभृत्सेवेदेवतरुंगुरुंभुविचिदानंदस्वरूपंसदा ॥ ५० ॥

श्रयीकृतामित्यर्थः अनेनकामप्राप्तिर्दर्शिता तस्यासिद्धांतेहरिदिदृक्षारूपत्वात् यद्यप्याचार्याःशूद्रादिभिरप्याश्रिताःस्त्रीशूद्राद्युद्धृतिक्षमत्वात् तथापिसूत्रभाष्यश्रवणादौत्रैवर्णिकानामेवाधिकारइत्यभिप्रेत्यात्रद्विजाल्येत्येवोक्तम् अमरमहीरुहस्यतुपदस्यस्थानस्यालवालस्यवारजःधूलिर्द्विजैःपतत्रिभिरलिभिःषट्पदैश्चनाश्रीयतेतत्तदभिलषितानांफलादीनांपरागवत्पुष्पा

१ श्रीशब्दफलितार्थोयम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णांचशाखासुसत्वात् पदंव्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु दंतविप्रांडजाद्विजाइतिचामरः उपनयनाख्यद्वितीयजन्म
सत्वाद्द्विजशब्दःक्षत्रवैश्ययोरपिप्रसिद्धः अन्यच्च यः स्मरणेनापि भवातपक्लमशमः संसाररूपाहुःसहसूर्यप्रकाशाज्जन्या
याम्लानिस्तच्छामकः एतेनमोक्षदानंदर्शितम् तस्यसर्वेंद्रियैःकृष्णसंबंधरूपत्वात् सचतत्तदध्यासजनकस्वरूप
विस्मारकाहंताममतात्मकस्यसंसारस्यनिवृत्त्याभगवत्संबंधित्वस्यस्फूर्तौ जीवादिपंचकेक्रमादानंदादिपंचकाविर्भावात्सं
पद्यतइतिसर्वमवदातम् एतावतार्थचतुष्टयमप्यतोलभ्यतइतिसिद्धम् एषांचलौकिकधर्मादिभ्योविलक्षणत्वादक्षय्यत्वम्
अर्थकामयोराकांक्षणीयत्वंच एतच्चतुष्कस्वरूपंतुश्रीमत्प्रभुचरणैर्वृत्रासुरचतुःश्लोक्यामेकैकस्मिन्पद्येएकैकपुमर्थस्फुटी
कुर्वद्भिः पुष्टिमार्गेहरेर्दास्यंधर्मोर्थोहरिरेवहि कामोहरिदिदृक्षैवमोक्षःकृष्णस्यचेद्ध्रुवमितिलक्षणकथनपूर्वकंप्रदर्शितम् अ
परंच यः सन्नन्दनोत्पादकः स्वयंभक्तिप्रदानात्सतामानन्दजनकः तेनपंचमपुमर्थोपिसंगृहीतः अथवासत्पुत्रप्रादुर्भाव
कः अतःस्वतिरोभावेपिप्रभुचरणादिद्वारापंचमपुरुषार्थभूतभक्तिसहितंचतुष्टयंसर्वंददातीतिफलितम् त्रिदशशाखीतु
समीचीनेनन्दनाख्येस्वर्गोपवनेनिष्पन्नोनतुस्वयंतदुत्पादकः अतएवचित्रभृत् आश्चर्यपोषकः एवंकल्पद्रुमत्वेपिवैल
क्षण्यात् तथाचाभीप्सितंलप्स्यतएवेतिपूर्वेणानुसंधानम् अत्रसच्चिदानन्दपूर्णत्वाद्युत्कृष्टधर्मप्रतिपादनादाधिक्यपर्यवसा
यिअभेदरूपकम् तच्चकल्पवृक्षविरुद्धधर्मप्रतिपादनाद्विरुद्धरूपकंव्यतिरेकरूपकंवा लक्षणादिकंतूक्तंश्रीमल्लक्ष्मणेत्यादौ



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मरणमात्रेणाप्यातपनाशकत्ववर्णनाद्द्वितीयोविभावनाभेदः लक्षणंतुकुवलयानंदे हेतूनामसमग्रत्वेकार्योत्पत्तिश्चसामते
ति दंडिमतेतु विशेषोक्तिरियं स्वतलस्थितिरूपसाधनवैकल्येपिआतपशमनवर्णनेनवर्ण्यप्रभावातिशयाख्यविशेषप्रका
शनात् उक्तंचतेन गुणजातिक्रियादीनांयत्तुवैकल्यदर्शनम् विशेषदर्शनायैवसाविशेषोक्तिरिष्यते नकठोरंनवातीक्ष्णमा
युधंपुष्पधन्वनः तथापिजितमेवासीदमुनाभुवनत्रयमित्यादि नचेहतैक्ष्ण्यकाठिन्ययोःकंठरवेणनिषेधात्प्रकृतेचतदभावा
दलंकाराभावःशंक्यः अपिशब्दबलेननिषेधस्यगम्यमानत्वात् उक्तकारिकाव्याख्यानेमालिन्यप्रोंच्छिन्यांअत्रगुणजाति
क्रियाःक्वचिद्वर्णनीयगताःक्वचित्तदीयोपकरणगताश्चबोध्याः गुणादिवैकल्यंक्वचिच्छाब्दंक्वचिद्गम्यमितिप्रेमचंद्रोक्तेः
सन्नंदनोत्पादकइत्यत्रषष्ठोविभावनाभेदः लक्षणंतुकुवलयानंदे कार्यात्कारणजन्मापिदृष्टाकाचिद्विभावनेति शार्दूलविक्री
डितंवृत्तम् ॥ ५० ॥ एवंस्तुत्वातादृशचरित्रैर्विप्रकुलमुज्ज्वलीकृतमित्याशयेनाहुः सत्पात्रेति स महीसुराणां कुले वंशे
वृन्देवा श्रीवल्लभाख्यो दीपकः अलमत्यर्थं चकास्ति दीप्यते भगवज्ज्ञानहेतुत्वात्तद्विरहोद्दीपनाद्वादीपकत्वम् दीपोपि
प्रियातेजसाप्रकाशकत्वाद्वल्लभोभवतिइदमेवश्लेषेणसमर्थयन्ति सत्पात्रेत्यादिविशेषणत्रयेण यःसत्पात्राद्योग्यरूपाल्ल
क्ष्मणभट्टादुदितः आविर्हितः यद्वा सत्पुरुषाणां पात्रा पालकेन भगवता हेतुभूतेनउदयंप्राप्तः यस्यप्रसादाद्वागीशाइतिपुरु
षोत्तमनामसहस्रेतैरेवकथनात् अथवा सत्पात्रा सत्पालकेन समीचीनंसोमादिहविःपिबतीतितादृशेनवायाज्ञियवन्हि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाउदितउक्तः प्रादुर्भविष्यत्तयानिरूपितइतियावत् कूटस्थयज्ञनारायणभट्टैःसोमयज्ञेक्रियमाणे भवत्कुलेभगवान्प्रादु र्भविष्यतीत्यग्निकुंडाद्बागुत्पत्तेः ततःपुरुषपंचकेनसमापितेसोमयज्ञशतकेआविर्भावाच्च अग्नेःसत्पालकत्वंतु अग्नेत्वंपार याचब्धोअस्मानित्यादिश्रुतिषुस्पष्टम् यद्वा समीचीनंसोमरसंपिबन्ति सतोविदधर्मान् धार्मिकांश्चवापालयंतिते सत्पाः देवाःपिबतेःपातेर्वाक्विप् तांस्तद्धविःप्रापणेनत्रायतेसःसत्पात्रोवीतिहोत्रः तेनोक्तस्तस्मादुदयंगतोवा स्वस्याप्यग्निकुंडा

सत्पात्रोदितउल्लसद्गुणयुतःपूर्णोऽच्युतःस्नेहतश्चित्रःपात्रमतापयन्
विपुलयन्स्नेहंगुणंस्वच्छताम् ॥ तन्वन्विश्वतमश्चयंव्यपनयन्नक्तं
दिवंदर्शयन्सर्वार्थान्सचकास्त्यलंद्विजकुलेश्रीवल्लभोदीपकः ॥ ५१ ॥

देवभाकस्यात् अथवास्वयमेवदेवत्रः अदितःकेनाप्यखंडितश्च दोअवखंडनेदिवादिः एवमत्रस्तोत्रेऽनेकत्रानेकार्थसंभवे पिविस्तरभयात्क्वचित्क्लेशनिवेशभयाच्चाविरम्यते किंच उल्लसद्गुणयुतः उत्कृष्टगुणवान् अपिच अच्युतस्य भगवतः ॥५६॥ स्नेहेनानुरागेणपूर्णः दीपेपिवस्तुत्रयंभवति भांडवर्तिस्तैलंच तत्पक्षेपिसत्पात्रेआच्छिद्रंभाजने उदितः उल्लसद्गुणयुतः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उन्नतमुखवर्तियुक्तः अच्युतेन च्यवनरहितेनस्नेहेनतैलेनपूर्णश्चेतिविशेषणत्रयार्थः पात्रंतुकूलयोर्मध्येपर्णेनृपतिमंत्रि
णि योग्यभाजनयोर्यज्ञभांडेनाख्यानुकर्त्तरीतिहैमः गुणोमौर्व्यामप्रधानेरूपादौसूदइंद्रिये त्यागशौर्यादिसत्वादिसंध्याद्या
वृत्तिरज्जुषु शुक्लादावपिवर्त्यांचेतिमेदिनी स्नेहस्तैलादिकरसेद्रव्येस्यात्सौहृदेपिचेतिविश्वः एवंसामान्यमुक्ताधिक्यमाहुः
चित्रइति आश्चर्यकृत् चितंबुद्धिर्ज्ञानंवात्रायतइतितथा प्रेक्षोपलब्धिश्चित्संविदितिबुद्धिपर्यायेष्वमरः वैचित्र्यगर्भंवि
शिषन्तिपात्रमित्यादिना पात्रमतापयन् योग्यमपीडयन् तथा स्नेहं भगवदादिविषयकमनुरागं गुणं विद्यादिरूपंच
विपुलयन्वर्द्धयन् तथा स्वच्छतां हरेःसेवादिनामनःप्रभृतीनामत्यंतनिर्मलत्वंतन्वन्विस्तारयन् तथा विश्वतमश्चयंव्य
पनयन् समग्रलोकानामज्ञानसमूहंदूरीकुर्वन् तथा नक्तंदिवं अहर्निशं सर्वार्थान् सर्वेषांवेदादीनांअर्थान्सर्वांलौकिक
वस्तूनि वा दर्शयन् वाचाप्रकाशयन् सन् अथवा सर्वपुमर्थान् विविच्यदर्शयन् चकास्ति प्रकाशतइतिसंबंधः नक्तं
दिवमितिचकास्तीत्यनेनाप्यन्वेति दीपस्तुपात्रंभाजनंतापयति स्नेहंतैलंगुणंवर्तिकांचनाशयति कज्जलोत्पत्त्यामलिन
तांतनुतेनतुस्वच्छतां एकगृहस्यैवान्धकारंहरति नतुविश्वस्य रात्रावेवचसमीपवर्त्तिनःकांश्चिदेवचार्थान्पदार्थान् दर्श
यतिनतुनक्तंदिवंसर्वार्थान् स्वयंचरात्रावेवभातीतिवर्ण्यस्योत्कर्षः अत्राभेदरूपकमलंकारः तच्चप्रथमचरणेसमम् अच्यु
तस्नेहवैशिष्ट्यवर्णनेत्वाधिक्यपर्यवसायि पात्रमतापयन्नित्यत्रदीपकार्यस्याकरणवर्णनाद्विरुद्धरूपकम् उक्तंचदाण्डिना

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमीलयतिपद्मानिनभोऽप्यवगाहते स्वन्मुखेन्दुममासूनांहरणायैवकल्पते अक्रियाचंद्रकार्याणामन्यकार्यस्यचक्रिया अत्रसंदृश्यतेयस्माद्विरुद्धंनामरूपकमिति अग्रेतुव्यतिरेकरूपकं लक्षणतूक्तं दीपत्वरूपकारणसत्वेपिस्नेहक्षयाद्यभाव वर्णनाद्विशेषोक्तिध्वनिरपि लक्षणंत्वलंकारशेखरे कारणेसत्यपिकार्याभावोविशेषोक्तिरिति विश्वनाथाप्पयदीक्षितादीनांसर्वेषांनव्यानामिदमेवमतमित्यलम् शार्दूलविक्रीडितंवृत्तम् ॥ ५१ ॥ एवंकुलोज्ज्वलत्वमुक्त्वाविवाहचरित्रंसोपोद्घातमाहुः यस्येत्यादिभिश्चतुर्भिः यद्यपीदंद्वितीयदिग्विजयान्तःपातितथाप्यत्रप्रत्येकंवैशद्येनतद्वर्णनाभावात् अनुपदंवक्तव्येप्रभुप्राकट्येउपयोगित्वाच्चेदमिहोपन्यस्तम् प्राकट्यस्यदिग्विजयानंतरंजातत्वात् चरित्रंत्वेतदेवं द्वितीयदिग्विजये दक्षिणादिगुद्दामदुर्वादान्व्युदस्यन्तः श्रीमदाचार्याः यदास्नेहातिशयात्पांडुरंगविट्ठलनाथदिदृक्षयातत्स्थानमाव्रजन्तिस्म तदातदागमंविबुध्यसखिस्नेहातिशयपरतंत्रोभाविसमागमाभिलाषादतित्वष्टोऽभिमुखमायन्विट्ठलेशप्रभुरपियावत्पारेचंद्रभागमागतस्तावदितरेतरंदृग्गोचरीकृत्यकृतकृत्यतांमन्वानौअन्योन्यंलौकिकलीलयागाढमालिंग्यकुशलमनुयुंजानौसुचिरौत्कंठ्यादुचितरचितरोमांचप्रपंचकंचुकौपरमांमुदंसमुदंचयामासतुः तदनुविट्ठलनाथोपिहर्षाश्रुपाथोवर्षावलितविलोचनःस्वसमावस्थंपुरोवस्थंआचार्यमिदमूचेतवमैत्र्याःसु[1]तत्त्वमवगतोपिपुनःसु[2]तत्त्वमिच्छाम्यतोवस्तुतस्तुस[3]भाऽऽर्यो[4]पिभूयःसं



---

१ सुष्टुतत्वं. २ सुतभावं. ३ सभासुश्रेष्ठः. ४ भार्यासहितः कृतोद्वाहइत्यर्थः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भार्योभवतुस्वतःशुभवामपिभवानिति ततःश्रीवल्लभोपिदुर्लभस्ववल्लभसततसंगतिहेतुतयावितितसौख्यकरींगिरंतामुरसि कुर्वन्सर्वंतत्रैत्यंरीत्याविधायउर्वरितोर्वीतलपरिक्रमणक्रमेणवाराणसीतलमलंकुर्वाणः केनाचिदान्ध्रधरणिगीर्वाणेनाविट्ठलभेर्यमाणेनस्वयमर्प्यमाणामङ्गीचकारागण्यगुणपुण्यांमहालक्ष्मीनाम्नींमहीसुरकुमारीगणशिरोमणीं रमणीयतरांरमणीमितिएतदेवसर्वसंक्षिप्यचतुर्भिःश्लोकैर्वदिष्यंतःश्रीविट्ठलनाथेनसमागमंवर्णयंति यस्यागंतुरितिद्वाभ्याम् विप्रयोगोविरहः

यस्यागंतुर्विप्रयोगप्रियस्याप्यागाद्रागाद्विप्रयोगासहिष्णोः ॥
भूयोहर्षात्संमुखंविठ्ठलेशोवंदेऽमन्दानंदमंदारमीशम् ॥ ५२ ॥

प्रियोभिलषितोयस्यैवंविधस्यापिरागात्स्नेहाद्धेतोःविप्रयोगासहिष्णोरितिविरोधाभासः परिहारस्तुविप्राणांब्रह्मविदांब्राह्मणानांयोगःसमागमःसप्रियोयस्य अथवा विप्राश्चयोगश्चित्तवृत्तिनिरोधश्चतोप्रियायस्येतितथा तस्य तथास्नेहवशाद्भगवद्विरहासहनशीलस्येति अतएवभूयःपुनरप्यागंतुःपांडुरंगपुरमागच्छतः यस्याचार्यस्य संमुखं अभिमुखंविट्ठलेशः पांडुरंग

---

१ पांडुरंगपुरेकर्तव्यंयात्राश्राद्धादिकं.

For Private and Personal Use Only

विठ्ठलनाथाख्यस्तत्स्थलाधिष्ठाताभगवान् हर्षातभाविसमागमप्रयुक्तादाल्हादात् आगात् आगच्छतिस्म अथवा भूयो हर्षादित्येकंपदम् अधिकतराल्हादादित्यर्थः तमितिशेषः तं ईशं सर्वसमर्थमाचार्यं वंदे अभिवादये कीदृशं तं अमन्देति अनल्पाल्हादस्य मंदारं कल्पवृक्षं यथेष्टमपरिमिततद्दातारमित्यर्थः यद्वा समागमप्रयुक्ताऽमन्दाल्हादेनकृत्वामन्दः अत्वरःआरोगतिर्यस्यैवंविधं तदानीमत्युदीर्णप्रेमभारपरतंत्रतयाशिथिलगातिमित्यर्थः अत्रपूर्वार्द्धेउक्तलक्षणकोविरोधाभासः मुख्यालंकारस्तुद्वितीयःप्रहर्षणभेदः समागममात्रस्यवांछितत्वेतदधिकस्याभिमुखागमनरूपार्थस्यलाभात् लक्षणंतुकुवलयानंदे वांछितादधिकार्थस्यसंसिद्धिश्चप्रहर्षणमिति शालिनीवृत्तम् लक्षणंतु शालिन्युक्ताम्तौतगौगोऽब्धिलोकैरिति ॥ ५२ ॥ अभिमुखागमनमुक्तासमागमप्रयुक्तानानंदंवर्णयंतःउभावपिनुवन्ति पुलकिताविति आचार्यविठ्ठलौ श्रीमद्वल्लभाचार्यश्चश्रीपांडुरंगविठ्ठलनाथश्चेत्येतौद्वौमुदा समागमावसरध्यानजनिताऽऽनन्देन नुमःस्तुमः बहुवचनंशिष्यादिसाहित्याभिप्रायं कीदृशौतौ संगतौ अन्योन्यसमाजिगमिषयाअभिमुखमागम्यचन्द्रभागातीरेमिलितौ अथवा संगताविति सप्तम्यन्तंपदम्प्रमुदिताविस्यनेनान्वेति अत्रहेतुः स्नेहेति स्नेहेनपरस्परविषयकनैसर्गिकानुरागेणसंयतौ बद्धाविववर्तमानौ बद्धेकीलितसंयताविस्यमरः स्नेहचिन्हान्येवाहुर्विशेषणचतुष्टयेन पुनःकीदृशौतौ मिथःसमालिंगितौ सम्यक्गद्गदगिरा इतरेतरस्यकुशलानुयोगपुरःसरं परस्परेणाश्लिष्टौ तथा पुलकितौ संजातरोमांचौ तथा मिथःप्रकाटि



For Private and Personal Use Only

ताशयौ अन्योऽन्यस्याग्रेव्यक्तीकृतौस्वस्वाभिप्रायौयाभ्यांतौ आशयश्चात्रसुतोभाविष्यामीत्यादिरूपः मिथपदंदेहली दीपकवदुभयत्रान्वेति नन्वीश्वरत्वान्नित्यमवियुक्तयोरपिकिमर्थमियंलोकवल्लीलेत्याशंक्यहेतुगर्भंविशिंषंति जनेति जनानांमुहुर्मुहुर्जन्ममरणशालितया आब्रह्मभवनात् पुनरावर्तिनांलोकानांहिते नसपुनरावर्त्ततइत्यादिदहरविद्यादिश्रुतिभिः पुनरावृत्तिशून्येमोक्षलक्षणे श्रेयसि उद्यतौ तत्संपादयितुंकृतोद्योगावित्यर्थः श्रेयःप्रेयसोर्विवेकःकठवल्लीषुद्वितीयवल्ल्या

पुलकितौसमालिंगितौमिथःप्रकटिताशयौस्नेहसंयतौ ॥
जनहितोद्यतौसंगतौनुमःप्रमुदितौनिजाचार्यविठ्ठलौ ॥ ५२ ॥

मवलोक्यः पुनःकिंभूतौप्रमुदितौ एवंजनोद्धारार्थंअवतारादिनिश्चित्यप्रकर्षेणहृष्टौ अत्रसमागमकालिकमित्रस्वभाववर्णनात्स्वभावोलंकारः यस्यवस्तुनोयत्स्वभावतातदाख्यानंस्वभाव इत्यलंकारशेखरेतल्लक्षणात् इममेवविश्वनाथादयःस्वभावोक्तिपदेनव्यवहरंतिविनायत्नमुभयोराशयप्रकटनजनाहितकरणादिवांछितार्थप्राप्तिवर्णनात्प्रहर्षणभेदोपि लक्षणंतुकुवलयानंदे उत्कंठितार्थसंसिद्धिर्विनायत्नंप्रहर्षणमिति कनकमंजरीवृत्तम् लक्षणंतुग्रंथांतरे इहनरौरलौगोरसैःशरैः

कनकमंजरीसंरतामतीति ॥ ५३ ॥ अथश्रीविठ्ठलनाथाज्ञारूपहेतुसहितंविवाहकरणमाहुः तंनौमीतिद्वाभ्याम् यद्यपि
स्वभक्ताखिलदुःखहर्तुर्भगवतोलीलाएवैकोमुख्यःकेवलोवा योरसस्तेनपूर्णःएकेमुख्यान्यकेवलाइत्यमरः अर्थात्गार्हस्थ्य
प्रवृत्तिप्रयोजकप्राकृतविषयासक्तेर्गंधेनाप्ययुक्तः तथापिविठ्ठलेनतवसुतः रयां तथा तदनुसारेण कुरु परिणयेतियावत्
इति ह स्फुटमुक्तःसन् योद्वितीयमाश्रमं गार्हस्थ्यलक्षणंद्वितीयाश्रममशूशुभत अस्यकाव्यस्यकवयोनसमर्थाविशेषणे साधो
रिवगृहस्थस्यशेषास्त्रयइवाश्रमाइतिभारतारंभादिषुप्रशंसनात्सर्वैगार्हस्थ्याश्रमेणशोभन्ते अयंत्वीश्वरत्वात्प्रत्युततंशोभि
तवान् तंश्रीमदाचार्यंनौमिस्तौमि तथाचश्रीविठ्ठलाज्ञापालनायवक्ष्यमाणरीतिकलोकोपकारायचगार्हस्थ्यमंगीकृतवंतोन
तुप्राकृताऽऽसक्त्येत्याशयःवागीशपदेन भयंप्रमत्तस्यवनेष्वपिस्याद्यतःसआस्तेसहषट्सपत्नः जितेंद्रियस्यात्मरतेर्बुधस्यगृ
हाश्रमःकिंनुकरोत्यवद्यमित्यादिनाश्रीभागवतोदितस्यगीतायांच ब्रह्मार्पणंब्रह्महविर्मद्याजीमांनमस्कुरु नियतंकुरुकर्मत्वं
ससंन्यासीचयोगीचेत्यादिनोक्तस्यगृहेस्थित्याब्रह्मभावात्सर्वसत्कर्मकरणरूपस्यभगवत्सिद्धांतस्यसंनिश्चयज्ञानेनगृहाश्रम
स्तैःस्वीकृतइतिबोध्यते ननुमित्रसंगतिस्त्वीश्वरत्वात्सार्वदिक्येव तथासत्यवमाज्ञापनेविठ्ठलस्यकिंप्रयोजनमित्याशंक्य
तदाहुःअन्वर्थतामिति विठ्ठलइतिस्वाभिधानस्य अनुगतार्थतां यौगिकतां प्रकाशयितुमेवमुक्तइतिसंबंधः योगस्तुविदाज्ञा
नेनठाःशून्यायेजीवास्ताल्लात्यंगीकरोतीतितथा ठश्वशून्येप्रकीर्तितइत्येकाक्षरकोशः इदंहिविठ्ठलेशावतारेबहूद्धारकरणात्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुनिष्पन्नंअतः सर्वंसुस्थम् अत्रपरिणीतवानित्यनुक्त्वाद्वितीयमाश्रममशुशुभतेतितस्यैवार्थस्यभंग्यंतरेणानिरूपणात्पर्यायोक्तमलंकारः पूर्वार्द्धेज्ञानशून्यान्जीवानुद्धर्तुमित्यनुक्त्वानिजनाम्नोन्वर्थतांप्रथयितुमितिचमत्कृतप्रकारांतरेणतस्यैवार्थस्यकथनात्सएव लक्षणंत्वाहदंडी अर्थमिष्टमनाख्यायसाक्षात्तस्यैवसिद्धये यत्प्रकारान्तराख्यानंपर्यायोक्तंतदिष्यतइति बहुगुणशालिभिराचार्यैरंगीकारेणगृहाश्रमस्यशोभातिशयरूपगुणोद्भववर्णनादुल्लासोऽपि लक्षणंतु कुवलयानन्दे एकस्य

तंनौमियोहरिविहाररसैकपूर्णोऽप्यन्वर्थतांप्रथयितुंनिजनाम्नउक्तः ॥
स्यांत्वत्सुतःकुरुतथेतिहविठ्ठलेनवागीशआश्रममशूशुभताद्वितीयम् ॥ ५४ ॥

गुणदोषाभ्यामुल्लासोऽन्यस्यतौयदीति तत्रकल्पचतुष्टयेएकस्यगुणेनान्यस्यगुणइतिप्रथमकल्पस्यउदाहरणमिदं अथगार्हस्थ्यस्यइतराश्रमापेक्षयोत्कर्ष आचार्यकर्तृकतदंगीकारबीजभूतत्वात्किंचिन्निरूप्यते तत्रमनुः तृतीयाध्यायेश्लो० ७७यथावायुंसमाश्रित्यवर्ततेसर्वजंतवः तथागृहस्थमाश्रित्यवर्ततेसर्वआश्रमाः यस्मात्त्रयोप्याश्रमिणोज्ञानेनान्नेनचान्वहम् गृहस्थेनैवधार्यन्तेतस्माज्ज्येष्ठाश्रमोगृही ससंधार्यःप्रयत्नेनस्वर्गमक्षयमिच्छता सुखंचेहेच्छतानित्यंयोऽधार्योदुर्बलेंद्रि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यैरिति ज्ञानेनान्नेनचान्वहमित्यत्रज्ञानेनआचार्यतयावेदार्थव्याख्यानेनेतितत्स्मृतिव्याख्यातृणांकुल्लूकभट्टादीनामाशयः तथापुनःषष्ठाध्यायेश्लो० ८७ ८८ ९० ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा एतेगृहस्थप्रभवाश्चत्वारःपृथगाश्रमाः सर्वेषामपिचैतेषांवेदस्मृतिविधानतः गृहस्थउच्यतेश्रेष्ठःसत्रीनेतान्बिभर्तिहि यथानदीनदाःसर्वेसागरेयांतिसंस्थिति म् तथैवाश्रमिणःसर्वेगृहस्थेयान्तिसंस्थितिमिति दक्षोपिस्मरति देवैश्चैवमनुष्यैश्चतिर्यग्भिश्चोपजीव्यते गृहस्थःप्रत्यहं यस्मात्तस्माज्ज्येष्ठोगृहाश्रमी त्रयाणामाश्रमाणांचगृहस्थोयोनिरुच्यते सीदमानेनतेनैवसीदंत्यत्रपरेत्रयः मूलप्राणोभवेत्त् स्कंधस्तस्माच्छाखाश्चपल्लवाः मूलेनैकेननष्टेनसर्वमेवविनश्यति तस्मात्सर्वप्रयत्नेनरक्षणीयोगृहाश्रमी राज्ञाचान्यैस्त्रिभिः पूज्योमाननीयश्चसर्वदेति एवमितरत्रापिस्मृतिपुराणादिषु प्रसिद्धतरेर्थेकिंविस्तरेणेतिविरम्यते वसन्ततिलकावृत्तम् ॥ ५४ ॥ अथकथंद्वितीयमाश्रममशूशुभतेत्याकांक्षायांविवाहप्रकारमाहुः कश्चिदिति कश्चित् अनिर्दिष्टः आश्वलायनशाखीयः प्रभ्विति प्रभुणा पांडुरंगविट्ठलनाथेन स्वभक्तत्वात्प्रेरितः एतल्लक्षणकःकश्चिच्छ्रीवल्लभाख्योमदवतारोमुष्मिन्दिनेऽत्रायास्यतितस्मैत्वंस्वकन्यांदेहीतिनियुक्तः विप्रवर्यः आन्ध्रविल्लनाटीजातीयःकाश्यांकृतनिवासोवेदाभ्यासीश्रेष्ठब्राह्मणविशेषः समुपेत्य स्वयमेवसंमुखमागत्य स्वां कन्यां आत्मीयपुत्रिकां यं श्रीवल्लभाचार्यं स्वीकार्य

१ वेदाभ्यासाद्भवेद्विप्रइतिनिरुक्त्याविप्रशब्दस्यार्थोयं.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मविवाहविधिनातेनस्वीकृतांकृत्वा कृतेति कृतंकार्यंकर्तव्यंयेनसतथाकृतकृत्यइतियावत् आसीत् बभूव यंस्वीका येत्यत्र अण्यन्तावस्थायांकर्तुराचार्यस्यण्यंतावस्थायांह्रक्रोरन्यतरस्यामितिवैकल्पिकंकर्मत्वम् कारयतिकटंदेवद त्तम्कारयतिकटंदेवदत्तेनेत्यादिवत् कीदृशींकन्यां सौंदर्येति वनानांसमूहोवन्या पाशादिभ्योयः वन्यावनसमूहेस्यादि त्यमरः सौंदर्यस्यरूपातिशयस्य वन्येव वन्या तां अपरिच्छिन्नचारुभावामित्यर्थः यंस्वीकारितवान् सःअयंश्रीमदाचार्यः

कश्चित्प्रभुप्रेरितविप्रवर्यःसौन्दर्यवन्यांसमुपेत्यकन्यां ॥
स्वीकार्ययंस्वांकृतकार्यआसीत्सोयंसमुद्धार्यनरोऽधिरायात् ॥ ५५ ॥

अधिरायात् अधिकंदेयात् कर्मणस्त्वनुपलभ्यमानत्वात्कर्मगुप्तंचित्रम् वस्तुतस्तुसःश्रीमदाचार्यःअयंशुभावहविधिं अधिरायादितिसंबंधः अयःशुभावहोविधिरित्यमरः विवाहरूपस्यानिरतिशयशुभावहविधेरुपक्रांतत्वात्स्वसेवकेभ्योपि तद्दानंयोग्यमितिभावः कीदृशः सः समुद्धार्येति स्ववंशपरंपराद्वारासम्यक् उद्धर्त्तव्याः नराः मर्त्याःयेनैवंविधः नरोमर्त्ये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽर्जुनेऽच्युतइतिहैमः अथवासमुत् विट्ठलनाथस्यताद्दशाज्ञावशात्सानंदः तथा धार्येति धार्या उद्धरणीया नरा येनसः से
व्यतयाधारणीयोभगवान्येनेतिवाएतेनस्वकुलद्वारानेकजीवोद्दिधीर्षापिविवाहेहेतुतयाबोधिता अत्रसौंदर्यवन्याामिति
रूपकम् श्रीविट्ठलनाथाज्ञाविषयत्वात्सततत्संगप्रयोजकत्वाच्चेष्टस्यविवाहस्याविनायत्नंसिध्ध्याप्रहर्षणम् समुपेत्यस्वी
कार्येत्यादिपदसूचिताविप्रवर्यनिष्ठाश्रीमदाचार्यविषयकभक्तिः कविगतांतांपुष्णातीतिप्रेयोलंकारोऽपि समुद्धार्यनरइतिवि
शेषणस्यसाभिप्रायत्वात्परिकरश्च लक्षणानितुप्रपंचितानिप्राक् इंद्रवज्रावृत्तम् ॥ ५५ ॥ अथदिग्विजयत्रयानंतरं
आचार्यः श्वशुरगृहात्पत्नीमानीयअडेलग्रामेकाशीसमीपेचरणाद्रौविशेषतोगोवर्धनेचास्थितवन्तः तत्राडेलग्रामेश्रीगोपी
नाथाख्योबलदेवावतारश्चरणाद्रौ श्रीविट्ठलेशाख्यःश्रीकृष्णावतारश्चजातइत्याशयेनाहुः यस्येति नन्दस्यगृहेकृष्णइवय
स्यगृहेसः विट्ठलः वै निश्चयेन प्रभुः पुरुषोत्तमः दैवसुखाय दैवजीवानां पक्षे देवसमूहस्यच सौख्याय प्रादुरासीत्
उभयार्थगर्भंविशिंषन्ति उल्लसत्कलइत्यादि उल्लसन्तीगोपीनाथाख्यापक्षेबलभद्राख्याचकलायस्यसःस्वस्यकलात्वंतुउ
क्तंबलदेवेनैवश्रीभागवतेसाम्बविवाहप्रसंगे ब्रह्माभवोहमपियस्यकलाः कलायाइति अंशेवृद्धावपिकलेतित्रिकांडशेषः
यद्वा कलाश्चातुर्यं पक्षे कलःअव्यक्तमधुरोमुरलीशब्दश्च पुनःकिंभूतः सद्वचाः समीचीनं टिप्पणीविद्वन्मंडनादिरूपं पक्षे
गीतादिरूपं च वचनं यस्य सः अतएवआसुरेति आसुरमतानि भिनत्तीतितथा पक्षे असुराणांदैत्यानां आसुरस्यदै



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यसमूहस्यवा भेदकः ब्रह्मादिभिस्तथाभ्यर्थनात् एवंभूतं पुरानिदर्शनीकृतमृगनाभितिलकालंकृतभालतलंतंस्वसुतमुदी क्ष्यजातोत्सवः जातउत्सवोआनन्दातिशयोयस्यतादृशः सवल्लभाख्यःवल्लभेनप्रियेणपुत्रेणसहितोवाप्रसंगात्स्वाचार्यः कल्याणं रातु ददातु लोकेपि महांतः पुत्रजन्मनिस्वीयेभ्यःपारितोषिकाणिवितरन्ति तथात्रापि पारितोषिकत्वेनस्वी येभ्योऽस्मभ्यंशुभंददात्विति भावः जातउत्सवोयस्मादितिव्याख्यानेतुजातोत्सवइतिप्रभुविशेषणं नवाख्यानेषुतृतीयाख्या

यस्यालयेदैवसुखायसद्द्युचाःप्रादुर्बभूवाऽसुरभित्सवैप्रभुः ॥
नंदालयेकृष्णइवोल्लसत्कलोजातोत्सवोरातुसवल्लभःशुभम् ॥ ५६ ॥

ने दशमस्कंधेचतथादर्शनात् अत्रश्रीविठ्ठलेशप्रभोःसुततयाविर्भावेनप्रस्तुतांगत्ववर्णनात् द्वितीयउदात्तालंकारभेदः लक्षणं तुकाव्यप्रकाशे उदात्तंवस्तुनःसंपन्महतांचोपलक्षणमिति एतद्व्याख्यायांवर्णनीयेर्थेमहतांपुंसांरामादीनामुपलक्षणमंगत्वं चोदात्तमितिकमलाकरभट्टः स्पष्टंचैतदेवसाहित्यदर्पणकुवलयानन्दकाव्यादर्शप्रभृतिषु इहविशेषणमहिम्नावगतस्यक

१ पांडुरंगपुरेश्रीविठ्ठलनाथेनाचार्यान्प्रत्युक्तमासीत् यदाहंभवद्गृहेवतरिष्यामितदा अकृत्रिमकस्तूरिकातिलकसहितःप्रादुर्भविष्यामीति.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनिष्ठस्यश्रीविट्ठलेशविषयकरत्याख्यभावस्यआचार्यविषयकभक्त्यंगत्वात्प्रेयोऽलंकारोपि लक्षणंतूक्तमाशाधरभट्टेनालंका
रदीपिकापरिशेषप्रकरणे भावस्यचापरांगत्वेप्रेयोऽलंकारईरितइति नन्दालयेकृष्णइवेतिसावयवाश्लेषोपमाचदंडयाद्युक्त
लक्षणिकास्फुटैव शुभवितरणेजातोत्सवत्वस्यहेतुत्वात्पदार्थहेतुकंकाव्यलिंगमपि हेतोर्वाक्यपदार्थत्वेकाव्यलिंगंनिगद्य
तइतिविश्वनाथोक्तेः इंद्रवंशावृत्तम् ॥ ५६ ॥ अथ श्रीविट्ठलाचार्यद्वारापुनरधिकतरंपरमतनिराकरणजगदुद्धरणादिप्र
णीतवंतआचार्यचरणाइत्याशयेनभूयोमायावादव्युदासादिवर्णयंति मदमभिनदित्यादिना यःउद्धतानां मदवशात्प्रमाणग्रं
थमप्यनाद्रियमाणानां तथा निरंकुशानां अंकुशवत्प्रशासकंगुर्वादिकमप्यगणयतां निरादयःक्रांताद्यर्थेपंचम्येतिसमासः
निष्क्रमणंचात्रतदतिलंघनमेव अतएव भुवि जनतां जनसमूहं ग्रामजनबंधुभ्यस्तलितिसमूहार्थेतल् भ्रंशयतां सन्मार्गा
च्च्यावयतां अत्रहेतुगर्भविशेष्यं दुर्म्मतिकृतिनां दुष्टबुद्धयुत्पादनेनिपुणानां काणादादिवादिनां अथवा दुर्मतानिसन्त्ये
षामितिदुर्मतिनः तेचतेकृतिनश्चेतितथातेषां मदं गर्वं अभिनत् श्रीविट्ठलाचार्यादिद्वारासतसिद्धांतस्थापनेनबिभेद सः
विभुः ईश्वरः श्रीवल्लभाख्यो जयति अथवा सविभुः एवंकरणसमर्थेनविभुनाश्रीविट्ठलेनसहवर्तमानः स्वमार्गग्रंथेषु वि
भुप्रभुशब्दौ विट्ठलाचार्यपरतयासुप्रसिद्धौ अस्मिन्पक्षे सइतिशेषः स्थाप्यविषयंबोधयन्तोविशिंषन्ति हरीति देवादिविष
यिणी रतिर्भावः हरौ भगवति यो भावस्तेनभूषितःअलंकृतः भावेभूषणत्ववर्णनेनतेषामितरत्रानादरःसूचितः लोकेइत

For Private and Personal Use Only

रापेक्षयामणिसुवर्णादिभूषणेषुसंरक्षणादिरूपाधिकतरादरदर्शनात् अथवा समोहंसर्वभूतेषुइत्यादिवाक्यैरविषमस्येश्वर
स्यमदभेदनेकिंबीजमित्यतआहुः हरीति हरिभावाय लक्षणयातत्प्रख्यापनार्थं भूषितः भुविउषितः कृतनिवासः तदर्थं
भूमाववतीर्णइतियावत् तथाच यदर्थंतन्त्रोनविहान्तिविक्रममितिदशमस्कंधोक्तन्यायाद्युक्तंतदिदमितिभावः नचवैषम्यं
शंक्यम् यदायदाहिधर्मस्य परित्राणायसाधूनामितिगीतावाक्याभ्यां अधर्मस्यदुर्हृदांचोच्छेदस्यवैषम्यानापादकत्वनि
श्चयात् यद्वा एतादृशसामर्थ्यंकुतइत्यतआहुः हरीति हरेर्भावः तेनभूषितः हरित्वविशिष्टःसाक्षाद्भगवानित्यर्थः अतो
नकाप्यनुपपत्तिरित्यभिसंधिः वादिषुउक्तविधमौद्धत्यंतुयथा काणादाःश्रुतिसिद्धमपिईश्वरोपादानकत्वंजगतोनमन्यन्ते
मीमांसकाःप्रमाणमूर्द्धन्यस्यापिवेदस्यबहुभागेष्वर्थवादत्वेनस्वार्थेअप्रामाण्यमूरीकुर्वन्ति एवंमायावादिनोपिश्रुतिसूत्रा
दिसिद्धंब्रह्मणोऽप्राकृतविशेषवत्त्वादिकमरोचयन्तआनन्दमयाद्यधिकरणानिप्रसह्यान्यथैवनयन्तीतिदिक् एवंनिरंकुश
त्वमपिगुरुवेदादीनांभ्रांतिकल्पितत्वाविशेषादित्याद्यूह्यं तेषांभ्रंशकत्वंतुपाद्मोत्तरखंडीयपाखंडोत्पत्त्यध्यायादिषुस्फुटमेवे
त्यलं अत्रहरिभावभूषितइतिविशेषणस्यसाभिप्रायत्वात्परिकरोऽलंकारः लक्षणंतुसाहित्यदर्पणे उक्तिर्विशेषणैःसाभिप्रा
यैःपरिकरोमतइति नचबहुवचनादनेकसाभिप्रायविशेषणसत्वएवतत्संभवइतिशंक्यं कुवलयानन्देतादृगेकविशेषणवत्त्वे
पितदंगीकारात् प्रपंचितंचैतत्तत्रैव यत्साभिप्रायैकविशेषणसत्वेपिपरिकरोभवतीति किंचेह हरिभावेनसिंहत्वेनभूषितइ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यप्यर्थौभवति हरिर्वातार्कचंद्रेंद्रयमोपेन्द्रमरीचिषु सिंहाश्वकपिभेकाहिशुकलोकान्तरेषुचेतिविश्वः तथाहि सिंहोपि उद्धतानां मदादविनीतानां अविनीतःसमुद्धतइत्यमरःअतएवनिरंकुशानां अंकुशेनाप्यशक्यनिरोधानां अशक्यनिरोधत्वादेवजनतांभुविभ्रंशयतांशुंडादिगृहीतान्जनान् भूमौपातयतां दुर्वादिवत्प्रबलानांगजानांमदंभिनत्ति तथाच प्रस्तुतस्वाचार्यवर्णनेन अप्रस्तुतसिंहवृत्तांतोऽपिप्रतीयितइतिसमासोक्तिरलंकारः समासोक्तिःपरिस्फूर्तिःप्रस्तुतेऽप्रस्तु

मदमभिनदुद्धतानांदुर्मतिकृतिनांनिरंकुशानांयः ॥
भ्रंशयतांभुविजनतांसविभुर्हरिभावभूषितोजयति ॥ ५७ ॥

तस्यचेदितिकुवलयानंदेतल्लक्षणात् यत्तुदंडी वस्तुकिंचिदभिप्रेत्यतत्तुल्यस्यान्यवस्तुनः उक्तिःसंक्षेपरूपत्वात्सासमासोक्तिरिष्यतइत्यप्रस्तुतवर्णनात्प्रस्तुतप्रतीतौसमासोक्तिमाह तद्वैचित्र्यार्थमितिनव्यानाद्रियन्ते अतएवोक्तं तद्व्याख्याकृताप्रेमचन्द्रेण वस्तुतस्तुसमासोक्तावस्यामुपमानस्यैववाच्यत्वमुपमेयस्यैवगम्यत्वमितिननियमः उपमेयादप्युपमानप्रतीतौतदभ्युपगमस्यौचित्यादित्यादिनिरूप्यते अतएवाग्रेदण्डिनैव यत्रोक्ताद्गम्यतेऽन्योर्थस्तत्समानविशेषणः सासमा ॥६३॥

For Private and Personal Use Only

सोक्तिरुदितासंक्षेपार्थतयाबुधैरिति तत्रकार्यविशेषणलिंगानामन्यतमेनार्थांतरप्रतीत्यासमासोक्तेस्त्रैविध्यादिहचनिरंकु
शानामित्यादिविशेषणबलात् गजवृत्तांतप्रतीतेर्द्वितीयासमासोक्तिः तत्रापिहरिभावेतिविशेषणस्याश्लिष्टत्वात् उद्धताना
मश्लिष्टत्वाच्चभिन्नाभिन्नविशेषणासमासोक्तिरियम् तत्रापिसिंहगजवत्आचार्यवादिनोरतिविक्रमेतराऽजय्यत्वबोधना
च्छ्लाघोपाधिकेयम् यथोक्तंभोजराजेन प्रतीयमानेवाच्येवासादृश्येसोपजायते श्लाघांगर्हांमुभेनोभेतदुपाधीन्प्रचक्षते
विशेष्यमात्रभिन्नापितुल्याकारविशेषणा अस्त्यसावपराप्यस्तितुल्यातुल्यविशेषणा संक्षेपेणोच्यतेयस्मात्समासोक्ति
रियंततः सैवान्योक्तिरनन्योक्तिरुभयोक्तिश्चकथ्यतइति दंडिनाप्युक्तं विशेष्यमात्रभिन्नापितुल्याकारविशेषणा अस्त्य
सावपराप्यस्तिभिन्नाभिन्नविशेषणेति भिन्नमश्लिष्टं अभिन्नंश्लिष्टंएतेनेहहरिभावेतिविशेषणेनसादृश्यस्यवाच्यत्वेपिनस
मासोक्तिभंगः प्रतीयमानेवाच्येवासादृश्येसोपजायतइत्युक्तेः तेनसमासोक्तिपरिकरयोरंगांगिभावःसंकरः गीतिरार्यावृ
त्तम् ॥ ५७ ॥ ननुमदभेदःकिंशुष्कतर्कैरेवकृतआहोस्वित्प्रमाणमूलकैस्तैरितिसंशयेप्रमाणमूलकैरेवेतिसिद्धांतयितुमाहुः
निस्सार्यैति सःप्रसिद्धोविप्रराजःवेदाभ्यासिब्राह्मणानांराजा नृपवत् धर्माधर्मपरीक्षयाप्रशासकोऽनुल्लंघनीयवचनोनिरति
शयवैदिकसमृद्धिमान्अतिप्रधानःश्रीमदाचार्यः पातु अस्मान्रक्षतु राजाहःसखिभ्यइतिटच् वेदाभ्यासाद्ब्रवेद्विप्रइति
निरुक्तिः राजत्वमेवरूपकेणद्रढयन्ति सच्छास्त्रेत्यादिना सन्ति वेदानुकूलानि यानि शास्त्राणि चतुर्लक्षणीप्रभृतीनि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काणादादिनयान्व्यावर्तयितुंसदिति तद्रूपायेनिषंगास्तूणाः तूणोपासंगतूणीरानिषंगाइषुधिर्द्वयोरित्यमरः तन्मध्यात निस्सार्य उद्धृत्य तथा वचनैकचापे वाग्रूपेएकस्मिन्नेवधनुषि धनुश्चापौधन्वशरासनकोदंडकार्मुकामितित्रिकांडी एक पदात्निपुणस्ययोद्धुर्यावत्युद्धंधनुषोऽभंगवत्एकस्यापिवचसोऽपराहतिर्बोध्यते आरोप्य संधाय मुक्तैःदुर्वादखंडनाय विसृष्टैः पटुयुक्तिबाणैःपटुर्व्योनिपुणायायुक्तयस्तद्रूपैःशरैःकरणैः अथवापटिूतिक्रियाविशेषणं निपुणंयथास्यात्तथेत्यर्थः

निस्सार्यसच्छास्त्रनिषंगमध्यादारोप्यमुक्तैर्वचनैकचापे ॥
दुर्वादयोधान्पटुयुक्तिबाणैःप्राणीनशत्पातुसविप्रराजः ॥ ५८ ॥

दुर्वादयोधान् सांख्यपातंजलकाणादमायावादादिसिद्धान्तरूपान् भटान् वेदविरोधइहदुरुपसर्गार्थः प्राणीनशत् प्रकर्षे णनाशितवान् प्रपूर्वान्नश्यतेर्णिजंताल्लुङिरूपम् उपसर्गादसमासेपिणोपदेशस्येतिणत्वम् तान्खंडितवानइत्यर्थः एतेषांखंडनंच व्यासदर्शनद्वितीयाध्यायादिषुस्फुटम् उचितंचैतद्वेदानुकूलयुक्तिभिःखंडनमिति यथाहद्वादशाध्याये मनुः आर्षधर्मोपदेशंचवेदशास्त्राविरोधिना यस्तर्केणानुसंधत्तेसधर्मवेदनेतरइति अतएवश्रीमदाचार्याअपिवैदिकीना ॥६४॥

For Private and Personal Use Only

मेवयुक्तीनांवेदार्थप्रतिपत्तौहेतुतांवदन्ति भाष्ये अलौकिकोहिवेदार्थोनयुक्त्याप्रतिपद्यते तपसावेदयुक्त्यातुप्रसादात्पर
मात्मनइति तत्वार्थदीपेतु तपसावेदयुक्त्यावेतिपाठः एवमिहसच्छास्त्रादिषुतूणत्वाद्यारोपात्समस्तवस्तुविषयंसांगरूपकं
लक्षणंतु विश्वनाथः रूपकंरूपितारोपाद्विषयेनिरपन्हवे तत्परंपरितंसांगंनिरंगमितिचत्रिधेत्युक्त्वापरंपरितभेदान्निरूप्याह
अंगिनोयदिसांगस्यरूपणंसांगमेवतत् समस्तवस्तुविषयमेकदेशविवर्तिच आरोप्याणामशेषाणांशाब्दत्वेप्रथमंमतम्
यत्रकस्यचिदार्थत्वमेकदेशविवर्तितदिति इत्थंब्राह्मणजातावसंभवित्वात्समर्थनीयंराजत्वमिहब्राह्मणोपयोग्यारोपिततू
णादिसाहित्यस्यशरनिक्षेपनैपुण्यस्यदुर्वादाख्यपरयोधवधस्यचवर्णनेनसमर्थितमितिकाव्यलिंगमप्यलंकारः लक्षणंतुकु
वलयानन्दे समर्थनीयस्यार्थस्यकाव्यलिंगंसमर्थनमिति इदंचपदार्थैवाक्यार्थस्यहेतुत्वरूपंकाव्यलिंगं अतएवास्यद्वैविध्य
मुक्तंसाहित्यदर्पणे हेतोर्वाक्यपदार्थत्वेकाव्यलिंगंनिगद्यते एतत्प्रपंचश्चकुवलयानन्देपिस्फुटः उक्तलक्षणकामिन्द्रवज्रा
वृत्तम् ॥ ५८ ॥ नन्वेवंप्रमाणमूलकतर्कैर्दुर्वादानिराकृताइत्युक्तं तथापिनास्तिकमतसंसर्गात् येषांजीवानांवेदप्रामा
ण्यमेवसंदिग्धंतेषां कथंतादृशतर्काश्चित्तमधिरोक्ष्यन्तीत्याशंक्यभगवद्भक्त्युत्पादनेनउपधर्मप्रयुक्ताशेषसंशयास्तैरेवदूरी
कृताइत्याशयेनाहुः उपधर्मेति यइतिशेषः यःआचार्यः कलीति कलियुगरूपेणचंडेनचक्रवातेनप्रेरितं उपधर्मदवानलं उ
पधर्माःवेदविरोधिनःपाखंडधर्माः शाक्तकापालिकबौद्धजैन्यादिगंबरादयः अतएवचतुर्थाध्यायेस्मरतिमनुः श्लो० १४७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेदमेवाभ्यसेन्नित्यंयथाकालमतन्द्रितः तंह्यस्याहुःपरंधर्ममुपधर्मोन्यउच्यतइति श्रीभागवतेचसप्तमस्कंधेपंचदशाध्याये उपधर्मस्तुपाखंडइति तद्रूपंवनाग्निं हरिभक्तिरसैःभगवद्भक्त्यास्वादैः पक्षेतद्रूपैरसैर्जलैः अथवा हरेरिन्द्रात्सकाशात् भक्तिः भागःविश्लेषइतियावत् येषांतादृशैर्जलैःइन्द्रवृष्टजलैरितियावत् यद्वा हरेःसूर्यात्सकाशात्भक्तिर्भागइत्यादिपूर्ववत् सूर्यकिरणविसृष्टैरित्यर्थः याभिरादित्यस्तपति रश्मिभिस्ताभिःपर्जन्योवर्षतीत्यादिश्रुतिभ्यः स्वर्गोभिर्मोक्तुमारेभेपर्ज्जन्यःकाल

उपधर्मदवानलंद्रुतंकलितीव्रानिलचक्रनोदितम् ॥
हरिभक्तिरसैरशीशमद्गुरुमानन्दघनंतमाश्रये ॥ ५१ ॥

आगतइतिश्रीभागवतोक्तेश्च अथहरिर्दिवाकरसमीरयोः यमवासवसिंहांशुशशांककपिवाजिषु पिंगवर्णेहरिद्वर्णेभेकोपेंद्रय माहिष्विंतिहैमः जलेशरीरधातौचपारदस्वादयोरसइतित्रिकांडशेषः द्रुतं शीघ्रं अशीशमत् शमितवान् तं आनंदघनं ब्रह्मत्वादानन्दसान्द्रं पक्षेआनंदयतीत्यानन्दः पचाद्यच् तादृशंमेघं घनंस्यात्कांस्यतालादिवाद्यमध्यमनृत्ययोः नामुस्ताब्दौघदार्ढ्येषुविस्तारेलोहमुद्गरे त्रिषुसान्द्रेदृढइतिमेदिनी एतादृशं गुरुं दैशिकंश्रीवल्लभाख्यं आश्रये सेवे पक्षे गुरुं ॥६५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महान्तं प्रबलदवाग्निशमनक्षमामितिमेघविशेषणम् अस्मिन्श्लोकेगुरुपदोपादानान्मुख्यतयास्वशिष्याचित्तगता पाखंड धर्मकृतभ्रांतिर्भक्तिप्रतिपादनैर्वारितेतिज्ञायते वादनिरासस्येहपूर्वंसुनिरूपितत्वात् अत्रउपधर्मादिषु दवानलत्वाद्यारोप पूर्वकंआचार्येषुमेघत्वारोपात्सकलरूपकमलंकारः उक्तंचदंडिना ताम्रांगुलिदलश्रेणिनखदीधितिकेसरम् ध्रियतेमूर्ध्निभूपालै र्भवच्चरणपंकजम् अंगुल्यादौदलादित्वंपादेचारोप्यपद्मताम् तद्योग्यस्थानविन्यासादेतत्सकलरूपकमिति तच्चश्लेषगर्भं हरिभक्तीत्यादौश्लेषसत्वात् वैतालीयंवृत्तम् लक्षणंतु षड्विषमेऽष्टौकलास्ताश्चसमेस्युर्नोनिरंतराः नसमात्रपराश्रिताकला वैतालीयेंतेरलौगुरुरिति ॥ ५९ ॥ ननुइत्थंनिराकृतापिभ्रान्तिः सद्वस्तुमात्रप्रतिकूलतयाकलिकालेनपुनरुत्पाद्येत अतः कथं सर्वांशेनतन्निवृत्तिरित्याशंक्य भगवद्गुणकथया कालबाधामप्याचार्याएवनिगृण्हंतीत्याशयेनाहुः कलीति कलियुग रूपेण तज्जन्यक्लेशरूपेणवाभयमोहादिहेतुत्वात् कुंडलिनाभुजंगेन कुंडलीगूढपाच्चक्षुःश्रवाःकाकोदरःफणीत्यमरः दष्टाः कृतदंशाः ये जनाःजन्ममरणशालिनोजीवास्तान् ललितेत्यादि ललिता निवृत्ततर्षैरित्याद्युक्त्यासर्वमनोहरा याअच्युतस्य भगवतः केलीनां सर्गविसर्गादिभेदेन दशविधानां बाल्यचरितादीनां च लीलानांकथास्तद्रूपममृतम् अलं पर्याप्तं परि पाय्य परितःपाययित्वा अजिजीवत् पुनर्जीवितानकरोत् अत्र भ्राजभासेत्यादिनाउपधाह्रस्वविकल्पाद्दीर्घोपधत्वं ललितामनोहरा अच्युता अविहताश्चकेलयोयस्यतस्यहरेःकथेतिवा तस्यैवसर्वमनोज्ञाऽप्रतिहतक्रीडत्वात् लोकेपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्पदष्टस्यापिकदाचित्सुधाप्राप्तिश्चेत्तस्यपुनर्ज्जीवनंप्रसिद्धं कीदृगमृतं निजास्यविधोः स्ववदनचंद्रात् गलितं स्यंदितं विधुःसुधांशुःशुभ्रांशुरितिचंद्रपर्यायेष्वमरः मुखेचंद्रतादात्म्यात्तस्यचसुधांशुत्वात्ततःपीयूषस्रवणमुचितम् एव मनेनश्लोकेन श्रीमदाचार्याहिदैवजीवान्प्रत्यहंनियमेनसुबोधिन्यादिग्रंथान्श्रावयंतिस्मेतिचरितंसंगृहीतम् विधोः भगवद्रूपस्य विधुःश्रीवत्सलांछनइत्यमरः विभोरितिपाठे कालकर्मादिप्रयुक्तसर्वदोषनिवर्तनसमर्थस्य तस्य

**कलिकुंडलिदष्टजनानजिजीवदलंपरिपाय्यनिजास्यविधोः ॥**
**गलितंललिताच्युतकेलिकथामृतमस्तुकृपामयितस्यविधोः ॥ ६० ॥**

स्वाचार्यस्य कृपा अनिष्टनिवृत्तिपूर्वकमिष्टप्राप्तिहेतुरनुग्रह मय्यस्तु कठमुंडकयोः नायमात्माप्रवचनेनलभ्योन मेधयानबहुनाश्रुतेनयमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मावृणुतेतनुंस्वामितिश्रुतेः नाहंवेदैर्नतपसेतिस्मृतेः नरोधयतिमां योगोनसांख्यंधर्मउद्धवेत्यादिश्रीभागवतवचनेभ्यश्चभगवतोनुग्रहैकलभ्यत्वात्तत्रापि आचार्यादेवविद्याविदितासाधिष्ठं प्रापयति आचार्यवान्पुरुषोवेदतद्विज्ञानार्थंसगुरुमेवाभिगच्छेदित्यादिसत्यकामब्राह्मणश्वेतकेतुविद्यामुंडकादिश्रुति



For Private and Personal Use Only

भ्यो गुरुकृपायैव मुख्यसाधनाद्युक्तं तत्प्रार्थनं अत्रायमभिसंधिः भगवद्गुणानुवादादद्यापिहिविरुद्धोपिकलिः प्रत्युतत्वरितंफलसाधकोभवत्येव कलौतद्धरिकीर्तनात् कीर्तनादेवकृष्णस्यमुक्तबंधःपरंव्रजेदित्यादिवाक्येभ्यः तर्हि यत्र भगवदास्यंवागीशोवक्तामहानुभावास्तादृगानुभविकाश्चश्रोतारः नामात्मकश्रीभागवतस्थाभगवल्लीलाश्चवाच्य विषयः किमतःपरंवक्तव्यम् कोनामप्रभवितुं वराकः कलिरिति अत्रकलिप्रभृतिषुकुंडलित्वाद्यारोपात्सकलरूपक मलंकारः पूर्वोत्तरार्द्धयोरंतेयमकंशब्दालंकारः उभयोरपिलक्षणंतूक्तम् तोटकंवृत्तम् लक्षणंतु इहतोटकमं बुधिसैःप्रथितमिति ॥ ६० ॥ एवं कथाश्रावणेन संसारनाशादिरूपाण्यवान्तरफलानिपुष्टिमोक्षलक्षणं परमं फलंच दैवजीवानां संपादितवंत आचार्याइति वदन्तः पुनर्मेघत्वमारोपयन्ति पुष्टिमितिद्वाभ्याम् सवल्लभाख्यःवा रिदः मेघः पायात् सारूप्यगर्भविशिंषन्ति कीदृशःसः धर्मभृत् भगवद्धर्माणांसेवादीनांयागादिधर्माणांचपोषकः आचार्य त्वात् पक्षे धर्मस्य धनुष इंद्रचापेतिप्रसिद्धस्य धनुराकारकचिन्हविशेषस्यधारकः धर्मोऽहिंसोपमायोगोपनिषत्सुधनुष्य पीतित्रिकांडशेषः ननुधर्मप्रवर्तनेकिंमुख्यंसाधनंकिंचफलमित्याकांक्षायांतत्प्रवृत्तेःसाधनफलेआहुः पुष्टिमित्यादि यः आगमानां वैयासदर्शनादिसच्छास्त्राणां पुष्टिं वृद्धिंकृत्वा पररसकलनैः परः पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिरि त्यादिकठादिश्रुतिभ्यः पुरुषःसपरःपार्थ मत्तःपरतरंनान्यत्किंचिदस्तिधनंजयेत्यादिस्मृतिभ्यश्चसर्वोत्तमः यो रसः पुरुषो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तमः रसोवैसइतिश्रुतेः तस्य कलनैः भजनैः यद्वा परः सर्वेषुरसेषूत्तमो यो रसो भक्तिः तस्य कलनैः प्रापणैः सत्फल
र्द्धिश्रियं सत्फलानांभगवत्साक्षात्कारादीनामुत्तमफलानां समृद्धिलक्षणां श्रियं संपदं तत्समृध्युपयोगिनीं ग्रंथरूपां वाणीं
वा कलयति रचयति तथाच सच्छास्त्रवृद्धिर्धर्मप्रवृत्तेःसाधनं ततःशुद्धचित्तानांभगवद्भजनद्वारातत्साक्षात्कारादिश्च
फलमित्युक्तंभवति पक्षे पररसकलनैः उत्तमजलवर्षणैः हेतुभिः अगमानां वृक्षाणां पुष्टिं पोषणं कृत्वा सत्फलर्द्धिश्रि
यं सत्फलेत्युपलक्षणम् समीचीनफलपुष्पादीनांसमृद्धेः श्रियं रचनां तत्समृद्धिप्रयुक्तांभूमिशोभां वा करोति पुष्टिःस्त्री
पोषणेवृद्धावितिमेदिनी शास्त्रमायातमागमइतित्रिकांडशेषः पलाशीद्रुद्रुमागमाइत्यमरः रसोगंधरसेजले शृंगारादौविषेवी
र्यैतिक्तादौद्रवरागयोरिति श्रीर्वेषरचनाशोभाभारतीसरलद्रुमे लक्ष्म्यांत्रिवर्गसंपत्तिविधोपकरणेषुचेतिचमेदिनी नन्वेवं
साधनफलसहितधर्मप्रचारणात्किमतआहुः गोरित्यादि यः गोर्भूमेर्वेदादिरूपवाचो वा तापं धुन्वन्सन् यथाक्रमं आ
सुरमतप्रवृत्तिजन्यं वास्तविकनिजार्थानवबोधजन्यंच संतापं दूरीकुर्वन् तस्यास्तुष्टिं क्रमात्स्वस्यांभगवद्धर्मप्रचारप्र
युक्तंतात्विकव्याख्यानप्रयुक्तंच संतोषंकलयति पक्षे गोर्भूमेः ग्रीष्मर्तुप्रयुक्तंतापमुष्णतांहरन्सन्जलपूर्णत्वेनतस्यास्तो
षंकलयति यद्वा गोरितिजात्याभिप्रायेणैकवचनम् गवादीनांपशूनांशुष्कस्वल्पतृणभक्षणजन्यंसूर्यजन्यंवातापमपनुदन्
सन्बहुलहारितयवसोत्पत्त्यातेषांसंतोषंभावयति गौरुदकेदृशि स्वर्गेदिशिपशौरश्मौवज्रेभूमाविषौगिरीतिविश्वः ननुप्रतिव



For Private and Personal Use Only

न्धकस्यसंसारस्यविद्यमानत्वेकथंभजनद्वाराभूमिष्ठजीवानांसत्फलोपलब्धिः तदभावेचकुतस्तरांभूमेःसंतोषोपीत्याशंक्य तन्निवृत्तिलक्षणमवान्तरफलमाहुः विहर्तिमित्यादि यः संसृतेः संसारस्य विहर्तिं विघातं भगवत्सेवातज्ज्ञानादिद्वाराकरो ति केवलज्ञानमार्गीयाणांकदाचिद्रजस्तमोभ्यांसत्वोपमर्दनपुनःसंसारोद्भववत्भक्तिमार्गीयाणांतदुद्भवाभावोविहतौद्युप सर्गार्थः पक्षे संसृतेःसमीचीनमार्गाणां जातित्वादेकवचनम् अथवा प्रवासवतामपिसम्यक्प्रकारिकायाः सुखपूर्वि कायाःसृतेःगतेःविहर्तिं करोति नन्वेवंसंसारनिवर्त्तनपूर्वकंमोक्षाद्यतिदुर्लभफलदानंभगवदतिरिक्तस्याशक्यं वरंवृणीष्व भद्रंतेऋतेकैवल्यमद्यनः एकएवेश्वरस्तस्यभगवान्विष्णुरव्ययः इतिश्रीभागवतेमुचकुंदप्रसंगेदेववाक्यात् एवंविधवच नान्तरेभ्यश्च अतःकथमेतदिहाचार्यकर्तृकत्वेनवर्ण्यतइत्याशंक्याहुः कृष्णेति कृष्णमूर्तिः भगवद्रूपः पक्षेश्यामविग्रहः भ गवद्रूपत्वमेवविशेषणैर्द्रढयन्ति पुनःकीदृक्सःअनंतलीलः असंख्याताअवतारादिरूपाःक्रीडायस्यैवंविधः एतदपीश्वरत्व चिन्हम् विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसीतिश्रुतेः विष्णोर्नुवीर्यगणनांकतमोर्हतीहयःपार्थिवान्यपिक विर्विममेरजांसीति जन्मकर्माभिधानानिसन्तिमेंगसहस्रशः नशक्यंतेऽनुसंख्यातुमनन्तत्वान्मयापिहि क्वचिद्रजांसिवि ममेपार्थिवान्युरुजन्मभिः गुणकर्माभिधानानिनमेजन्मानिकर्हिचित् कालत्रयोपपन्नानिजन्मकर्माणिमेनृप अनुक्रमन्तो नैवान्तंगच्छंतिपरमर्षयइतिद्वितीयस्कन्धदशमस्कन्धवचनेभ्यः पक्षेअनंतेआकाशेलीलायस्येतितथा अनंतसुरवर्त्मखमि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्याकाशपर्यायेष्वमरः नन्वेवंसाक्षाद्भगवद्रूपत्वेइच्छामात्रेणसर्वंविधातुंशक्तत्वादवतारेकिंप्रयोजनमित्यतआहुः कीर्तिमि
ति भक्तानांगानार्थंस्वपारोक्ष्येपिजीवोद्धारार्थंचकीर्तिंयशःतन्वनसन्कलयतीत्यन्वयः यथाहदशमस्कन्धेगोकुलंगच्छन्न
क्रूरः सचावतीर्णःकिलसात्वतान्वयेस्वसेतुपालामरवर्यशमंकृत यशोवितन्वन्व्रजआस्तईश्वरोगायन्तिदेवायदशेषमंगल

पुष्टिंकृत्वागमानांपरंरसकलनैःसत्फलर्द्धिश्रियंगोस्तुष्टिंचानंतलीलाः
कलयतिविहर्तिधर्मभृत्संसृतेर्यः ॥ धुन्वंस्तापंमहीभृन्मणिमहितपदः
कृष्णमूर्तिःसकीर्तिंतन्वन्राधोदयाढ्यःसरसत्हृदवताद्वारिदोवल्लभाख्यः ॥ ६१ ॥

मिति पक्षेकीर्तिंकर्दमंविस्तारयन्नित्यर्थः कीर्तिःप्रतापयशसोर्विस्तारेकर्दमेपिचेतिविश्वः ननुजीवार्थमीदृशश्रमकरणे
कोहेतुरित्याकांक्षायामाहुः राधोदयेति राधसातेजसादययाकृपयाचाढ्यः समृद्धः तथाच कृपैवहेतुरितिभावः पक्षे
राधायाः विद्युतः उदयेन पुनःपुनश्चमत्काररूपेणाढ्यः समृद्धः राधाचित्रभेदेचधन्विनां गोपीविशाखामलकीविष्णुक्रांता



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुविद्युतीतिमेदिनी तथासरसद्दत रसेनभक्त्यापुरुषोत्तमेनवासहवर्तमानंह्रदयंयस्यैवंविधः पक्षेसजलान्तरालः यद्वास;
प्रसिद्धःरसह्रत समुद्रसकाशाज्जलाहर्तैत्यर्थः एतेनपदत्रयेणाऽभ्यंतरसमृद्धिरुक्ता बाह्यसमृद्धिमपिदिङ्मात्रेणाहुः महीति
महीभृत्सु राजसु मणिभिरत्नद्वरत्युत्तमैःकृष्णदेवादिभिः अथवा महीभृतां राज्ञां मणिभिः शिरोरत्नैः महिते पूजिते प
दे चरणे यस्य स तथा पक्षेमहीभृन्मणयः पर्वतश्रेष्ठाः तएव महितं पूजितं पदं स्थानं यस्य स तथा मेघानांपर्व
ताग्रस्थितिःप्रसिद्धैव श्रीमदाचार्यपक्षेपि वारिदइतिपदं वेत्यवधारणार्थंपृथकूपदमंगीकृत्य अरीन् कामक्रोधादीन्
द्यति खंडयतीतिव्युत्पादनयासंगच्छते कृष्णमूर्तिरितिपदाद्भगवत्पक्षेऽप्यस्यश्लोकस्यार्थोऽभिप्रेतइतिभाति तथाहि यः
धर्मभृत्स्वावतारद्वाराधर्मपोषकः यद्वा धर्मस्ययोगस्यधारकःयोगेश्वरत्वात् अथवाधर्माणामुपनिषदांपोषकःउपनिषदेक
वेद्यत्वात् तथायः अगमानां प्रतियातव्रजन्नेहस्थेयंस्त्रीभिःसुमध्यमाइत्यादिवचनंश्रुत्वाप्यगच्छंतीनांव्रजस्त्रीणांपुष्टिम
नुग्रहंकृत्वातापं स्वविरहप्रयुक्तंधुन्वन्सन् पररसस्य शृंगाररस्यभक्तेर्वा कलनैः प्रापणैः सत्फलद्धर्या निरोधलक्षणस्य
समीचीनफलस्यसमृद्ध्याश्रियंभक्तानांस्वसाम्येनशोभातिशयंकरोति श्रियोहिपरमाकाष्ठासेवकास्तादृशायदीत्युक्तेः अ
तएवपंचाध्याय्यादिकंतामसप्रकरणस्यफलप्रकरणत्वेनप्रसिद्धम् ननुप्रपंचविस्मृतिपूर्विकाभगवदासक्तिर्निरोधः तत्रअ
हंताममतासत्वेप्रपंचविस्मृत्यसंभवात्कथंफलसिद्धिरित्याकांक्षायामाहुः विहतिमिति यःअहंताममतारूपायाःसंसृतेर्वि

घातंकरोति ईदृशलीलानांनित्यत्वंबोधयितुमाहुः अनन्तेति नास्त्यन्तःपरिच्छेदोनाशोवायासामेवंविधाः लीलायस्यस
तथा तर्हिभूमौप्राकट्येकिंप्रयोजनमित्यतआहुः गोरिति यःगोर्भूमेःस्वचरणादिसंबन्धात्तुष्टिंकरोति यद्वा जात्यभिप्रायेणै
कवचनं गवांधेनूनांतोषंकरोति गोपालत्वात् भूमिसंतोषहेतूनितरानपिविशेषणैर्बोधयन्ति महीत्यादि यः महीभृत् वरा
हावतारेपृथिव्याउद्धारकः यद्वा महाःअनेकविधोत्सवाःसंत्यस्येतिमही महउद्धवउत्सवइत्यमरः तथा ईभृत् स्वहृदये
लक्ष्मीधारकः लक्ष्मीरीकारउच्यतइत्येकाक्षरः तथा मणीति मणिभिःअर्थात्कालीयशिरोवर्त्तिभिः महितपदः तत्फणा
सुनर्त्तनावसरेपूजितचरणः अनेनोपलक्षणविधयादुष्टनिग्रहोबोधितः अथवा महीभृन्मणिः गिरिराजोगोवर्द्धनःसएवमहि
तंपूजितंपदंस्थानंयस्यसतथा अतएवश्रीनाथस्वरूपस्यमुख्यतयागोवर्द्धनेस्थितिः महीभृन्मणिनागिरिराजेनमहिताःअ
न्नकूटसमर्पणेसंजातोत्सवा ये नन्दादयस्तेषांपदंइन्द्रसकाशात्त्राणंयस्मादितिवा यद्वा द्वारवत्यांराजश्रेष्ठैःपूजितचरणः
तैः पूजितव्यवसायोवा पदंस्थानेविभक्त्यन्तेशब्देवाक्यैकवस्तुनोः त्राणेपादेपादचिन्हेव्यवसायापदेशयोरितिहैमःतथा
कीर्तिभतापंयशोवातन्वन् तथा राधेति राधायाःगोपीमुख्यायाःवृषभानुसुतायाःउत्कृष्टेनअयेनप्राप्त्यैवाढ्यः अहं
भक्तपराधीनः नपारयेहंनिरवद्यसंयुजामित्यादिवचनैः तत्समागममेवसमृद्धिरूपंमन्वानइत्यर्थः अत्रहेतुः सरसहृत
सानुरागहृदयः अथवा सइतिपृथक्पदं रसहृत् रसं कालीयसंबन्धिविषं हरतीतितथा तथा वारिदः सादृश्यनिबं



For Private and Personal Use Only

घनयामेघसदृशः अथवा पूर्ववदर्थान्तरं अरयोत्रकंसादयः यद्वा आरि चक्रंसुदर्शनाख्यं स्वभक्तेभ्यो रक्षार्थं ददातीतितथा यथाह नारदपंचरात्रे द्वितीयरात्रद्वितीयाध्याये नारदंप्रतिशिवः श्लो० ७३ एवंभृत्यस्यरक्षार्थं कृष्णोदत्वासुदर्शनम् तथापिसुस्थोनप्रीतस्तंत्यक्तुमक्षमःक्षणं एवंभूतोदयासिंधुर्भक्तानुग्रहकातरः अतःसंतोहितं त्यक्तानसेवंतेसुरांतरं तथावल्लभाख्यः वल्लभाःमुक्तमुमुक्षुसंसारिणांत्रिविधानामपिप्रियाः आख्याःकथायस्यसतथा निवृत्ततर्षैरुपगीयमानादितिदशमस्कंधवाक्यात् एवंविधोभगवान्अवतात् रक्षतादितिसंबन्धः इह उक्तलक्षणकं श्लिष्टरूपकमलंकारः पुष्टितुष्टिमितिधुन्वंस्तन्वन्निितिचपूर्वोत्तरार्द्धयोः पादादिश्छेकानुप्रासः स्रग्धरावृत्तम् ॥ ६१ ॥ एवंसंसारनिवृत्यादिकमुक्तातदुत्तरभाविफलप्राप्तिमाहुः तापानिति आनन्दघनइतिपूर्ववत् तादृशःआचार्यः श्रीवल्लभाख्यः सत्पुष्ट्यमृतस्यवृष्ट्या सम्यक्पुष्टिमार्गसंबन्धिमोक्षस्यवर्षणेनयद्भुवि दैवसृष्ट्याः दैवजीवसर्गस्य तापान्बहुविधान्निरास्यत् तत्तूचितमेव यतोमेघोपिधान्यादिनिष्पत्तिद्वारासम्यक्पुष्टिःपोषणम् यस्मात्तादृशस्यामृतस्यजलस्य वृष्ट्या तापांश्च्छारीरमानसादीन्निवर्त्तयति हिप्रसिद्धमेतत् मोक्षःसुधायज्ञशेषोऽयाचितंवारिचामृतमितित्रिकांडशेषः पुष्टिमोक्षस्तुब्रह्मविदाप्नोतीत्यारभ्यविपश्चितेतीत्यन्तेमंत्रेदर्शितोभाष्यकारैः किंचयतोयमुदारः तादृग्दुर्लभवस्तुवितरणशीलः अतःसुदुर्लभमोक्षस्यापिदानंनासंभावितमितिभावः पक्षांतरे उन्नतः आरो गतिर्यस्यसउदारःआकाशस्थितइत्यर्थः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यद्वा उदनउदकस्यआरःप्राप्तिर्यस्मात्सतथा अथवा उदानिउदकानिआरातिसमुद्रादाददातीतितथा पद्दन्नोमासूह्द दित्यादिनाउदकस्यउदन्नादेशः घनोपिरुजलएवतापनाशकोभवतीतिविशेषणसार्थक्यात् परिकरोयम् अलंकारःपरिकरःसाभिप्रायेविशेषणइतिकुवलयानन्देतल्लक्षणात् घनस्यामृतवृष्टिद्वारातापहरणरूपंकार्यंयुज्यतएवेतिसममप्यलंकारःलक्षणंतुतत्रैव सारूप्यमपिकार्यस्यकारणेनसमंविदुरिति किंत्वियानिहव्यातिरेकः यदयं पंकानांपापानां चयं समूहं

**तापानपास्यद्रुविदैवसृष्ट्यायुक्तंहिसत्पुष्ट्यमृतोरुवृष्ट्या ॥**
**आचार्यआनन्दघनोप्युदाराश्चित्रंत्वयंपंकचयंजहार ॥ ६२ ॥**

जहार वार्दस्तुपंकंकर्दमंप्रत्युतोत्पादयति नतुतंहरति अतइदंतुचित्रम् पंकोऽघेकर्दमइतिहैमः व्यतिरेकलक्षणंतुकाव्यादर्शे शब्दोपात्तेप्रतीतेवासादृश्येवस्तुनोर्द्वयोःतत्रयद्भेदकथनंव्यतिरेकःसकथ्यतइति पूर्वोत्तरार्द्धयोःपादांतानुप्रासः शब्दालंकारः इंद्रवज्रावृत्तम् ॥ ६२ ॥ उक्तमेवामृतदानंप्रपंचयन्तिस्वागताभ्याम् एवंहिसिद्धान्तः भगवद्विरहदुःखात्प्राप्तिर्भवतीति अतप्रतनूर्नतदामोअश्नुते दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाइत्यादिश्रुतिपुराणवाक्येभ्यः अतएवभ



For Private and Personal Use Only

क्तिमीमांसाद्वितीयाध्यायप्रथमान्हिकेसूच्यते सन्मानबहुमानप्रीतिविरहेतरविचिकित्सामाहिमख्यातितदर्थप्राणस्थानत
दीयतासर्वतद्भावाऽप्रातिकूल्यादीनिस्मरणेभ्योबाहुल्यातइति तथाचयःस्वंआत्मानंआगतानां शरणंप्राप्तानां अधिक
रजस्कानांरजोगुणाधिक्यवतामपिसुष्टुवर्गानांवैष्णवीभूतब्राह्मणादीनां स्वच्छतांनैर्मल्यंवितनुते रजःक्लीबंगुणांतरे
आर्तवेचपरागेचरेणुमात्रेचदृश्यतइति वर्णोद्विजादिशुक्लादियशोगुणकथासुचेतिचमेदिनी किंकुर्वन् अच्युतस्यविरह

स्वागताधिकरजस्कसुवर्णस्वच्छतांवितनुतेऽच्युततापम् ॥
योददत्पररसोत्तररुच्यैतंमुकुंदवदनानलमीडे ॥ ६३ ॥

तापं अच्युतं अखंडितं तत् तापंवाददत्सन् तत्रप्रयोजनं परेति परःसर्वोत्तमो योरसो भक्तिःतस्ययत् उत्तरंवियो
गरूपमुत्तरदलं तत्ररुच्यै अभिरुच्यै वियोगदलानुभवायेतियावत् यद्वापरेसर्वातीतेरसे आनंदरूपेपुरुषोत्तमेउत्तरा उ
त्तमा रुचिःप्रीतिः तदर्थं तं वल्लभाख्यं मुकुंदवदनानलं भगवन्मुखाग्निं ईडे स्तौमि वन्हिरपि स्वंआगतस्यद्रावणाद्य
र्थंस्वस्मिंस्थापितस्य अधिकरजस्कस्यबहुधूलिमलिनस्यापिसुवर्णस्यहेम्नः अच्युतं अखंडंस्वतापंददद्देवविमलतांक

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रीति सुवर्णकांचनेकर्षइतिहैमः तत्रापिपररय उत्कृष्टस्यरसस्य सुवर्णद्रवस्य उत्तरा उत्तमा रुचिर्दीप्तिरेवप्रयोजनं उत्तरादिग्विशेषेचस्नुषायामर्जुनस्यच विराटस्यसुतेनास्यादूर्ध्वोदीच्योत्तमेत्रिष्विति रुचिस्त्रीदीप्तौशोभायामभिष्वंगाभिलाषयोरितिचमेदिनी भक्ते रजोगुणनिवृत्यादैन्यंसिद्ध्यतितच्चपरमंसाधनं पूर्ववत्तश्लिष्टरूपकमलंकारः स्वागतावृत्तम् लक्षणंतुस्वागतेतिरनभाद्गुरुयुग्ममिति श्लोकारंभेतन्नाममुद्रणान्मुद्रालंकारोऽपि सूच्यार्थसूचनंमुद्राप्रकृतार्थपरैःपदैरितिकुवलयानंदेतल्लक्षणात् ॥ ६३ ॥ एवंभगवद्विरहप्रयुक्ततापक्लेशरूपंमुख्यसाधनमुक्तातत एवमुख्यफलप्राप्तिरित्याहुः नालमिति यःउपाश्रितान् उक्तविरहतापनिवृत्तयेसमीपमाश्रयतः दैवान् स्वस्यसर्वस्वं निःशेषद्रव्यभूतं स्वमार्गेहरेरेवार्थत्वात् तथा रसात्मकं आनंदरूपं तं पुरुषोत्तमं आपिपत् प्रापितवान् प्रपूर्वस्यआप्लृव्याप्तावित्यस्य णिजन्तस्यलुङ्रूपं कीदृशान्दैवान् अप्रयत्नान् निःसाधनान् निःसाधनजनोद्धारकरणत्वात्स्वस्य प्रतिपत्तिनिवेदनातिरिक्तसाधनरहितान् रजोनिवृत्यादैन्याविर्भावेनत्याजितेतरसाधनाभिमानांस्तांस्तंप्रापिपदितियुक्तम् स्वसर्वस्वस्यापि दानवर्णनादत्यौदार्यंबोधितम् अतएवअदेयदानदक्षइत्यभिधानम् इतरसाधनासाध्यत्वंदर्शयन्ति योगेत्यादि किंदृशंतं यं पूर्वे प्राक्तनाः साधनाभिमानिनोयोगादिबलैः योगोबहिर्मुखचित्तपंचविधवृत्तीनामान्तर्मुख्यसंपादनमात्ररूपः योगश्चित्तवृत्तिनिरोधइतिपातञ्जलसूत्रात् सौत्रलक्षणंतु चित्तादिपदविवरणभूतैरग्रिमसूत्रैःप्रपंचितंतद्भाष्येव्यासेन अस्य



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुर्लक्षण्यांप्रत्युक्तत्वान्नरोधयतिमांयोगोनसांख्यंधर्मउद्धवेत्यादिभिःश्रीभागवतादिवचनैरसाधकत्वकथनान्नभगवत्प्राप कत्वम् तस्माद्योगस्य आदिशब्दात्स्वाध्याययजनप्रभृतीनांचबलैरणिममहिमेष्टभूतिपुण्यातिशयादिभिःप्राप्तुंनालंस्म समर्थानासन् नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्मावृणुतेतनुंस्वामिति

**नालंस्मयोगादिबलैर्यमाप्तुंपूर्वेस्वसर्वस्वमुपाश्रितांस्तम् ॥**
**रसात्मकंप्रापिपदप्प्रयत्नान्श्रीवल्लभंनौमिकृपार्णवंतम् ॥ ६४ ॥**

कठवल्लीश्रुतेः नाहंवेदैर्नतपसेति तेनाधीतश्रुतिगणाइतिगीताभागवतादिवचःसहस्राच्च अतोभक्त्याहमेकयाग्राह्यः भक्त्यैवतुष्टिमभ्येतिविष्णुर्नान्येनकेनचित् प्रीयतेऽमलयाभक्त्या हरिरन्यद्विडंबनं भक्त्यातुतोषभगवान्गजयूथपाये त्यादिवाक्यैरुक्तवरणश्रुत्याचवरणभक्त्येकसुलभंभगवंतं भक्तिमुख्यांगेनविरहेणशोधितानधिकारिणःप्रापयतीतिनकोपी

१ ब्रह्मसूत्रेषुद्वितीयाध्यायप्रथमपादे एतेनयोगःप्रत्युक्तइतिसूत्रे योगस्यनिराकृतत्वात्. २ अणिममहिमादयोयोगजन्याः इष्टभूतिःस्वाध्यायजन्या यंयंक्रतुमधीतेतेनतेनास्येष्टंभवतीतितैत्तिरीयश्रुतेः .

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हशंकावकाशः एवं अश्रमेणभगवत्प्रापकत्वात् कृपार्णवं दयासमुद्रं तं श्रीवल्लभं नौमि यद्वा कृपार्णवंतं कृपानुग्र
हः पुष्टिरितियावत् तत्प्रतिपादका ये अर्णाः अक्षराणि वाचःतद्वंतमित्यर्थः समुद्रोपि उपाश्रितान् तीरप्राप्तान्
देवान् रसात्मक द्रवीभूतंअमृतरूपंस्वसर्वस्व प्रापितवान् कीदृशान् देवान् अपूप्रयत्नान् अप्सुजलेमथनरूपःप्रय
त्नोयेषांतान् प्रथमपक्षेअनर्चिचेतिपकाराद्वित्वादुभयार्थसंगतिः किंभूतममृतं यत् योगस्य जलसंयोगस्य आदिशब्दा
न्निमज्जनप्रभृतेश्चबलैः प्राप्तुं पूर्वं पूर्वदेवा दैत्याः नाल नाशक्नुवन् अब्धिर्मेघेभ्योजलंददातीतितादृशार्थस्फूर्तिर्वैहास्तु
अस्मिन्पक्षेरसोजलं समासोक्तिरलंकारः प्रस्तुतेश्रीमदाचार्यवर्णने अप्रस्तुतसमुद्रवृत्तांतस्फूर्तेः लक्षणंतूक्तं कृपार्णव
मितिच्छेदेतुरूपकमेव उपजातिर्वृत्तम् ॥ ६४ ॥ एवंपरमफलप्राप्तिपर्यंतमुक्तं अथोक्तसाधनकरणाद्विवक्षितफल
प्राप्तिः श्रीमदाचार्यसंश्रयेणतन्मार्गानुगामिनामद्यापितत्कृपयैवमेवभवतीत्याहुः कलाविति तं वल्लभाख्यंगुरुं कलये
ध्यायामि तं कं येन संक्लृप्ता पुनर्यथानभज्येततथासम्यक्कल्पिता या अच्युतस्यभजनरूपा नौः तयाकरणभूतया
आश्रितजनः कृतस्वाचार्याश्रयोजनःतादृशनावंवाआश्रितोजनःकलौ कलियुगेपिभवाब्धिं संसारसागरं सानंदंभगव
त्सेवादिप्रयुक्तानंदसहितमेवयथास्यात्तथानतुहिमातपादिजन्यक्लेशपूर्वकं तरति समुद्रत्वमेवोपपादयंति दुरंतमित्यादि
ना दुःखेनांतोनाशः समुद्रपक्षे पारश्च यस्य तम् तेनदुस्तरत्वात्समुद्रत्वारोपइतिभावः पुनःकीदृशं महामायेति महान्



For Private and Personal Use Only

मायारूपआवर्तो जलचक्रभ्रमोयत्रतम् प्रथमतोमाययैवजीवाआमूलं संसारेऽभिनिवेश्यंते आवर्तेनेवजले संसारस्यपं चपर्वाविद्योपजीव्यत्वात्तस्याश्च विद्याविद्येममतनूविद्धयुद्धवशरीरिणां मोक्षबंधकरीआद्येमाययामेविनिर्मितेइत्यादि श्रीभागवतादिवचनैर्मायाजन्यत्वादुचितमेतत् मायायाआवर्तवद्भ्रमहेतुत्वंतु भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेत्या दौप्रसिद्धं पुनःकिंभूतं विपुलेति विपुलोविस्तीर्णोमृत्युभयकारीचकालरूपोमकरोमहाजलजंतुविशेषो यत्रतं विपुलेतिभय

कलौयत्संक्लृप्ताच्युतभजननावाश्रितजनोमहामायावर्तविपुलभयकृत्कालमकरं ॥
दुरंतंदुःसंगानिलबलचलोर्मीभिरभितोभवाब्धिंसानंदंतरतिकलयेवल्लभगुरुम् ॥ ६५ ॥

विशेषणंवा महामकराहि नौकांतत्स्थजनांश्चगिलंति एवंकालोपिताद्दशभगवदिच्छयासन्मार्गास्तद्वर्तिमानवांश्चगिलति एतन्मार्गरूपनौकायांतुसम्यक्क्लृप्तत्वात्कालमकरभयंनास्तीत्याशयः नैषां वयं नच वयः प्रभवामदंडइतिषष्ठस्कंधेयम वाक्यात् वयः कालः भूयःकथंभूतं दुःसंगेत्यादि दुःसंगरूपो यः अनिलोवातः तद्बलेन चलाः प्रवृत्ता या ऊर्मयः काम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





क्रोधादयःपक्षेवीचयश्च ताभिरभितःसर्वतउपलक्षितं इत्थंभूतलक्षणेतृतीया तैर्दुरंतमितिवा ऊर्मिःस्त्रीपुंसयोर्वीच्यांप्रका
शेवेगभंगयोः वस्त्रसंकोचरेखायांवेदनापीडयोरपीतिमेदिनी कामक्रोधादीनामपिवेगवेदनादिरूपत्वादूर्मित्वव्यवहारःपुराण
प्रभृतिषुप्रसिद्धतरः कृदिकारादक्तिनइतिवार्तिकेनङीप् यत्रभक्तानामपिदशमस्कंधादिषु भवत्पदांभोरुहनावमत्रतेनिधाय
याताइतिमहिमाकथ्यते तत्रांकिमुवक्तव्यंतदर्थमेवावतीर्णस्यसाक्षाद्भगवतःश्रीमदाचार्यस्यतथामहिमनि अतःसर्वयुक्त
मुक्तं अत्र संसारेसमुद्रत्ववन्महामायादिष्वावर्तत्वादेरारोपात्सावयवंकस्मिश्चिदंशेश्लेषविशिष्टं सानंदमित्युक्त्याआधिक्य
गर्भताद्रूप्यरूपकमलंकारः लक्षणादिकंतुपूर्वमेवोपन्यस्तम् उक्तलक्षणकंशिखरिणीवृत्तम् ॥ ६५ ॥ एवं श्रीमदाचा
र्यान्संश्रयतामद्यापिपरिश्रममंतरेणैवपरमफलप्राप्तिर्भवतीत्युक्त्वा निरूपितस्यतद्यशसोऽत्यौज्ज्वल्यंवर्णयंतस्तस्यसर्वदि
क्प्रसिद्धत्वादलंबहुलवर्णनेनेत्यभिप्रेत्याहुः त्वत्वेति यस्य श्रीमदाचार्यस्य श्रवसि यशसि स्वां स्वकीयां चंद्रसंबंधिनी
मितियावत् श्रियं अत्यंतनैर्मल्यशौभ्यलक्षणांशोभांतापहरणादिलक्षणांरचनांवापक्षेसंपदंश्रीर्लक्ष्यांसरलद्रुमे वेषोपकरणे
वेषेरचनायांमतौगिरि शोभात्रिवर्गसंपत्योरितिहैमः त्वत्वा ककुब्वलयं दिङ्मंडलंदिशस्तुककुभःकाष्ठाइत्यमरः कंकणप
र्यायंवलयशब्दमाकृतिसाम्यान्मंडलेपिव्यवहरंति यथा उदितेकुमारसूर्येकुवलयमुल्लसतिभातिनक्षत्रमित्यत्रवास्तवार्थे
कुवलयंभूमंडलं गतेसतिअयंप्रसिद्धः हिमकरः चंद्रः प्रतिलब्धुकामः तां स्वश्रियं प्रत्यावर्त्यप्राप्तुमिच्छन्सन् लुंपेदव ॥७३॥

श्पमःकृत्येतुंकाममनसोरपीतिमलोपः किलेतिसंभावनायां अनुपथं पंथानंपंथानमनु अव्ययंविभक्तीत्यादिनासमासः ऋक्पूरब्धूः पथामानक्षइत्यःमार्गमार्गप्रतीत्यर्थः सकरप्रचारं कराणां किरणानां पक्षे हस्तानांच प्रचारेण प्रसारणेन सहितंयथास्यात्तथा बलिहस्तांशवःकराइत्यमरः भ्राम्यति पर्यटति चंद्रो यशसापहृतस्वश्रियाःपुनर्लाभायहस्तान्प्रसा रयन् प्रतिदिङ्मार्गपरिभ्रमतीत्यर्थः अत्रयशसोग्रहणार्थंचंद्रस्यपरिभ्रमणवर्णनेनतस्ययशोपरिग्रहणद्योतनाच्चंद्रगतिस्थ

हृत्वाश्रियंकिलककुब्वलयंगतेस्वांयस्यश्रवस्यनुपथंप्रतिलब्धुकामः ॥
भ्राम्यत्ययंहिमकरःसकरप्रचारंस्फारंददातुशमपारगुणोगुरुर्नः ॥ ६६ ॥

लादप्यधिकदूरगत्वंयशसोध्वन्यते सःनोऽस्माकं गुरुराचार्यःस्फारं शं भगवद्लीलालाभलक्षणंनिरतिशयंकल्याणंददातु नो स्मभ्यंददात्विंतिवा कीदृशोगुरुः अपारगुणः स्पष्टं एतेनयशसोगुणप्रयुक्तत्वनियमाद्गुणानांचानंतत्वातयुक्तंयशसोपि सकलब्रह्मांडव्याप्तत्वं किंच गुणानामनवधितयानैखिल्येनतान्निरूपणस्यापिबाहुकरणकार्णवतरणसोदरत्वाद्वर्णनादु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिरंसाप्येतेनद्योत्यते अत्रस्वाभाविकेचंद्रभ्रमणे यशोपहृतस्वश्रीलिप्साहेतुकत्वंसंभाव्यतइत्युत्प्रेक्षालंकारः तत्रालि
प्सारूपोहेतुरेवसंभाव्यतइतिसचासिद्धएवेत्यसिद्धास्पदाहेतूत्प्रेक्षेयम् लाभकामनायांहेतुभावस्यगम्यमानतयानादरेत्व
सिद्धास्पदाफलोत्प्रेक्षैवास्तु तत्राप्युत्प्रेक्षावाचकंकिलशब्दप्रयोगाद्वाच्यैषा एवमिहभावाभिमानत्वादिकमितरदप्यूह्यं
लक्षणादिकंतुप्रपंचितंसाहित्यदर्पणे भवेत्संभावनोत्प्रेक्षाप्रकृतस्यपरात्मना वाच्याप्रतीयमानासाप्रथमंद्विविधामता वा
च्येवादिप्रयोगेस्यादप्रयोगेपरापुनः जातिर्गुणःक्रियाद्रव्यंयदुत्प्रेक्ष्यंद्वयोरपि तदष्टधापिप्रत्येकंभावाभावाभिमानतः गुणक्रि
यास्वरूपत्वान्निमित्तस्यपुनश्चताः द्वात्रिंशद्विधतांयांतितत्रवाच्याभिदाःपुनः विनाद्रव्यंत्रिधासर्वाःस्वरूपफलहेतुगाइत्या
दि कुवलयानंदेपि संभावनास्यादुत्प्रेक्षावस्तुहेतुफलात्मना उक्तानुक्तास्पदाद्यात्रासिद्धासिद्धास्पदेपरेइति वसंततिलका
वृत्तम् ॥ ६६ ॥ अथ गुणानामपारत्वात् स्तोत्रमुपसंजिहीर्षंतः आरंभे यथा प्रथमतस्तवनोपयोगिवाक्सि
द्धयेचरणाब्जंततोवाङ्मनसागोचरवर्ण्यगुणस्फूर्त्तयेस्वरूपंचवंदितवंतः एवमुपसंहारेपिस्वहृदयेवर्णितगुणानुगुणसार्व
दिकध्यानसंपत्तये पूर्वंस्वरूपं ततो दैन्यप्रादुर्भावेन पूर्वोक्त तनुजादिकरणात् इष्टफलप्राप्तयेस्तुतिसमाप्तौ तत्पदारविंदं
च तात्पर्यभेदात् पूर्वक्रमव्यत्ययेन आशिश्रीषंतः श्रीमदाचार्याणां मुख्यतया अप्राकृताग्निरूपत्वं स्फुटीकुर्वंतः
प्रथमं स्वरूपं भजंते उपाधीति व्रजेशस्य स्वलीलासहितपुरुषोत्तमस्य वक्त्रपावकं मुखाग्निं भजे कीदृशं तं अद्भुतं



For Private and Personal Use Only

लौकिकवन्हितोविलक्षणं तदेवोपपादयंतिउपाधीत्यादिना उपाधेर्मायाऽविद्यारूपस्ययोगंसंबंधंविनैवसमस्तवस्तु..स
कंसमग्रवस्तुप्रकाशकं शांकरमतेहिमायोपहिताद्ब्रह्मणोजगदुत्पद्यते तच्चमायिकमेव अतएव शुक्तौरजतवद्भ्रांतिपरि
कल्पितत्वेनास्यामिथ्यात्वं जीवश्चाविद्योपहितचैतन्यंव्यापकएवेत्युच्यते अस्मन्मयेतुशुद्धब्रह्मणएवकर्तृत्वं सर्वाऽप्राकृ
तानित्यविशेषशालित्वात् श्रुतौप्राकृतव्युदासपूर्वकमप्राकृतविशेषाणांस्थापनात् प्रकृतैतावत्त्वंहिप्रतिषेधतिततोब्रवी
तिचभूयइतिसूत्रकृतैवतथाव्यवस्थापनात् मतांतरेतुनिर्विशेषंपरमंगीकृत्यतस्याऽकर्तृत्वायोपहितात्सर्गउच्यते तत्रायंप
रंसंशयःउपाधिःसादिरनादिर्वेति आद्येकर्त्रंतराभावान्निर्विशेषस्यैवतत्कर्तृत्वापत्त्यानिर्विशेषत्वभंगःद्वितीयेतस्यब्रह्मवन्नि
त्यत्वात्द्वैतापत्तिः जगदपिनभ्रमात्मकं अधिष्ठानसंस्काराद्यसंभवात् किंतु यदिदंकिंचतत्सत्यमित्याचक्षतइत्यादिश्रुति
शतैः सत्यमेव इदंचभाष्यकृताऽविरोधाध्याये प्रथमपादेतदनन्यत्वमारंभणशब्दादिभ्यइत्यादिसूत्रेषुस्पष्टतयाप्रादर्शि
तत्रैवद्वितीयपादेपरमतंचनिराकारि जीवश्चमुंडकादिष्वग्निविस्फुलिंगदृष्टांतश्रवणादितःस्वांशः एषोणुरात्मेत्यादिश्रुति
बलादणुरेव इदमपिजडजीवनिरूपणपादेस्पष्टमाकरइतिसंक्षेपः अतोमूलोक्तंयुक्तमेव अग्निस्तु काष्ठाद्युपाधियोगेनज्व
लन्नेवसर्ववस्तुप्रकाशयति पुनःकिंभूतंरसात्मसाधनेन रसात्मेतिभावप्रधानोनिर्देशः भगवतोरसरूपत्वासिद्धीकारेण
नीरसानां पुरुषोत्तमराहितानां भक्तिशून्यानांवा आगमौघानां असच्छास्त्रगणानां नाशकं दाहकं यद्यपि नीरसान्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुष्कान् अगमौघान् तरुखंडान् ज्वलनोपिज्वालयति तथापिज्वालारूपसाधनेनैव नतुरसात्मसाधनेन जलात्मना करणेन भूयःकीदृशं निसर्गशीतलं स्वभावादेवसौम्यं हुतवहस्त्वत्युष्णप्रकृतिर्भवति च पुनः सर्वकालेषुसौख्यभावकं सुखहेतुं सर्वदानुच्छेद्यभगवदानंदानुभावकत्वात् उषर्बुधस्तुबहुशोहेमंतशिशिरयोरेवसुखदोभवति उष्णतौंतु

उपाधियोगमंतरासमस्तवस्तुभासकंरसात्मसाधनेननीरसागमौघनाशकं ॥
निसर्गशीतलंचसर्वकालसौख्यभावकंभजेऽखिलेष्टमद्भुतंव्रजेशवक्रपावकं ॥ ६७ ॥

प्रत्युतसंतापकः भूयःकथंभूतं अखिलैः सर्ववर्णैरिष्टं इच्छाविषयीकृतं पूजितंवा इच्छतेर्यजतेर्वाक्तः सर्वेषां इष्टं वांच्छितफलंयस्मात्तमितिवा हव्यवाहंतु त्रैवर्णिकाएवयजंते तत्राप्यद्यत्वेतु कलौवर्णद्वयंमतमितिवाक्या ब्राह्मणाएव तानेवचसःफलेनयोजयति एवं विरुद्धधर्माश्रयत्वेपि व्रजेशवक्रपावकत्वादलौकिकाग्नित्वं अत्र



For Private and Personal Use Only

प्रथमतोमतांतरनिरासपुरःसरंयथार्थमाहात्म्यज्ञानाय सत्सिद्धांतप्रकाशः ततोभजनीयस्वरूपनिरूपणेन विरोधिनिरा
करणेनच भक्तिप्रचारणं अनंतरमेवंकरणाच्छरणागतानांदैवानांतापनिर्वापणेन शैतल्यकरणं ततः साधननिविष्टानां
तेषां तत्तदुत्सवाद्यानंदेनप्रतिक्षणमुज्जृंभमाणतादृक्श्रवणकीर्तनादिप्रमोदेनचसर्वकालेषुसौख्यविधानं अवसाने
संपन्नसाधनानामपरिश्रमेणसुदुर्लभेष्टप्रापणंचेतिक्रमाद्विशेषणपंचकेनोक्तंभवति अत्राग्नित्वेपितद्विरुद्धानांशैतल्यादि
धर्माणांवर्णनाद्विरोधोऽलंकारः लक्षणंतुकाव्यप्रकाशे विरोधःसोविरोधेपिविरुद्धत्वेनयद्वचइति परिहारस्त्वलौकिका
ग्नित्वेनदर्शितएव तत्रापि शैतल्यं अग्निद्रव्यविरुद्धोगुणः सर्वकालावच्छेदेनसौख्यभावनंतद्विरुद्धाक्रियेत्याद्यूह्यं
प्रपंचस्तुसाहित्यदर्पणे जातिश्चतुर्भिर्जात्याद्यैर्गुणोगुणादिभिस्त्रिभिः क्रियाक्रियाद्रव्याभ्यां यद्द्रव्यंद्रव्येणवामिथः
विरुद्धमिवभासेतविरोधोऽसौदशाकृतिरिति प्रथमचरणेतुउपाधियोगरूपकारणंविनैवप्रकाशनवर्णनाद्विभावनापि लक्षणं
तुकुवलयानंदे विभावनाविनापिस्यात्कारणंकार्यजन्मचेदिति द्वितीयचरणेतुविरुद्धयोःसाधनकार्ययोर्वर्णनात्प्रथमोविषम
भेदःलक्षणंत्वाहविश्वनाथः गुणैःक्रियेवायत्स्यातांविरुद्धेहेतुकार्ययोःयद्वाऽऽरब्धस्यवैफल्यमनर्थस्यचसंभवः विरूपयोः
संघटनायाचतद्विषमंमतमिति मतांतरेत्विहविभावनाभेदः पूर्वोत्तरार्द्धयोःपादांतेऽनुप्रासः द्वितीयतुर्यपादयोः रसात्मसा
रसाभजेनिजेव्रजेइत्यादिः क्रमिकानुप्रासोपिस्फुटएव अत्र भावकंपावकमित्यादेः साहित्यदर्पणमतेत्वंत्यानुप्रासत्वं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथोक्तं तत्र व्यंजनंचेद्यथावस्थंसहाद्येनस्वरेणतुआवर्त्यतेन्त्ययोज्यत्वादंत्यानुप्रासएवतादितिअतस्तन्मतेअततिश्लो
केषु वृक्षोदक्षोहेतुर्नेतुरित्यादावंत्यानुप्रासोबोध्यः काव्यप्रकाशकारादिमतेत्वयंसर्वश्छेकानुप्रासएव पंचचामरंवृत्तम्
जरौजरौजगाविदंवदंतिपंचचामरमितितल्लक्षणात् ॥६७॥ एवंस्तोत्रपरिसमाप्तौस्वरूपंनिरूप्यसिद्धांते सर्वधर्मान्परित्य
ज्यमामेकंशरणंव्रजेत्यादिवाक्यैः शरणागतेरेवमुख्यत्वाद्दैन्यातिशयाद्भक्तिदार्ढ्यायचरणवर्णनपूर्वकंतामाहुः तापत्रयेति
यदीयम् यस्यचरणस्यसंबंधिस्मरणं तापत्रयापहरणं आधिदैविकादितापापहारकं ननुतन्मूलभूतस्यसंसारस्यविद्य
मानत्वात्कुतएतदितिचेत्तत्राहुः तरणमिति तत् भवाब्धेरपितरणं तरणसाधनं करणेल्युट् ननुचित्ताशुद्धौकथंस्मर
णाविच्छेदः कथंततत्स्थाहंत्वममत्वनिवृत्तिरित्याशंक्याहुः चेतोविशुद्धिकरणमिति इदंचेतसोपिविशेषेण शुद्धिकारकं
शुद्धौविशेषस्तु योवेदनिहितंगुहायामित्यादिश्रुत्युक्तःसर्वत्रात्मनिचाक्षरत्वभानरूपः तथासतिकुतस्तरांसंसारइतिभावः
यदीयं स्मरणमेवंविधं तच्चरणं प्रपद्यइतिसंबंधः कीदृशंतत् गोपीशेति उक्तरीतिकचेतोविशुद्ध्याजीवस्यधामत्वे
सिद्धे गोपीशे यो भक्तानां भावः आसक्तिः तस्यचतेषुयोभावस्तदुभयपोषकं गोपीशपदात्पक्षद्वयेपिमुख्यभक्त
साहित्यंभगवतोबोध्यं उक्तसमग्रप्रणयने हेतुस्तु निजेषु दैवेषु करुणं दयायुक्तमित्येव करुणाशब्दादर्शआद्यच् तादृ
शं स्वाचार्यवर्यचरणं वैष्णवत्वात्सृष्टाचार्यायेमध्वरामानुजादयस्तेषु वर्यः सर्वेषु प्रथमस्यविष्णुस्वामिसंप्रदायस्य



For Private and Personal Use Only

प्रवर्तकत्वात् यद्वा स्वीयआचार्यवर्यः वल्लभाख्यः तस्य चरणं शरणं प्रपद्ये संसाराद्रक्षितृ प्राप्नोमि अथवा शरणं गृहं प्रपद्येइत्यर्थः स्वमतेऽक्षरब्रह्मणोधामत्वात् तस्यचपुरुषोत्तमचरणत्वेनापिनिरूपणात् श्रीमदाचार्याणांचपुरुषोत्तम त्वान्नानुपपत्तिः निःसाधनत्वेनतदेकशरणप्रपत्त्याममापिसमग्रमेतन्मार्गीयंफलंतत्कृपातः संपत्स्यतइतिभावः अत्र स्मर

तापत्रयापहरणंतरणंभवाब्धेश्चेतोविशुद्धिकरणंस्मरणंयदीयं ॥
गोपीशभावभरणंकरुणंनिजेषुस्वाचार्यवर्यचरणंशरणंप्रपद्ये ॥ ६८ ॥

णमपितापत्रयापहरणसंसारार्णवतरणाद्यनेकमहाकार्यहेतुरित्यद्भुतरसस्यभक्तिरसांगत्वाद्रसवदलंकारः लक्षणंत्वाहालं कारदीपिकोद्दिष्टालंकारप्रकरणेआशाधरभट्टः अन्यांगत्वेरसस्यस्याद्रसवन्नामतद्यथेति शब्दालंकारस्तु पादचतुष्टये पिमध्येन्यक्षरश्छेकानुप्रासः लक्षणंतु चंद्रालोके स्वरव्यंजनसंदोहव्यूहामंदोहदोहदा गौर्जगज्जाग्रदुत्सेकाच्छेकानुप्रासभासु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रेति वसंततिलकावृत्तम् ॥ ६८ ॥ एवं स्तुत्वोपसंहरंति इतीति गोस्वामीतिहिश्रीमदाचार्यवंशस्योपनाम अर्थ
स्तु गोर्वाचः स्वामी वागीशत्वात् यद्वा गोर्धेन्वाःस्वामी गोपालरूपत्वात् अथवा गोर्भूमेःस्वामी तत्स्थाऽधर्मनिरासकत्वा
दिति तादृशावटंकेन अर्थादाचार्यवंश्येन गोकुलाधीशनाम्ना इति अनेनप्रकारेणशब्दसंघटनारूपेण तत्कृपया तेषामा

इतितत्कृपयाचार्यस्तुतिरत्नावलीकृता ॥ गोस्वामिगोकुलाधीशनाम्नेयंपर्यपूर्यत ॥६९॥

चार्याणामेवकृपारूपसाधनेनैवकृताइयं सन्निहिता आचार्याणां श्रीवल्लभाख्यानां स्तुतिरत्नावली एतन्नामकः ग्रंथः
पर्यपूर्यत परिपूर्तिमगमत् इहस्तुतिरत्नावलीतिरूपकम् ॥ ६९ ॥ अथमनुष्यकृतोभगवत्स्तवोहि यथार्थोनभवति
यतोवाचोनिवर्तंतेअप्राप्यमनसासहेतितत्रवाङ्मनसाऽप्रवृत्तेः अतस्तत्प्रयुक्तापराधं क्षमापयंति यन्मयेति मया अज्ञा



For Private and Personal Use Only

नेन यत अत्र स्तोत्रेऽनुचितमप्युक्तं अपिःसंभावनायां अपिसंभावनाप्रश्नशंकागर्हासमुच्चयइतिमेदिनी तत् श्रीमदा चार्याःश्रीशब्देन रचनाशोभाबुद्धिसरस्वतीप्रभृतयोत्रैकशेषात्संगृहीताः तद्वंत आचार्याः श्रीर्वेषरचनाशोभाभारती सरलद्रुमे लक्ष्म्यांत्रिवर्गसंपत्तिविधोपकरणेषुच विभूतौचमतौचेतिमेदिनी अथवा श्रियो लक्ष्म्याःमदोहर्षोयस्मात्तसः श्रीमदःभगवान् तत्संबंधिनस्तद्रूपावाआचार्याः पाद्माद्युक्तलक्षणकास्सत्संप्रदायप्रवर्तकाः क्षमंतां यतस्तेवत्सलाः

**यन्मयाज्ञतयात्रोक्तमयुक्तमपिवत्सलाः ॥ क्षमंतांश्रीमदाचार्याःपोतेनपितरौयथा ॥ ७० ॥**

कृपालवः यथा पोतेन बालेनोक्तमयुक्तमपि पितरौ मातापितरौ क्षमेते तथात्रापि कूटस्थत्वेनपितृत्वाद्योग्याक्षमेति भावः पिताचमाताचपितरौ पितामात्रेत्येकशेषः पोतःपाकोर्भकोडिंभइत्यमरः आचार्यलक्षणंतुसारसंग्रहे पाद्मे सह स्त्रशाखाध्यायीचसर्वयज्ञेषुदीक्षितः कुलेमहतिजातोपिनगुरुःस्याद्वैष्णवः यस्तुमंत्रद्वयंसम्यगध्यापयातिवैष्णवः सआ चार्यस्तुविज्ञेयोभवबंधविनाशकइति हारीतस्मृतावपि आलोक्यसर्वशास्त्राणिपुराणानिचवैष्णवः तदर्थमाचरेद्यस्तुसआ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चार्यइतीरितइति एवमन्यत्रापि आचिनोतिहिशास्त्रार्थानाचारेस्थापयत्यापि स्वयमाचरतेयस्मात्तस्मादाचार्यईरितइति सांगोपमालंकारः ॥ ७० ॥ एवंक्षमापयित्वात्रस्तोत्रेप्रेक्षावत्प्रवृत्त्यर्थंफलंप्रदिदर्शयिषवस्तद्यदारंभे एनोविनष्टिःपरम स्यतुष्टिरितिद्विविधमुक्तं तदेवात्रक्रमाच्छ्लोकद्वयेनप्रदर्शयंति स्तोत्रस्येत्यादि अस्यश्रीवल्लभस्तुतिरत्नावल्ल्याभिख्यस्य स्तोत्रस्य पाठेति पाठः कीर्तनं श्रवणं पदवाक्यशक्तितात्पर्यनिर्द्धारः आदिशब्दात्स्मरणंच तेभ्यो हेतुभ्यः मर्त्यस्ये

**स्तोत्रस्यपाठश्रवणादितोस्यमर्त्यस्यपापानिपलायितानि ॥**
**सद्योभवंत्येवयथावनस्यत्रस्ताहरेर्गर्जनतोमृगाद्याः ॥ ७१ ॥**

ति जात्यभिप्रायेणैकवचनं तेन मनुष्याणांपापानि बहुवचनेनकायिकादिभेदादनेकविधान्यपि तानि सद्यः तत्कालं पलायितानि भवंत्येवेत्यवधारणं उपसर्गस्यायताविति परोपसर्गावयवरेफस्यलत्वं तत्रोपमानं यथा हरेः सिंहस्यगर्जनात् त्रस्ता वनस्य संबंधिनः मृगादयः श्वापदाः पलायंते तथेत्यर्थः तस्माद्धारतसर्वात्माभगवान्हरिरीश्वरः श्रोतव्यःकी र्तितव्यश्चस्मर्तव्यश्चेच्छताऽभयं तथा नाम्नोस्तियावतीशक्तिः पापनिर्हरणेहरेः तावत्कर्तुंनशक्नोतिपातकंपातकीजन ॥७८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिवचनेभ्यउक्तंसर्वंयुक्तं अत्रग्रंथसिंहयोःपठनगर्जनयोर्मर्त्यवनयोःपातकचतुष्पदानांचपरस्परमुपमानोपमेयभा
वात्स्तबकोपमालंकारः लक्षणंतूक्तं इंद्रवज्रावृत्तम् ॥ ७१ ॥ ननुनवीनकृतौकुतःपापनिवर्तकत्वमित्याशंक्यतत्सा
धयंतः शिष्टतुष्टिरूपंफलंदर्शयंति श्रद्धालवइति योह्येतंग्रंथं पठेत् अर्थवाविचारयेत् सश्रीमदाचार्यचरित्रश्रद्धया तज्जि
ज्ञासयावातथाकुर्यात् अतःश्रद्धालवे तथा अर्थविदे मननेननिश्चितार्थाय चकारद्वयंश्रद्धार्थज्ञानयोःसमुच्चयात्कार्य
सिद्धिर्नत्वन्यतरस्मादितिबोधनार्थं तस्मै पाठश्रवणादिकर्त्रे पत्येशेतेइत्यादिवत्क्रिययायमभिप्रैतिसोपिसंप्रदानमिति
संप्रदानता पुरुषोत्तमस्य क्षराक्षरपुरुषाभ्यांआधिभौतिकाध्यात्मिकाभ्यां आधिदैविकत्वेनोत्तमस्यगीतादिप्रसिद्धस्यभ
गवतः आस्यं मुखं सः श्रीवल्लभाख्यः तुष्येदेव हरिमुखत्वात् भगवतोहिस्तुतिप्रियत्वं अलंकारप्रियोविष्णुःस्तुतिप्रि
योविष्णुरित्यादिश्रुतिसिद्धं स्तव्यःस्तवप्रियःस्तोत्रमितिविष्णुनामसहस्रेचप्रसिद्धं तस्यचप्रत्यवयवंपूर्णत्वंसर्वावयवका
र्यसंपत्तिश्चेति विश्वतश्चक्षुरुतविश्वतोमुखः सर्वतःपाणिपादांतमित्यादिश्रुतिबलात्सूत्रकृताव्युत्पादितमेव इदमेव त
स्याऽप्राकृतपूर्णगुणत्वंनाम अतएवश्रीमदाचार्याणांमुखरूपत्वेपिपूर्णकृष्णत्वम् कृष्णावतारेपितथैवनिर्णयात् तथाहि
अपरिच्छिन्नस्यब्रह्मणःतावन्मात्रमायादूरीकारेणपरिच्छिनस्वरूपस्यप्रकाशने सर्वत्रव्यापकापेक्षयांशत्वंतुतत्रापिविद्य
तेअंशत्वबोधकवाक्यान्यप्येकमंशत्वपराण्येव तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणीत्यत्रापिविष्ण्वंशपदसमभिव्याहारादेव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेवव्याख्यातंसुबोधिन्यां विष्णुशब्दस्यविवेष्टीतिव्युत्पत्याव्यापकार्थकत्वात् तथाचयथातत्रैवंप्रकारकांशत्वेपिपूर्णत्वम् अन्यथा कृष्णस्तुभगवान्स्वयं वसुदेवगृहेसाक्षादवतीर्णःपरःपुमान् नृणांनिश्रेयसार्थायव्यक्तिर्भगवतोनृप यदोर्वंशंनरःश्रुत्वासर्वपापैःप्रमुच्यते यत्रावतीर्णोभगवान्परमात्मानराकृतिरित्यादिविरोधः तथामुखत्वेपिश्रीमदाचार्याणांपूर्णत्वमेव एवंचसाक्षाद्भगवतितुष्टेपापनिवृत्तिरतितरांसुलभेत्युक्तंभवति तस्मिन्श्रीवल्लभाचार्येतुष्टेसातिचलीलायुक्तः श्री

श्रद्धालवेचार्थविदेचतस्मैतुष्येत्सआस्यंपुरुषोत्तमस्य ॥
तुष्टेचतस्मिन्नहिदुर्लभस्याल्लीलायुतःश्रीपुरुषोत्तमोपि ॥ ७२ ॥

पुरुषोत्तमोपिदुःखलभ्योनभवेत्किंतुसुलभएव हि निश्चयेनेदं अपिशब्दःकैमुतिकद्योतकः तेनतत्सृष्टान्यावरवस्तुलाभेकिंवाच्यमितिभावः तथाचनवीनकृतित्वेपिवर्ण्यमहिम्नोक्तफलसाधकत्वमक्षतमेव तद्वाग्विसर्गोजनताघविप्लवइत्यादिवचनैस्तथानिश्चयात् विशेषस्त्वग्रिमश्लोकेदर्शयिष्यते इहपूर्वश्लोकोक्तंसमर्थनीयं ग्रंथस्यपापनाशकत्वंस्तव्यसंतोषरूपहेतुनासमर्थितमितिदर्शितलक्षणकंवाक्यार्थहेतुकंकाव्यलिंगमलंकारः न च समर्थनीयसमर्थनयोर्भिन्नश्लोकगतत्वाद



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लंकारानिष्पत्तिःशंक्या कुवलयानंदोपन्यस्ते साहित्यपाथोनिधिमंथनोत्थंकर्णामृतंरक्षतहेकवींद्राः यत्तस्यदैत्याइवलुंठ
नायकाव्यार्थचोराःप्रगुणीभवंति गृण्हंतुसर्वेयादिवायथेच्छंनास्तिक्षतिःक्वापिकवीश्वराणां रत्नेषुलुप्तेषुबहुष्वमर्त्यैरद्यापि
रत्नाकरएवसिंधुरित्याक्षेपोदाहरणेप्रतिषेध्यप्रतिषेधयोर्भिन्नश्लोकगतत्वेप्यलंकारनिष्पत्तिस्वीकारात् इंद्रवज्रावृत्तं
॥ ७२ ॥ एवंफलमुक्त्वा वर्ण्यप्रभावादेवेदमुच्यते नतुस्वकृतिश्लाघाभिप्रायेणेतिबोधयंतऔद्धत्यंपरिहरंतःप्रेक्षकानवि
दुषःप्रार्थयंते क्लृप्तमिति मया क्लृप्तं कृतं एतं श्रीवल्लभस्तुतिरत्नावल्याख्यं कलागण्यपद्यस्तवं कलाभिः चातुर्यैः
गण्यस्य स्तुत्यस्य अथवा कलाः अवतारादिरूपा अंशाःअगण्यायस्य सकलागण्योमूलभूतः पुरुषोत्तमः आहिता
ग्न्यादेराकृतिगणत्वात्तत्रपाठकल्पनयाविशेष्यस्यपूर्वनिपातः तद्रूपस्य श्रीमदाचार्यस्य पद्यैःश्लोकैः कृतंस्तवं कला
गण्यस्यश्रीमदाचार्यस्यपदौचरणौयातिप्राप्नोतीतिकलागण्यपद्यः तादृशंस्तवमितिवा पदंघ्रिश्चरणोस्त्रियामित्यमरः
वस्तुतस्तु कलाभिश्चतुःषष्टिकलाभिः गण्यानि अर्थात् चतुःषष्टिसंख्याकानिपद्यानियत्रतादृशंस्तोत्रं यद्यप्यत्र
त्रिसप्ततिःश्लोकास्तथाप्यारंभे मंगलोपोद्घातप्रतिज्ञाप्रतिपादकंश्लोकचतुष्टयं अंते संपूर्तिफलस्तुत्यादिबोधकं
इतिश्रीवल्लभाचार्येत्यादिश्लोकपंचकंचानंतर्भाव्यगणने साक्षात् स्तोत्रपद्यानि चतुःषष्टिरेवभवंतीत्यदोषः इदं
बुधैः प्रेक्षावद्भिःशोधयित्वा अपप्रयोगादिदोषसत्वेतद्राहितंविधाय अत्रग्रंथे यत् सारं न्याय्यं श्रेष्ठंवा सारोबले

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थिरांशेचन्याय्येक्लीबंवरेत्रिष्वित्यमरः तदेवगृह्यतां प्रार्थनायां लोट् इतरत् असारं मागृह्यतां गुणाएवग्राह्या दोषास्तुत्याज्या अपसारणीयाश्च नतुकाव्यमेवहेयं उत्तमविषयकत्वादितिभावः अत्रार्थांतरंन्यस्यंति पृथक्कृत्ये त्यादि नीरक्षीरमिश्रणे हंसैः तोयतः जलात् पयःदुग्धंपृथक्कृत्य विविच्य तदेवपीयते नतुजलमपीतिभावः कीदृशैर्बु धैः हंसैश्च कलाढ्यैःचतुःषष्टिकलासंपन्नैः एतेनसारासारविवेकसामर्थ्यंध्वनितं पक्षेकलं अव्यक्तमधुरःशब्दःतेनसमृद्धैः

क्लृप्तमेतंकलागण्यपद्यस्तवंशोधयित्वाकलाढ्यैर्विशुद्धैर्बुधैः ॥
गृह्यतांसारमत्रेतरन्मापृथक्कृत्यहंसैःपयस्तोयतःपीयते ॥ ७३ ॥

कलास्यान्मूलरैवृद्धौशिल्पादावंशमात्रके षोडशांशेचचंद्रस्यकलनाकालयोः कला कलंशुक्रेकलोजीर्णेप्यव्यक्तमधुरध्वना वितिविश्वः पुनःकिंभूतैस्तैः विशुद्धैः मात्सर्यादिदोषरहितैः एतेनगुणैकग्राहितापरदोषाच्छादकत्वादिद्योतितं पक्षे धवलैः शुद्धंस्यात्त्रिषुकेवले निर्दोषेचपवित्रेचेतिमेदिनी केवलार्थत्वाद्गुणांतरासमानाधिकरणे शुक्लेप्ययंप्रयुज्यते अत्रउत्तमैः सारासारेविविच्यतत्रसारमेवग्राह्यमितिसामान्यमर्थमुपपादयितुंहंसवृत्तांतरूपोविशेषार्थउपन्यस्तइत्यर्थांतर ॥८०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यासोलंकारः तत्रापिबुधहंसचरित्रयोः साम्यात्साधर्म्यशाल्पयं लक्षणंतुकाव्यप्रकाशे सामान्योवाविशेषोवातदन्येन समर्थ्यते यत्रसोर्थांतरंन्यासःसाधर्म्यैणेतरेणवेतितत्रापिविशेषणयोः श्लिष्टत्वाद्विच्छित्तिविशेषशाल्यसौ उक्तंचदंडि ना ज्ञेयः सोर्थांतरंन्यासोवस्तुप्रस्तुत्यकिंचन तत्साधनसमर्थस्य न्यासोयोन्यस्यवस्तुनः विश्वव्यापीविशेषस्थः श्ले षाविद्धोविरोधवान् अयुक्तकारीयुक्तात्मायुक्तायुक्तोविपर्ययः इत्येवमादयोभेदाः प्रयोगेष्वस्यलक्षिताइति शब्दालंकारस्तु पयःस्तोयतइत्यादौयकारतकारादेर्व्यंजनस्यावृत्तिदर्शनाद्वृत्यनुप्रासः लक्षणंतुकाव्यप्रकाशे वर्णसाम्यमनुप्रासश्च्छेक वृत्तिगतोद्विधा सोनेकस्यसकृत्पूर्वएकस्याप्यसकृत्परइति एकस्यापिशब्दादनेकस्यव्यंजनस्यद्विर्बहुकृत्वोवासादृश्यं वृत्यनुप्रासइति तत्रैवव्याख्यातं अतोनेकव्यंजनाऽऽवृत्तावप्यदोषः तत्रापि सारमत्रेतरन्मेत्यादौरेफादिमधुर वर्णद र्शनादुपमागरिका विशुद्धैर्बुधैरित्यादावोजःख्यापकवर्णसद्भावात्परुषा तुर्यपादादौ उभयाप्रकाशकयकारादिसत्वा त्कोमलाचवृत्तिरितिज्ञेयं उक्तंचतत्रैव माधुर्यख्यापकैर्वर्णैरुपमागरिकेष्यते ओजःप्रकाशकैस्तैस्तुपरुषाकोमलापरैरिति वामनादयस्त्विमावैदर्भीगौडीपांचालीतिरीतीर्मन्यंते श्लोके दंत्याक्षराणांबहूनांसत्वाच्छ्रुत्यनुप्रासोपि लक्षणंत्वाहवि श्वनाथः उच्चार्यत्वाद्यदैकत्रस्थानेतालुरदादिके सादृश्यंव्यंजनस्यैवश्रुत्यनुप्रासउच्यतेइति इदंवृत्यनुप्रासादिकंसुलभ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वादतिक्रांतश्लोकेषुनोक्तमतोदर्शितदिशाययथायथमूह्यं अस्मिन्काव्येगुणरीतिपाकादिविचारस्तुमयाविस्तरभयान्न क्रियते स्रग्विणीवृत्तं लक्षणंतु वृत्तरत्नाकरे रैश्चतुर्भिर्युतास्रग्विणीसंमतेति वृत्तलक्षणानिप्रायेणवृत्तरत्नाकरस्थान्ये वेहलिखितानि इहश्लोकेकलागण्यपद्यत्वं स्तोत्रविशेषणं कलासंपन्नपंडितानां तदालोचनस्यौचितीद्योतनायकलाऽ गण्यस्य भगवत इत्यादि व्याख्याने तु सर्वोत्तमनायकविषयकत्वादवश्योपादेयतास्यकाव्यस्यानेन विशेषणेन बोध्यते नायकोत्कर्षेण काव्योत्कर्षस्तु बहुविद्वत्संमतः यथोक्तं प्रतापरुद्रे पुण्यश्लोकस्य चरितमुदाहरणमर्हति न कश्चित्तादृशः पूर्वैःप्रबंधाभरणीकृतः १ प्रबंधानांप्रबंधॄणामपिकीर्तिप्रतिष्ठयोः मूलंविषयभूतस्यनेतुर्गुणनिरूपणं २ यथारामगुणवर्णनंरामायणवल्मीकजन्मनोर्महाप्रतिष्ठाकारणं तथामहापुरुषवर्णनेश्रेयस्करीप्रबंधस्थितिरिति उदीरितंचरुद्रभट्टेन उदारचरितनिबंधनाप्रबंधप्रतिष्ठेति उदितंचप्राचाभामहेन उपश्लोक्यस्यमाहात्म्यादुज्वलाकाव्यपद्धतिरिति साहित्यमीमांसाकृताप्यवादि नायकगुणग्रथिताःसूक्तिस्रजःसुकृतिनामाकल्पमाकल्पंतीति नैतावतागुणादिमत्काव्यस्यैवोपादेयत्वं किंतुभगवच्चरित्रनिरूपकस्यसाधारणस्यापि यथाहभोजराजः कवेरल्पापिवाग्वृत्तिर्विद्वत्कर्णावतंसाति नायकोयदिवर्ण्येतलोकोत्तरगुणोत्तरइति किंतर्हिवक्तव्यंगुणालंकाररसवत्तयापरमानंदजनकस्यपरमेश्वरचरितनिरूपकतया

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुरितनिवर्तकस्यचकाव्यस्योपादेयत्वंचामीकरस्येवसौरभवतः आश्रितंचैतदुद्भटेन गुणालंकारचारुत्वयुक्तमप्याधिको
ज्वलं काव्यमाश्रयसंपत्यामेरुणेवामरद्रुमइति नन्वेतावतोपादेयतातुनिष्पन्ना परंकथंपापापहारित्वमितिचेदित्थं
श्रीभागवते तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि नामान्यनंतस्ययशोंकितानियत् शृण्वंतिगायंति
गृणंतिसाधवइतिप्रतिपदमबद्धस्यापिवाग्विसर्गस्य समग्रजनसमूहपापविप्लावकत्वंकथ्यते भगवन्नाम्नांनिखिलदोष
प्लोषकत्वाखिलविमलफलोपलंभकत्वादिकंचश्रीभागवतेषष्ठस्कंधादौपुराणांतरेषुचतत्रतत्रप्रसिद्धमेव तदनुसारेणतन्मा
हात्म्यंचनामकौमुदीप्रभृतिषुप्रपंचितमेवेतितद्विशिष्टवाक्प्रबंधानांपापापहत्वे न काप्यनुपपत्तिः सांकेत्यंपरिहास्यंवा
स्तोभंहेलनमेववा वैकुंठनामग्रहणमशेषाघहरंविदुरित्यादिवचनेभ्यः किंचसत्काव्यस्यपुरुषार्थचतुष्टयसाधनत्वेनतदंतःपा
तिधर्मस्यापिसाधकत्वात् तद्विरुद्धपापनिवर्तकत्वंयुक्तमेव चतुःपुमर्थसाधकत्वंतुसाहित्यदर्पणे चतुर्वर्गफलप्राप्तिःसु
खादल्पधियामपिकाव्यादेवयतस्तेनतत्स्वरूपंनिरूप्यतइति अन्यत्रापि धर्मार्थकाममोक्षेषुवैचक्षण्यंकलासुच करोति
कीर्तिंप्रीतिंचसाधुकाव्यनिषेवणमिति काव्यप्रकाशेच · काव्यंयशसेर्थकृतेव्यवहारविदेशिवेतरक्षतये सद्यःपरनिर्वृत
येकांतासंमिततयोपदेशयुजेइतिशिवेतरक्षतिःकंठरवेणैवोक्ता नचेदंसर्वमानुषग्रंथैरेवसाधितमित्यप्रमाणं आप्तवाक्यानां

वेदाद्यनुरूपार्थत्वानिश्चयेनप्रामाण्योरीकारस्यावश्यकत्वात् किंचश्रुतावपि एकःशब्दःसुप्रयुक्तःसम्यक्ज्ञातःस्वर्गेलोकेच
कामधुग्भवतीतिकैय्यटोदाहृतायांएकशब्दस्यापितथाफलमुच्यते किंपुनरनेकशब्दात्मकसत्काव्यबंधस्य तथा मुंड
कोपनिषदि यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैस्तमेवैकंजानथआत्मानमन्यावाचोविमुंचथामृतस्यै
षसेतुरित्यन्यवाग्विमोकोपदेशद्वाराभगवद्विषयिकाएववाचः प्रयोक्तव्याइतिबोध्यते तत्प्रयोगादमृतलक्षणफलसिद्धिश्च
द्योत्यते अतएवाग्नेयपुराणे नरत्वंदुर्लभंलोकेविद्यातत्रसुदुर्लभा कवित्वंदुर्लभंतत्रशक्तिस्तत्रसुदुर्लभेतित्रिवर्गसाधनं
नाट्यमितिच विष्णुपुराणे प्रथमांशचरमाध्याये काव्यालापाश्चयेकेचिद्गीतकान्यखिलानिच शब्दमूर्तिधरस्यैतेवि
ष्णोरंशामहात्मनइति अतोभगवद्विषयककाव्यस्यदुरितप्रशामकत्वे नकोपिविचिकित्सागंधः नचकाव्यालापांश्चवर्जयेदिति
स्मृत्याहेयत्वमस्यशंक्यं अस्याःस्मृतेरसद्विषयककाव्यवर्जनपरत्वस्यसर्वैरेवांगीकृतत्वात् नयद्वचश्चित्रपदंहरेर्यशोजग
त्पवित्रंप्रगृणीतकर्हिचित् तद्वायसंतीर्थमुशंतिमानसानयत्रहंसानिरमंत्युशिक्षयाइत्यादि श्रीभागवतादिवाक्यैकवा
क्यतयातथाध्यवसायाच्च एतेन काव्यादीनामसत्यत्वान्नोपयोगःकथंचन धर्मैकतुःक्वचित्कीर्तिर्नैपुण्यंपाठतःक्वचि
दितिसर्वार्थनिर्णयस्थश्रीमदाचार्योक्तेरपिनविरोधः तस्याउत्प्रेक्षाद्यसत्यालापरूपलौकिकविषयककाव्यस्यधर्मेसाक्षादुप



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगाभावबोधनपरत्वात् तादृशस्यापिकाव्यस्यफलांशेउपयोगस्तुतत्रैवोत्तरार्द्धेउक्तः व्याख्यातश्चतैरेवटीकायां कीर्ति धर्मवत्फलसाधिकेतिफलांशेकाव्यादीनामुपयोगमाहेत्यादिना भगवद्विषयकाव्यस्यतूक्तरीत्यायथासंभवंधर्मजनकत्वम पि अतएवरामायणस्यभगवद्विषयककाव्यत्वाद्धर्मजनकत्वंतत्रैवाग्रेऽनुपदं चरितंरघुनाथस्येतिवाक्यमुपन्यस्योक्तं अतएच श्रीमदाचार्याणां यमुनाष्टक श्रीपरिवृढाष्टकादीनि श्रीविठ्ठलाचार्याणांव्रतचर्यादानलीलानिरूपणादीनितच्च रणाब्जचंचरीकाणामितरेषांचमहानुभावानां तानितानिभगवद्विषयकाणिसंस्कृतप्राकृतभाषानिबद्धानिकाव्यानिदृश्यंते तत्रतत्रपापनिवृत्त्यादिरूपफलजनकत्वंचोच्यते एवंभगवद्विषयकवाक्प्रबंधस्यप्रशंसनंचानेकत्रभागवतादिषुदृश्यते न नुपापविनाशकत्वेपिकथंभगवत्तोषकत्वमितिचेत्प्रथममेवावोचामस्तुतिप्रियोविष्णुरितिश्रुतिसिद्धंतादिति तत्तोषतःसर्व वस्तुसौलभ्यंच किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने तस्मिन्प्रसन्नेसकलाशिषांप्रभौ किंदुर्लभंताभिरलंलवात्मभिः अ नन्यदृष्ट्याभजतांगुहाशयःस्वयंविधत्तेस्वगतिंपरःपरामिति श्रीभागवतादिषुप्रसिद्धमेव तस्मादनेकवेदपुराणवचनैरतदन् गुणैः प्रामाणिकानेकविद्वन्निर्णयैश्च लक्ष्मीरमणचरणनिषेविण्यांनिर्जरतरंगिण्यामिवास्यांकृतौश्लोकद्वयोक्तफलविधा यित्वमवदातमेव इदंचकाव्यं पद्यंगद्यंचमिश्रंचतत्त्रिधैवव्यवस्थितमितिदंडिनोक्तात्रिविधकाव्येषुपद्यमात्रनिबद्धत्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्पद्यकाव्यं तत्रापिविवाहनायकोदयादिवर्णनेनमहाकाव्यैकदेशानुसारित्वादिदंविश्वनाथादिमतेखंडकाव्यं यथोक्तंसा
हित्यदर्पणे खंडकाव्यंभवेत्काव्यस्यैकदेशानुसारिचेति विद्यानाथस्त्वीदृशंसर्गबंधरहितमुपकाव्यंमन्यते यथाहसप्र
तापरुद्रीये असर्गबंधमपियदुपकाव्यमुदीयितइति असर्गबंधरूपंसूर्यशतकादीतिचव्याचख्यौ तत्रापि मुक्तकंकु
लकंकोषःसंघातइतितादृशइतिकाव्यादर्शाद्युक्ततदवांतरभेदेषुसंघातोयं श्रीमद्वल्लभाचार्यचरित्ररूपस्यैकार्थस्यैकेनैवस

## इतिश्रीमद्गोस्वामिकुलावतंसश्रीमथुरानाथात्मजश्रीगिरिधरांगज गोकुलाधीशविरचिताश्रीमद्वल्लभाचार्यस्तुतिरत्नावलीसमाप्तिमगमत् ॥

र्गेणवर्णनात् यथोक्तं यत्रकविरेकमर्थंसर्गेणैकेनवर्णयतिकाव्ये संघातएषगदितोवृंदावनमेघदूतादिरिति एवंस्वरूपेणात्यु
त्तमविषयकत्वादुक्तदिशाविविधसत्फलसाधकत्वाच्चेदमुपादेयंसर्वैःसत्हृदयैः उक्तंहिमहाप्रबंधेषु परिवढ्ढइविण्णाणंसंभा
विज्जइजसोविसप्पंदिगुणा सुव्वइसुपुरिसचरिअंकितज्जेणमणोणहरंतिकव्वालावाइतिअर्थस्तु परिवर्द्धतेविज्ञानंसं
भाव्यतेयशोविसर्पंतिगुणाः श्रूयतेसुपुरुषचरितंकिंतद्येनमनोनहरंतिकाव्यालापाइति तदलमतिविस्तरेण ॥ ७३ ॥



For Private and Personal Use Only

श्यामस्त्वंकथमीक्षणैस्तवसदालिभोस्मिवक्रंकुतश्वेतस्तेचिकुरोच्चयेनिवसनादीदृक्कठोरःकुतः वक्षोजाऽऽघटनात्तवेति
सरुषाकर्णोत्पलेनाहतोप्याश्लिष्यन्[1]करपृष्ठताडिततनुर्गोप्यावतुश्रीपतिः १ अपिच मुग्धेवह्निविलंबिनंफणधरंत्वत्के
शे[2]हस्तंविदन्केक्यायातिरयादसाविर्तिहरिर्हस्ते[3]नैतंदर्शयन् स्वस्मिन्सांद्रघनभ्रमादुपगतंपायाद्भियाकातरंदृष्टस्तत्क्षण
मुक्रमानमनसाश्लिष्टःस्व[4]यंराधया २ सत्[5]कार्यैकप्रमितिरुचिराऽनर्थवादाप्रमापिमायावादोत्कदनकुशलाऽऽस्तेस[6]माऽयो
दयापि सू[7]त्रैर्बद्धा स्वयमपि[8]गुणोच्छेदिनीयस्यवाणीस्वाचार्योसौप्रतिजनिगतिर्वह्नभाख्योममास्तां ३ तत्वंप्राप्य
[9]नंतत्वंगमयन्यःकरोतिदृक्पात्रं श्रु[10]तिमात्रविषयमपितंकलयेऽमलयेहविठ्ठलंभक्त्या ४ स्थित्वा[11]रैवंतपर्वतस्य

---

१ गोप्याः करपृष्ठं अंगुलीनामुपरितनः करपश्चाद्भागः. २ केशपाशं अत्र सर्पभ्रमः तस्याः तनौच कनकवल्लिभ्रम इतिभावः.
३ स्वस्मिन्कृष्णे मेघभ्रमादायांतं मयूरं. ४ स्वयं नायकप्रयत्नं विनैवाश्लिष्टः. ५ सत्कार्यस्यैवप्रमापिकापि अनर्थवादैरप्रमेति विरोधः परिहारस्तु
कार्यं जडजीवादिकं सर्वं सदेव नतु मिथ्येति प्रमिति जनिका ॥ नास्ति अर्थवादानां विधिस्तावकवाक्यानां अप्रमा स्वार्थेप्रामाण्याभावो यस्यांसा
निबंधादिष्वर्थवादानां स्वार्थे प्रामाण्यांगीकारात्. ६ विरोधेमायोदयेनसहितः परिहारे समेषां सर्वेषां अयानां शुभावहविधीनां उदयवती.
७ विरोधेसूत्रैस्तंतुभिः परिहारे तत्वसूत्रैः. ८ विरोधेगुणारज्जवः परिहारेसत्वादयः. ९ विरोधे नेति तत्वमिति पृथक्पदे परिहारेदैववशात्मप्रभावं.
१० कर्णमात्रस्यविषयमपि दृग्विषयंकरोतीतिविरोधः वस्तुतस्तु वेदैकवेद्यं भगवंतं साक्षाद्दर्शयति. ११ गिरनारइतिप्रसिद्धस्य.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरतः श्रीजीर्णदुर्गेपुरेश्रीदामोरकाममोहनविभूसंसेवमानानसदा श्रीमद्दीक्षितवंशमौक्तिकमणीनेकादशानन्वयेस्वाचा
र्याद्व्रजवल्लभाभिधगुरून्मातामहान्स्वान्भजे ५ कृष्णयजुस्त्रिदिवतरोःसुमनः श्लाघ्यास्तितैत्तिरीशाखा तांसेवते
मधुरवागापस्तंबद्विजातिकुलं ६ तत्रोद्भूतोमतिमान्वाधूलसगोत्रवारिधेश्चंद्रः तैलंगवेल्लनाटीज्ञातिर्विद्वत्सभारत्नं
७ यःपचनद्युपाह्वयगोपीनाथांगजोघनश्यामः गोवर्द्धनाभिधोहंतत्सूनुस्तन्मुखाधिगतविद्यः ८ रत्नावलिर्दृढगुणा
सुवर्णपदकामितप्रभा तेन बुधहृदयकंठभूषणहेतोःसरलीकृताप्रकाशवशात् ९ श्रीविक्रमस्यशरदृग्ग्रहभूमितेऽब्देचैत्रेऽ
सितेहरितिथौपरिपूरितेन श्रीवल्लभप्रभुजनेःसुदिनेह्यनेनतुष्यंतुतेममचमंतुमिहक्षमंतां १० मयांधभावाच्छ्रुतिमात्रवेदि
नाकरैःपरेषामखिलंविलेखितं नैकांतिकीमानुषशेमुषीचतन्ममक्षमध्वंस्खलितानिपंडिताः ११ इतिश्रीमद्वल्लभाचार्य
मतवर्तिनावेदांतादिविषयकानेकनिबंधनिर्मायिणाविद्वद्वर्यपंचनदिघनश्यामभट्टात्मजेन गोवर्द्धनाशुकविनाकृतःश्रीमद्व
ल्लभाचार्यस्तुतिरत्नावलीप्रकाशःसंपूर्णः ॥ शुभमस्तु ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

---

१ श्रीविट्ठलनाथपौत्राणां गोपीनाथदीक्षितानां श्रीमथुरेशसेविनां. २ श्रीवल्लभाचार्यानारभ्यपुरुषपरंपरागणनेएकादशान्. ३ देवैःपुष्पैश्च.
४ ब्राह्मणानां पक्षेपक्षिणां. ५ सदक्षरपदैरभिलषितशोभा मालापक्षे हेमपदकैरमितश्रीः.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अनुष्टुप्.

बाणग्रहर्षींदुमिते शाके मुंबाऽऽख्यपत्तने ॥
ओरिएन्टलयंत्रे ऽयं ग्रंथः कीलैः सुमुद्रितः ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति प्रकाशसहिता श्रीबप्पभट्टाचार्यस्तुतिरत्नावलिः समाप्ता ॥

For Private and Personal Use Only